A.C. Joshi Library
P.U. Chandigarh

MSS No. 450 Subject Dharam Sastra

Name of MSS Gautam Dharam Bhashay Maskariyan

Author

Period Folios 403

Script Devnagiri Source Madras; govt. MSS. Lib.

Missing Folios

गौतमधर्मसूत्र भाष्यम: मस्करीयम्
४०३ पृष्ठ ॥ ल०म०१६ पं०प्र०पृ०(भा०१ में); ४५६ पृष्ठ ॥ ल०म०१६ पं०प्र०पृ० (भा०२ में) ॥
ह०लि०
गवर्नमैण्ट ओरिएण्टल मैनुस्क्रप्ट्स लाएब्रेरी, मद्रास; हस्तलिखित ग्रन्थ नं०: 15267-D की प्रतिलिपि ॥

॥ गौतमधर्मसूत्रभाष्यम् ॥

D.15267. Vol.I. "मस्करीयम्"

Chapters One to Six } copied by.
Waranatha Chariyar.
(V.G. Saranatha Chary)

Copied from D.15267 Vol.I. mss of G.O.mss. library.

2

(1)

श्रीः

॥ श्रीमहागणपतये नमः ॥ 9-7-4.

॥ हरिः ओम् ॥

Skt. ॥ अविघ्नमस्तु ॥ D.15267 Vol. I

॥ गौतम भाष्य प्रारम्भः ॥

॥ शुभमस्तु ॥

ओम् ॥ सर्वधर्मस्वरूपाय सर्वकार्यलयाय च । प्रणिपत्यादिदेवाय वासुदेवाय भक्तितः ॥

गौतमीयच्छलेनेदं सर्वस्मृतिनिबन्धनम् । क्रियतेऽथाधुना भाष्यं स्वनुना वाहृटस्यतु ॥

कोऽस्याभिसम्बन्धः अयमुच्यते । सन्ति चतुर्दश विद्यास्थानानि । तद्यथा ॥ अंगानि वेदाश्चत्वारः मीमांसान्यायविस्तरः । पुराणं धर्मशास्त्रञ्च विद्या ह्येता-

-चतुर्दश॥ इतितेषां मध्ये परिगणित-

2 P. -मिदं धर्मशास्त्रमारभ्यत इत्यभिसम्बंधः।
अथवा पुरुषस्य सुखदुःखोपभोगार्थैः
शरीरेन्द्रियविषयैः संयोगवियोगरूपो
जन्ममरणप्रबंधः संसारः। सच (धर्मा)
-धर्मनिमित्तः नान्यनिमित्तः तयोश्च धर्मा-
र्माधर्मयोरिष्टानिष्टोपभोगहेतुत्वात्।
उपादान परिवर्जनार्थं कुर्वीं भवतः तदु-
भयं परिज्ञानेन संभवतीति धर्माधर्मस्व-
रूपावबोधनार्थं गौतमेन शास्त्रं प्रणीतमि-
ति प्रयोजनमपि चास्य तदेव धर्माधर्मो-
पादान परिवर्जनयोः पुरुषार्थत्वादिति
अभिधेयमष्टकादि यथा श्रौतान्यग्निहो-
मादीन्यवश्यकर्तव्यानि। तथा अष्टकादीन्य- (कर्मा)
पीति। तत्र सर्वकार्याणां कारणतः प्रवृत्ति
दर्शनात् पूर्वं कारणविशेष प्रतिपादनार्थ

माह—:

सू. वेदो धर्ममूलम् ॥

ननु च विधिप्रतिषेधरूपत्वाच्छास्त्रस्य-
उपनयनं ब्राह्मणस्याष्टमे इत्याद्येव वक्तव्यं,
3 नत्वनुवादरूपत्वात् वेदो धर्ममूलमित्यादी-
नि हि निष्प्रयोजनत्वादनुवादस्येति। नचा-
नेन वेदस्य प्रामाण्यं प्रतिपाद्यते;
तस्य स्वतऽएवसिद्धेः अन्यथा येन
प्रामाण्यं प्रतिपाद्यते तस्याप्यन्येनेत्य-
नवस्थास्यादिति। उच्यते वेदस्य धर्म-
मूलत्वानुवादः तद्द्वारेण स्मृतिशील-
योः धर्ममूलत्वप्रतिपादनार्थः तत्कथ-
मिति चेदुच्यते वेदवचनादुच्चारितत्वा-
न्नात् तत्पदार्थविदां विशिष्टेऽर्थे याप्रति-
पत्तिरसन्दिग्धा जायते। नच कालान्तरे-
देशान्तरे पुरुषान्तरेऽवस्थान्तरेवा-

(विपर्ययो) भवति सा धर्म मूलमिति।
यत्र निस्सन्दिग्धं अविपरीतं च ज्ञानमु-
त्पद्यते तस्य प्रामाण्यमध्यवसितुं शक्य-
ते, न च वेद जनितस्य प्रत्ययस्य कारण
दोषकृतं मिथ्यात्वं कर्तुरनभ्युपगमात्।
कर्तृकृते हि दोषाः शब्द जनितस्य प्रत्य-
यस्य मिथ्यात्वमापादयंति। ऽवमुत्तरार्थो
ऽनुवादः। इदानीं सूत्रं विव्रियते "वेदः
4 मंत्र ब्राह्मणाख्यो ग्रन्थ राशिः विद-
ज्ञाने ज्ञायतेऽनेन धर्मादिस्वरूपमिति
वेदः, यद्यपि स्मृत्यादेरपि ऽतत्तुल्यं,
तथापि परिव्राजकादिवद्रूढित्वान्नदो-
षः। तथा च स्मृत्यन्तरं-:
"श्रुतिस्तु वेदो विज्ञेयः धर्मशास्त्रन्तु वै स्मृतिः॥
इति॥ स च ऋग्वेदादि भेदेन भिद्यते।
जात्यपेक्षयैकवचनम्। धर्म, कर्म, आत्मा-

र इत्यर्थः। अपूर्वाख्यो वा, मूलं कारणं-ज्ञापकं प्रमाणमित्यर्थः। तत्र विधिप्रतिषेधात्मक एव वेदो धर्माधर्मावबोधकत्वं प्रतिपद्यते। ननु मन्त्रार्थवादरूप इति-चेत् उच्यते अर्थवादादेरपि विध्येकवाक्यत्वेन कारणत्वात् पारम्पर्येण-कारणत्वमविरुद्धम्। ~~अर्थवादादेरपि (विध्येकवाक्यत्वेन)~~ अर्थवादस्तावत् स्तुतिनिन्दाद्वारेण विधिप्रतिषेधत्वं प्रतिपद्यते। मन्त्रास्त्वनुष्ठानकाले विहितार्थस्मारकत्वेन तत स्सर्वप्रकार एव वेदो ध-

5 र्ममूलमिति केचिन्मन्त्रार्थवादमूलत्वमेव प्रतिजानते। यथा "धन्वन्निव प्रपा असि" इत्यत्र प्रपा कर्तव्येत्यादि। अन्ये त्वाहुः-- अध्ययनमात्रादेव धर्मसिद्धिरिति। तथाहु--

"आ हैव स नखाग्रेभ्यः परमं तप्यते तपः।
यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितो-
न्वहम्॥ इति,
अतः पाठमात्रमेव धर्ममूलमिति तदयु-
क्तम्। कर्मफलश्रुतेरानर्थक्य प्रसङ्गान्मीमां-
-सकैरध्ययनफलस्य निरस्तत्वाच्च। अथवा-
वेदवाच्या क्रिया वेदशब्देनोच्यते। सा धर्म
मूलमिति श्येनादिषु न भवतीति चेत्।
उच्यते। तत्रापि वैरिवधात्प्राणधन-
-पुत्रदारादिरक्षण द्वारेण धर्मोऽस्त्येवेति।
ततश्चावगम्यते। यदिदं पुत्रपशुग्रा-
-मदारादि दृष्टं यच्च स्वर्गाद्यदृष्टं तत्स
र्वं धर्महैतुकमिति। धर्मः पञ्चप्रका-
6 रः। वर्णधर्मः आश्रयधर्मः गुणधर्मः-
वर्णाश्रमधर्मो निमित्तधर्मः इति। वर्ण-
धर्मोऽध्ययनादिः आश्रमधर्मः समिदा-

6 ध्यानादिः गुणधर्मोऽभिषेकादिगुणयुक्तस्य -
राज्यरक्षणादिः। वर्णाश्रमधर्मः ब्राह्मणस्य
ब्रह्मचारिणः पालाशो दण्ड इत्यादिः। निमित्त -
धर्मः प्रायश्चित्तादिः। मूलं कारणं। तथाच
आह "वेदो धर्मो निबन्धाविति" सूत्रारंभप्रयो -
जनञ्च यथैव वेदो धर्ममूलं तथा स्मृति -
शीलेऽपीति। ननु केवलं वेद एव धर्म -
मूलं किन्तर्हि — "[१२]तद्विदाञ्च स्मृतिशीले"[१]
वेदविदाञ्च ये स्मृतिशीले तेऽपि धर्म -
मूले भवतः। ते च वेदाविरोधीनि तद्वि -
दामित्यारम्भात्। मूलशब्दश्चेह द्वाभ्या -
मभिसम्बध्यमानो द्विवचनान्तो द्रष्टव्यः।
7 तच्छब्देन सर्वनाम्ना सषडङ्गो वेदो लक्ष्य -
ते। स्मृतिरूपनिबन्धाः "मनु, यम, वसिष्ठ, भृ -
ग्वङ्गिरो, बृहस्पत्युशनो, भारद्वाज, गौतमाऽऽप -
स्तम्ब, व्यास, शातातप, शङ्खलिखित सं

वर्तमित्रि हारीत बोधायन याज्ञवल्क्य प्र-
चेतःप्रभृतिभिः कृतं शीलमनुपनिबद्धमस-
माचारः कौतुकमङ्गलादि बहुत्वात् प्रतिदे-
शं म्रियमाणत्वाच्चानुपनिबद्धः। चकारो-
नुक्त समुच्चयार्थः। तेनाचारात्मतुष्टी अपि-
गृह्येते। यथाह मनुः—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनां आत्मनस्तुष्टिरेव च ॥ इति

सन्ध्योपक्रमणकाले त्रिप्रदक्षिणादिः शिष्टा-
चारः वेदविदां सकलानुष्ठानपराणां निर्दोष-
त्वेन यद्विज्ञानमुत्पद्यते सा आत्मतुष्टिः व-
क्ष्यति च— "यच्चात्मवन्तो वृद्धाः" इत्यादि
केचिद्वर्णयन्ति। अष्टकादिवदेषां कौतु-
कमंगलादीनां अनुपनिबद्धोऽकरणे प्र
त्यवायाभावात् आचारात्मतुष्टी अपि शी-
लएवान्तर्भूते इति न पृथगुपन्यस्तौ—

७ चकारोऽप्युक्तसमुच्चयार्थ एवेति। इदानीं पू-
र्वपक्षं करोति। वेदविदां अनुशीलनं धर्म-
मूलं न भवति। यतः —:

४ सू. दृष्टो धर्मव्यतिक्रमः॥

धर्ममूलत्वं प्राप्नोतीति शेषः। यथा प्र-
जापतिः स्वां दुहितरं अभ्यध्यायत्। यथा-
इन्द्रस्य परदारगमनादि, व्यासभीष्मादी-
नां अनाश्रमित्वेनावस्थानम्। किंच
~~साहस~~ सू. साहसंच महताम्॥

अत्रापि धर्ममूलत्वं प्राप्नोतीति शे-
षः। चशब्दोपादानात् सहशब्देन बल-
मुच्यते। तथाच नारदः सहो बलमिहो-
च्यते। तेन शास्त्रं लोकसंव्यवहारंचान-
वेक्ष्य यत्क्रियते तत्साहसम्। महतां लो-
के विख्यातानां इत्यर्थः। यथा रामस्य
नाटकादि स्त्रीवधः, जामदग्न्यस्य मातुः-

४ शिरच्छेदः, वसिष्ठस्य जलप्रवेश इत्यादि।
तेनायुक्तं शीलस्य धर्ममूलत्वं इति। कथं
पुनः धर्मव्यतिक्रमसाहसयोः भेदः। उच्य-
ते। विषयाभिलाषेण (वया) यदयुक्तमाच
र्यते स धर्मव्यतिक्रमः क्रोधाद्यभिभवेन
यत्क्रियते तत्साहसम्। अत्रोत्तरमाह-

५ सू. नतु दृष्टार्थेऽपरदौर्बल्यात्॥

नु शब्दः पक्षव्यावृत्यर्थः। दृष्टार्थो दृष्ट
प्रयोजनः। तस्मिन् दृष्टप्रयोजने शीलं ध
र्म मूलं न भवति। तथाच वसिष्ठः—
अगृह्यमाणकारणो धर्मः इति। नैतद्धि
वचनं दृष्टार्थे धर्मव्यतिक्रमसाहसे इति।
तस्मिन् गृह्यमाणे ईदूदेदित्यादिना प्रगृ
ह्य संज्ञायां सत्यां दृष्टार्थे अपरदौर्बल्या
दितिपाठः प्राप्नोतीति। अपरदौर्बल्या
त्। नपरः अपरः द्वेषाद्यभिभूतः-

९ परमार्थज्ञान इत्यर्थः। तस्य दौर्बल्यात्
असामर्थ्यात् धर्माधर्मपरिज्ञानाशक्तेरित्य-
र्थः। ज्ञानज्ञानेन ज्ञापितम्। महतामपि
तद्विदां कदाचिदभिभवोऽस्तीति शरीर-
वतः प्रियाप्रिययोः अवश्यंभावित्वात्।
तस्माद्यावदेतेषां रागादिदोषेणाभिभ-
वः तावत्तेषामाचारो न ग्राह्यः। तथाच
10 वसिष्ठः "शिष्टः पुनरकामात्मेति"। अथवा
अपरशब्देनेदानीन्तनाः कलियुगपुरुषाः
उच्यन्ते। तेषां दौर्बल्यात् असामर्थ्यात्।
एवं ~~तेषां~~ स्मृतिप्रामाण्यमुक्त्वाऽधुना
एकार्थोपनिपतितानां वाक्यानां पर-
स्परविरोधे सति किं कर्तव्यमित्यत आह—

सू. तुल्यबलविरोधे विकल्पः॥

तुल्यप्रमाणप्रापितः पदार्थः तुल्यबलः
तयोः परस्परविरोधात् सति विकल्पो वे-

१० दितव्यः। अयं वायं वेति नोभयपरित्या-
गः। उभयोः प्रमाणप्रापितत्वात् अन्य-
तरपरिग्रहः। एकस्मिन् गृह्यमाणे द्वि-
तीयस्यानर्थक्यं स्यादिति। किमुदाह-
रणम्। श्रुतौ तावत् उदिते होतव्यम-
नुदिते होतव्यमित्यादि। स्मृतावपि-
"नित्यं भोज्यं केशकीटावपन्नमिति गौत-
मः।

"पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम्।
दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति"॥

इत्याह मनुः। ननु चात्र सामर्थ्यादेव वि-
११ कल्पसिद्धेऽनर्थकमिदं सूत्रं। समुच्चयस्तु
११ वदत्र न संभवतीति नह्यनुदिते हुत्वा पु-
नरुदिते होतुं शक्यते। गुणभूतकालवशेन
प्रधानस्य होमस्याऽन्याय्यत्वात् प्रधानव-
शवर्तिनोऽपि गुणाः, न गुणवशवर्ति प्रधानं

११ इति । नचानावृत्तमुभयोः कालयोः होतुं शक्यते । एवं स्मृतावपि शुद्धिपरित्यागयोः नैव समुच्चयस्सयरसंभवतीति - परस्पर विरोधादिति नत्वोभयपरित्यागो युक्तः इत्युक्तम् । तेनात्र विकल्प एव प्राप्नोति इति नानेनेति । एवं तर्हि न्याय प्राप्तोनुवादोयं विशेषार्थः । को विशेषः । तुल्यबलयोरेव विरोधे विकल्पः, अतुल्यबलयोस्तु बाधकएवेति । तेन श्रुति स्मृतिविरोधे स्मृतिरेव बाध्यते । श्रुतौ हि - प्रत्यक्षःशब्दः स्मृतावानुमानिकः, नचानुमानं प्रत्यक्ष विरोधे प्रमाणी भवतीत्येवं -

१२ स्मृत्याचार विरोधे च मातुल दुहितृ परिणयनाद्याचारो बाध्यते (इति) तत्र ह्याचारात् स्मृत्यनुमानमिति विरोधे विकल्पवचनाद्विरोधे च तुल्य प्रमाणशिष्टानामपि समुच्चयः

12. यथा च मन्वादीनां ~~श्रुतौ~~ श्रौतेषु कर्मस्वि-
ति। ननु च यदि वेदलिंगप्रभवत्वाभ्युपगम एव,
श्रुतेः स्मृत्यासह तुल्यबलत्वमुपपद्यते।
तथाहि- मंत्रार्थवादवाक्येष्वपि यानि-
स्मार्तधर्ममूलानि लिंगानि कुमारा विशि-
खा इवेत्येवमादीनि, तेषां प्रत्यक्षवेदवा-
क्यविरोधे सति दुर्बलत्वं प्रसज्यते। न-
ह्यनुमितस्य वेदवाक्यस्य प्रत्यक्षस्य
च बलाबलविशेषोऽस्ति। प्रत्यक्षानुमानप-
रिच्छिन्नाग्न्यादिवदिति। स्यादेतत्। यत्र
स्मृतिवचने वेदविरोधोऽस्ति तन्नैव वेद-
वाक्यानुमापकं भवति इति। किं तर्हि भ्रां-
13 त्यादिप्रभवमेवैतदिति। तच्च न युक्तं ध-
र्मशास्त्रप्रणेतुरनाप्तत्वाभ्युपगमे अविश्वास
प्रसंगात्। यदा हि वेदविदविच्छिन्नपारंपर्या
स्मृतिरभ्युपगम्यते। तदापि तुल्यबलत्वमु-

13 पपद्यते । यस्तावन्मातुलसुतापरिणयनादिक-
उपन्यस्तः तस्य कामाद्यभिभवे सति दुश्चा-
रितत्वात् शिष्टाचरितत्वमेव नोपपद्यते । यस्तु
विगानेनोक्त लक्षणैः शिष्टैराचर्यते तस्य वेद-
मूलत्वाविशेषात् स्मृत्यासहातुल्य बलत्वं प्रा-
प्नोति निबन्धनानिबन्धनयोस्त्वन्यदेव प्रयो-
जनमुपदिष्टम् । न च समाचारस्य स्मृतिवाक्या-
न्तरितवेदवाक्यानुमानयोः सन्निकर्षकृतं
बलाबलत्वं सिध्येत । अत्रोच्यते अतुल्यब-
लत्वं तावत् वेदादीनां सूत्रारंभसामर्थ्यादेवा-
वगम्यते । यदा हि तुल्यबलान्येतानि स्युः, ततो-
विरोधे विकल्पसामर्थ्यादेव सिद्ध इति किमने-
14 न सूत्रेण क्रियत इति । तुल्यबलग्रहणञ्चानर्थ-
कं स्यादिति । अस्मिंश्च पक्षे वेदाद्दुर्बलत-
रत्वं स्मृतेरुपपद्यते । न च लिंगप्रभवत्वं
उपपद्यत इत्युक्तम् । तेनायमेव पक्षः

14 युक्तः। यस्तु स्वातंत्र्यपक्षोऽभिहितः त-
द्विदांच स्मृतिशील इत्येतस्मिन् सति दुरु-
पपादऽवेति। तस्मात् वेदलिंगप्रभवत्व
मेव स्मृतीनां निर्दौबतरमिति। नन्वेव-
पि विनोपपद्यते। क्वचित् स्मृत्या श्रुते
र्बाधदर्शनात्। यथा सामान्येन प्रवृत्तो वै-
दिककर्माधिकारः स्मृत्या उपनीतादि पुरु-
षविषयऽवाधिक्रियते। तथा संस्कारैक-
देशोऽनापि आत्मगुणयोगे सति विशि
ष्टफलाभिधानात्। तथा गामालभेतेति
श्रुति चोदितोऽपि चौर्यं स्मार्तं प्रतिषेध
15 बलीयस्त्वादेव विक्रीयते। तथाऽग्निहो
त्रादिचोदितं जीवनोपाधिकं कर्म द्रव्यसाध्य-
मपि सन्न स्मार्तचौर्यादिप्रतिषिद्धेनापि द्र-
व्यमार्जयित्वा नाक्रियते। अतः श्रुत्या स्मृ-
तिर्बाध्यत इत्युक्तं युक्तमित्युच्यते।

15. विरोधेसति प्रमाणानां बलाबलचिन्ता युज्यते । यत्र तु विरोधाभावः तत्र दुर्बलोपि नैव बाध्यत इति । यस्तावदुपनीतस्या कर्माधिकारः सः श्रुत्यानैव विरुध्यते । उपनयनस्य वेदग्रहणार्थत्वात् तस्य च कर्मार्थत्वात् नच पूर्वसंयोगमन्तरेण प्रधानासिद्धेः । यच्चोक्तं गोवध्यस्तु श्रुतिचोदितोपि नक्रियत इति तदपि नकेवलं स्मृत्या । मंत्रवर्णाच्च "मागां प्रमापयाजं प्रमापयाश्वं प्रमापये"त्यादि । अतः स्मृत्या श्रुति नैव बाध्यते । केचित् उत्सन्नशाखा पूर्विकां (वक्तुं नयुज्यते । इदानीं उपलभ्यमानत्वात् अत्र आपस्तंबोक्तस्य चायमर्थः अभिप्रायः) स्मृतिमाहुः । तदयुक्तं तत्र विचार्यते । किं स्मरणात्पूर्वमेव विनष्टाः शाखा, उतोत्तरकालमिति । यदि पूर्वं तत्र स्मरणं नोपपद्य

15 ते। विनष्टत्वात् पूर्वविज्ञानसदृशत्वात् स्मृतेः।
यद्युत्तरकालं तदोत्सन्नशाखा पूर्विकैर्वक्तुं न
युज्यते। इदानीमुपलभ्यमानत्वात्। आप-
16 स्तम्बोक्तस्य चायमभिप्रायः। उत्सन्नाः क्व
चिद्देशेषु सर्वत्र तेषां उत्सन्नाः पाठाः प्रयो
गादनुमीयन्त इत्यत्र व्याख्या कर्तव्या।
एवमियद्धर्मप्रमाणपरिभाषोक्ता साम्प्र
तं यत्स्मृत्या प्रमीयते तदभिधानार्थमाह-

सू० उपनयनं ब्राह्मणस्याष्टमे ॥

वेदस्य अग्नेः आचार्यस्य यमनिय-
मानां वा समीपे नयनं उपनयनम्। तद-
ष्टमे वर्षे वर्षगणनासामर्थ्यात् नित्योऽयमु-
पनयनकालः। काम्यापत्कल्पयोरूर्ध्वम
भिधानात्। क्षत्रियवैश्ययोरूर्ध्वमभिधा-
नात्। शूद्रस्य चैकजातित्वात्। अर्थसिद्ध-
स्यापि ब्राह्मणग्रहणस्य जातिनिमित्तत्वप्र-

16 - सिद्ध्यर्थ आरम्भः। ननु द्विजत्ववत् ब्राह्मणत्वं
क्रियत इति। एवं च सुरापस्य ब्राह्मस्यास्यामा -
- सिंचेयुः इत्येवमादयो ब्राह्मणोद्देश्येन विधी
यमाना अनुपनीतस्यापि भवन्ति। यद्वा
17 ब्राह्मणग्रहणेन विना त्रयाणां अपि एतन्नि-
त्यं स्यात्। काम्यं तु ब्राह्मणस्य नवमे पंचमे
वा स्यात्। इतरयोरेकादशद्वादशयोः
स्यातास्। काम्यानन्तरमभिधानात्
पूर्वसंस्काराभावे प्युपनयनेनाधिक्रिय-
ते। न त्वनेन विनोपरितनैरिति गर्भाधाना-
दिकमनुक्त्वा पूर्वमुपनयनस्यैवेहारम्भः।

सू. नवमे पंचमे वा काम्यम्॥

कामाय हितं काम्यं तदुत्पादनसमर्थम्। पं -
चमे नवम इति वाच्ये क्रमभेदोऽनयो-
रंतरा क्षत्रियवैश्ययोः काम्यकालप-
रिग्रहणार्थः। तथाच मनुः—

17. "राज्ञो बलार्थिनष्षष्ठे, वैश्यस्येहार्थिनोऽष्टमे।"
इति विसमासः काम्यभेदज्ञापनार्थः।
तथाच स्मृत्यन्तरम् — "नवमेवायुष्कामं
पञ्चमे ब्रह्मवर्चसकामं" इतिवा शब्दो विक-
ल्पार्थः। तदिच्छातो द्रष्टव्यम्।

सू. गर्भादिस्संख्यावर्षाणाम्॥

गर्भसहचरिता दशमासा गर्भशब्देनोच्यं-
-ते। तत्प्रभृति वर्षगणना नतु जन्मत आरभ्य।
18 ~~तद्दति~~। ततश्चोपनयनं ब्राह्मणस्याष्टमेत्यव
मादौ गर्भाष्टमइद्यि योज्यम्।

सू. तद्वितीयं जन्म॥

तत उपनयनं द्वितीयंजन्म तेन संस्कृतो
द्विजातिर्भवति इत्यर्थः। द्विजादीनां अध्य-
यनमित्यादौ व्यवहारसिद्ध्यर्थं द्विजसंज्ञा
करणम्। तद्ग्रहणं नित्यकाम्योपनयन
संग्रहार्थम्।

१८. सू. तद्यस्मात्स आचार्यः ॥

तद्ग्रहणं पूर्ववत् "आचार्यः श्रेष्ठो गुरूणां" (बमा) इत्यादौ व्यवहारार्थं संज्ञाकरणम्।

सू. वेदानुवचनाच्च ॥

वेदानुवचनं समस्तवेदाध्यापनं। अदृष्टार्थमेकदेशाध्यापने न गुरुः। तथाच मनुः :-

"अल्पं वा बहु वा यो यः श्रुतस्योपकरोति यः।
तमपीह गुरुं विद्यात् श्रुतोपक्रियया तया ॥"

इति। दृष्टार्थं चेदुपाध्यायः। तथाच वसिष्ठः :-
यस्त्वेकदेशं स उपाध्यायः इति। चकाराद् अर्थव्याख्यातापि। तथाच यास्कः :-
"आचार्य आचारान् आचिनोति बुद्धिं वेति"।

१९ केचित् चकारं पूर्वसूत्रेण समुच्चयार्थं व्याचक्षते। तेनोभयकरणादेवाचार्यः। तथाच मनुः :-

१५ " उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" ॥ इति
सू. एकादशद्वादशयोः क्षत्रियवैश्ययोः ॥ .
नित्योयं कालः काम्यापत्कल्पयोः उक्तवक्ष्य
माणत्वात् । यदा तु नित्यकाम्ययोः केनचि-
न्निमित्तेन दुर्भिक्षादिनातिक्रमस्स्यात् । तदानीमा
पत्कल्पमाह —:
सू. आषोडशाद्ब्राह्मणस्यापतिता सावित्री ॥
आङ् त्राभिविध्यर्थः, सह षोडशेन वर्षेणेति
द्व्यधिकाया इति लिङ्गात् । षोडशे सर्वकाम
मिति स्मृत्यन्तरदर्शनाच्च । अपतिता अनप
गता । सावित्रीशब्देन तत्साधनमुपनयमुच्यते ।
उपनयस्याधिकृतो भवतीत्यर्थः । अनुक्तीतस्या
पि जातेरविनाशार्थं ब्राह्मणग्रहणम् । एवं च
पित्रादिष्वनुपनीतेषु प्रायश्चित्तेनोपनय
२० नेनाप्यधिक्रियते । तथा चापस्तम्बः —:

२० "यस्य पितामह प्रपितामह इत्यादि"।

सू. द्वाविंशते राजन्यस्य ॥

आङत्राप्यनुवर्तते, वर्ष सहित: राजन्यशब्द-प्रयोगो ऽ......शब्द प्रसिद्ध्यर्थः। तस्योपनीतस्यैव राज्येऽधिकारः। इति.

सू. द्व्यधिकाया वैश्यस्य ॥

द्वाभ्यामधिकाभ्यां (यद्वा) या द्वाविंशतिः सा द्व्यधिका चतुर्विंशतिरित्यर्थः। चतुर्विंशतेर्वक्तव्ये ऽव मभिधानं पूर्वत्राङोऽभिविधिबोधनार्थम्। उक्तः उपनयन कालः। इदानीं तत्साधनाभिधित्सयाऽह —:

सू. मौंजी ज्यामौर्वी सौत्र्यो मेखलाः क्रमेण ॥

मुञ्जविकारा मौंजी, मूर्वा प्रसिद्धा तद्विकारा, मौर्वी ज्या चासौ मौर्वी चेति सामानाधिकरण्यम्। ततश्च धनुषोपनी-

२० यज्ञाह्या। सूत्रं शणसूत्रं ऽाकरुणा।-
मौर्वी इतरे त्रिवृताः। तथाच मनुः-
२१ "मौंजी त्रिवृत् समाः श्लक्ष्णाः कार्या विप्रस्य
मेखला। क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शण-
तांतवी"॥ इति

ज्या मौर्व्याः द्विलब्धा (वृत्त्यर्थं) वर्तनार्थं-
क्रमग्रहणम्। केचित् अभाववैकल्पिका-
र्थं क्रमग्रहणमिति वर्णयन्ति। तथा-
च- मनुः-;
" मुंजाभावे तु कर्तव्याः कुशाश्मंतकबल्बजैः।
त्रिवृताग्रंथिनैकेन त्रिभिः पंचभिरेव वा॥
इति। न्यायसिद्धेः क्रमग्रहणस्य अन्यार्थ-
त्वात् इति।

सू- कृष्णरुरुबस्ताजिनानि॥
अजिनशब्दः प्रत्येकमभिसंबध्यते। कृष्णः
कृष्णमृगः, रुरुः पृषन्मृगः बस्तः प्रसि-

२१ दृढः । एतानि क्रमेणोत्तरीयाणि । तथाच
स्मृत्यन्तरं- "अजिनमेवोत्तरीयं धा-
रयेयुः" इति

सू॰ वासांसि शाणक्षौमचीरकुतपाः
सर्वेषाम् ॥

शाणविकारः शाणः । क्षुमा अतसी तद्विका-
रः क्षौमः दर्भादिनिष्पन्नं चीरं कुतपः
पार्वतीय ~~च्छ~~च्छागरोमनिष्पन्नः एतान्य-
धोवसनानि विषमसंख्यानां एव सर्वेषां
२२ सिद्धे स्मृत्यन्तरे "क्षौमं शाणं वा वासो ब्राह्मण
स्येति" तदाश्रित्य यो यो धा(?)संस्यात्तन्निवृत्य-
-र्थं सर्वेषां ग्रहणं अधिकारार्थं वा ।

सूत्रम्॰ कार्पासं चाविकृतम् ॥ (पा)

सर्वेषामित्यनुवर्तते । वास इति च । अवि-
कृतं रागाद्यसंबन्धं स्वभावतः शुक्ल-(धि)
मित्यर्थः । पूर्वेषामप्यविकृतत्व ज्ञाप-(ज्ञाप)

22. नार्थश्चकारः।

सू. काषायमप्येके ॥

रागसंबन्धमपि केचिदिच्छन्ति। अ-
पिशब्दः निन्दार्थः। अतः पूर्वेषामभा-
वे द्रष्टव्यम्। इदानीं काषायपक्षे निय-
मार्थमाह :

सू. वार्क्षं ब्राह्मणस्य ॥

वृक्षकषायकृतं वार्क्षम्। तदेव ब्राह्मण-
वासः।

सू. मांजीष्ठहारिद्रे इतरयोः ॥

मंजिष्ठया विकृतं (मांजिष्ठं) क्षत्रियस्य। हरि-
द्रया विकृतं वैश्यस्य।

सू. बैल्वपालाशौ ब्राह्मणदण्डौ ॥

बैल्वो वा पालाशो वा दण्डो ब्राह्मणस्य।

23 यद्यपि द्वन्द्वनिर्देशः तथापि यज्ञियो वा
सर्वेषामित्येकवचननिर्देशात्। प्रति

23 ग्रहेप्सितं दण्डमित्येवं स्मृत्यन्तरे दर्शना-
न्नैकस्यैव धारणं युक्तम् ।

सू. अश्वत्थपैलवौ शेषे ॥

अश्वत्थः प्रसिद्धः पीलुः कलिकः शेषे
क्षत्रियवैश्यविषये । तत्रापि क्षत्रियस्या-
श्वत्थः वैश्यस्य पैलवः ।

सू. यज्ञियो वा सर्वेषाम्

यज्ञार्हो वा स्यात विभीतकबाधकं-
तिलादिवर्जितो वृक्ष इत्यर्थः । वा शब्दः
भाव विकल्पार्थः । अतः पूर्वेषामभावे ऽन्य-
था वार्थको वा शब्दः । सर्वेषां ग्रहणम
वंशयोरेव माभूदिति । इदानीं दण्डगुण-
माह -:

सू. अपीडिता यूपवक्राः सशल्काः ॥
अपीडिता वल्लीवेष्टन कीटाद्यादि-
भिः अनुपहता इत्यर्थः । यूपवक्राः

23. यूपवन्मताग्ताः सशल्काः सत्वचः। असमा-
सात् सर्वऽावं रूपाः न तु यथासंख्यम्। तथा-
च मनुः—
"ऋजवस्ते तु सर्वे स्युः अव्रणाः सौम्यदर्शनाः।
24. अनुद्वेगकरा नॄणां सत्वचो नाग्नि दूषिताः॥"
इति ·
सू. मूर्ध ललाट नासाग्र प्रमाणाः॥
प्रमाण शब्दः प्रत्येकमभिसंबध्यते।
मूर्धा प्रमाणो ब्राह्मणस्य। ललाट प्रमा
णः क्षत्रियस्य। नासाग्र प्रमाणो वैश्य-
स्य। तथा च मनुः—
"केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्र
माणतः। ललाट संमितो राज्ञः स्यात्तु
नासान्तिको विशः"॥ इति॥
इदानीं ब्रह्मचारि वेषमाह—
सू. मुण्ड जटिल शिखाजटाश्च॥

24 मुण्डो मुण्डित शिरस्कः। जटिलः केशी शि-
-खाऽव जटा यस्यासौ शिखाजटः। ऽएवंच
मुण्डशब्देन सर्वमुण्डनमुच्यते। चकारो वा
र्थः प्रत्येकमभिसंबध्यते। मुण्डो वा जटिलो
वा शिखाजटोवेति ब्राह्मण क्षत्रियवैश्याभि
प्रायं बहुवचनं यथाक्रमनिवृत्यर्थं वेति
नोक्तम्। तथाच मनुः —:
25 "मुण्डो वा जटिलो वा स्यात् अथवा स्याच्छिखाजटः।"
इति। इदानीं शौचवतोऽध्ययनाधिकारात्,
पूर्वं शौचार्थं द्रव्य शुद्धिरुच्यते —:

सू- द्रव्यहस्त उच्छिष्टोविधायाचामेत्॥

ब्राह्मणभोजनादौ प्रवृत्तो द्रव्यहस्तः। पूर्वं अनु-
च्छिष्टः केनचित्कारणेनोच्छिष्टस्पर्शनादप्र-
यतो भवति। तदा तद्द्रव्यं भूमौ स्थापयित्वा
(या)चामेत्। तथाच वसिष्ठः
प्रचरन्नभ्यवहार्येषु उच्छिष्टं यदि संस्पर्शेत् भू-

25 मौ निधाय तद्द्रव्यमाचम्य प्रचरेत् ‡ पुनरि
ति पुरुषशौचविवक्षायां द्रव्यहस्तग्रहणं
अनर्थकम् । अतो द्रव्यस्य निधानमात्रादेव-
व शुद्धेः पुरुषस्याचमनात् । यत्तु द्रव्य-
स्य स्मृत्यन्तरेण प्रोक्षणमुक्तं भूमौ नि-
क्षिप्य प्रोक्षणात् द्रव्यं शुध्यतीति तदप्य-
वहार्ये द्रव्ये पक्वविषये द्रष्टव्यम् । कथं पुनः
26 तुल्य संहिते सूत्रे विशेषोऽवगम्यते । निधा-
याचमनं न पुनरनिधायेति । उच्यते ।
यद्यनिधानमिष्टं स्यात् ततो द्रव्यहस्त उ-
-च्छिष्ट आचामेदित्येतावदेव वक्तव्यं स्यात् ।
किं निधानेन क्रियत इति । अतः सूत्रातिरेका-
न्निधानपक्षोऽवाभीष्ट इति गम्यते । यत्तु-
मनुनोक्तं-:

उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन ।
यात् ।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामि
यात्

26. इत्यादिना ~~ना विच~~ निधायाचमनं तदनभ्य-
वहार्यद्रव्यविषयं द्रष्टव्यम्। एवंच अभ्य-
वहार्य द्रव्यस्यापक्वस्य कदलीफलादेर्नि-
धानमात्रादेव शुद्धिः। पक्वस्य भूमौ नि-
क्षिप्य प्रोक्षणाच्छुद्धिः। अनभ्यवहार्यद्र-
व्यस्य वस्त्र पुस्तकादेरपि निधानाच्छुद्धिः।
इदानीं द्रव्य शुद्धिमाह:——
सू. "द्रव्यशुद्धिः परिमार्जन प्रदाहतक्षणनि-
र्णेजनानि तैजसमार्तिकदारव तान्तवानाम्॥"
तैजसादीनां द्रव्याणां परिमार्जनादिनाक्र-
27. मेण शुद्धिः, द्रव्यत्वे सिद्धे तेषां द्रव्यवच-
नं स्वकार्यनिष्पादनसामर्थ्यार्थम्। ततश्च
भिन्नभाण्डादीनां न शौचं, तेजसाहेतुभूते-
न यानि क्रियन्ते, तानि तैजसानि, सौवर्णा-
दीनि, तेषां तैजसादीनां उच्छिष्टलिप्तानां कुत-
ठातत मूत्राद्युपहतानां स्मृत्यन्तरे शुद्ध्यं-

२७ तरविधानात्। तथौशनसे तैजसानां मूत्र
पुरीषरेतःकुणपोपहतानां उल्लेखनं-
आवर्तनं भस्मनात्रिसप्तकृत्वः परिमार्जनं
अतैजसानां त्याग इति।
तथान्यशरीरमलदूषिते कण्ववचनमा
रब्धम् "श्लेष्माद्युपहतानां एकविंशति
परिमार्जनाच्छुद्धिः" इति। तथाऽस्पृश्यो-
च्छिष्टानां औशनसवचनमारब्धम्। अनुलो-
मशूद्रश्वकाकोपहतानां प्रतिलोमपुस्पृ-
-श्योपहतानां एकविंशतिपरिमार्जनम्-
२८ अस्पृश्योपहतानां आवर्तनमिति। तथा
मांसरुधिरोपहतानां शङ्खवचनमारब्धम्
"मृद्दरिष्टकेङ्गुदबिससर्षपकल्कगोमू-
त्रगोमयादीनि शौचद्रव्याणीति"।
तथा "रजस्वलादुष्टानां एकदिनं पञ्चग-
व्ये प्रक्षिप्य एकविंशति परिमार्जनाच्छु-

28. द्विरिति" पैठीनसि वचनात् । ऽवमन्येष्व -
ष्वपि स्मृत्यन्तरेषु मलाद्दूषितेषु तैजसेषु
शुध्यन्तराण्या(ण्यातानि) ज्ञातव्यानि अतोऽ
त्रो च्छिष्ट लिप्तानामेवं कल्पयितुं न्याय्यम् ।
इति तेषामुच्छिष्टलिप्तानां तैजसानां परिमार्ज-
नं भस्मना परितः सर्वतः मार्जनं शोधनं
मार्तिकानां मृन्मयानां अस्पृश्योपहतानां -
म् । कुतऽतत् स्मृत्यंतरे विशेषदर्शनात्तथाचौ
शनसवचनम् — " मृण्मयानामुच्छिष्टलिप्तानां
अवमार्जनं उच्छिष्टस्पृष्टानां प्रोक्षणमिति ।
तथाच वसिष्ठवचनम् :———
"मद्यमूत्रपुरीषैश्च श्लेष्मपूयाश्रुशोणितैः ।
संस्पृष्टं नैव शुद्ध्येत पुनः पाकेन मृण्मयमिति ।।
29 मद्यादि दूषितानां त्याग उक्तः । अतोऽत्र चण्डाला -
द्युपहतानां ऽावं कल्पयितुं न्याय्यमिति ।
प्रदाहः प्रकर्षेण दाहः पूर्वस्वभा-

29 वोत्पादनमित्यर्थः। दारवाणां आसनशयना-
दीनां अमेध्याद्युपहतानां तक्षणं तन्द्रकरण-
म। यावन्मात्रमुपहतं अस्पृश्यस्पृष्टानां प्रो-
क्षणम्। पुनः प्रोक्षणं संहतानामिति मनुव-
चनात् प्रक्षालनशक्यानां प्रक्षालनम्। तां-
तवानां तन्तुमयानां कार्पासादिविकाराणां अ-
स्पृश्यदूषितानां शुद्धिः निर्णेजनम्। म-
लदूषिते स्मृत्यन्तरं द्रष्टव्यम्। धावनं
तन्मात्रच्छेदनमुत्सर्गः इति। चे-
लानां मलदूषितानां इति पैठीनसिवच-
नम्। तथा श्रीफलैरंशुपट्टानामित्येवमा-
मादीनि मनुनोक्तानि द्रष्टव्यानि। अस्पृ-
श्यदूषितानां तु बहूनां नवानां प्रोक्षणं
बहूनां धान्यवाससामिति मनुना प्रो-
क्षणेनैव शुद्धिविधानात्। अतोऽल्पा-
30 नां अस्पृश्यदूषितानां निर्णेजनम्। तैजसा-

38 वदुपलमणि)

सू. तैजसवदुपलमणिशङ्खशुक्तीनाम्॥

तैजसवच्छुद्धिः उपलानां ~~मणीनां~~ अतिदेशः स्मृत्यन्तरोक्तशुद्ध्यपेक्षार्थः। उपलानां मणीनां तावच्छूयते:—

"निर्लेपं काञ्चनं भाण्डं मृद्भिरेव विशुद्ध्यति"
अब्जमश्ममयं चैव राजतं चानुपस्कृतम्॥"
इति "शङ्खशुक्तिमणीनां च गोमूत्रेणोदकेन वा"
इति मनुवचनम्। "पयसा शङ्खशुक्तीनां"
इति पैठीनसि वचनम्।

सू. दारुवदस्थि भूम्योः॥

अस्थि हस्तिदन्तादि संव्यवहारद्रव्यम्। भूमिः गृहादि दारुवत् इति प्रकृति द्रव्येणातिदेशं कुर्वन्नेतज्ज्ञापयति। यद्विकारस्य शौचमुच्यते। प्रकृति द्रव्यस्यापि तदेव भवतीति। इतरथा दारुवदिति वक्तव्यमा-

30 सीदिति। अस्थिभूम्योः स्मृत्यन्तरोपदिष्टाप्
क्षार्थोऽतिदेशः। तथाच स्मृत्यन्तरं —
अस्पृश्य स्पृष्टानां भूम्य स्थां प्रोक्षणा च्छुद्धिः
इति कण्ववचनम्।

सू. आवपनंच भूमेः ॥

भूमिग्रहणं अस्थिनिवृत्यर्थम्। चकारा-
31 त् स्मृत्यंतरोक्तान्यपि द्रष्टव्यानि। तथाचोक्तं
~~वसिष्ठे~~ वसिष्ठेन —
खननाद्दहनाद्(वृष्टेः) भिवर्षणात् गोभि
राक्रमणादपि। चतुर्भिः शुध्यते भूमिः
पञ्चमाच्चोपलेपनात्" इति। तथाच
मनुनाप्युक्तम् —
" संमार्जनेन संकेन लेखनेन च।
गवां च परिवासेन भूमिः शुध्यति पंचभिः।
इति। यथा लेपं विकल्पेन समुच्चयेन च
शौचं कर्तव्यम्।

31.. सू. चैलवद्रज्जुविदलचर्मणाम् ॥

रज्जुः दर्भाभिनिष्पन्नः विदलो वंशः मयूरपक्षा-
दिनिष्पन्नः। चर्म व्याघ्रचर्मादि। एषां चैल-
वद्वस्त्रवच्छौचम् ॥ चर्मशब्दस्य प्रकृति-
ग्रहणेन विकारस्यापिग्रहणम् । रज्वादीनां
प्रोक्षणस्यापि प्रवेशार्थोऽतिदेशः। अतः अ-
स्पृश्यस्पृष्टानां प्रोक्षणमपिकर्तव्यम् । तथैव
पैठीनसिः—: "रज्जुविदलचर्मणां अस्पृश्यस्पृ-
ष्टानां प्रोक्षणाच्छुद्धिरिति"।

सू- उत्सर्गोवा ॥

32 रज्वादीनां त्यागोवा, वैकल्पिकोयं पक्षः।

सू. अत्यन्तोपहतानाम् ।

अत्यन्तोपहतानां त्यागः। इतरेषां शौचमिति
इदानीं द्रव्यहस्त उच्छिष्टोऽनिधायाचामेत् इत्यु-
क्तम् । तथाचमनविधित्सयाचाह—:

सू. प्राङ्मुखउदङ्मुखोशौचमारभेत ॥

32. प्राङ्मुख उदङ्मुखो वेति इच्छातो विकल्पः।
ननु च शौचग्रहणमनर्थकम्। उत्तरत्राचामेदि-
ति वक्ष्यति, तेनैवार्थसिद्धत्वादिति। उच्यते
अन्यदपि शौचाङ्गमेतद्दिगभिमुख एव कुर्यादि-
ति। एवञ्च पादप्रक्षालनादिकमपि तद्दिगभि-
मुख एव कुर्यादिति। आरम्भेतेति समाहितार्थम्।
अतो यावदाचमनपरिसमाप्तिः तावत्काल-
मनन्यचित्तो भवेत्।

सू. शुचौ देश आसीनो दक्षिणं बाहुं जान्व-
33 -न्तरा कृत्वा यज्ञोपवीत्यामणिबन्धात् पा-
णी प्रक्षाल्य वाग्यतो हृदयस्पृशस्त्रिश्चतुर्वा
अप आचामेत्॥

शुचौ स्थाने अनुपहत इत्यर्थः। प्रागेव च पाणि-
प्रक्षालनमपि अर्थसिद्धं माभूत् अशुचिपा-
दसंबन्धात् देशस्याप्यशुचित्वमिति। तथा च
वसिष्ठः:- "प्रक्षाल्य पादौ पाणी चामणिबन्ध-

33 नादिति"। अस्सीनऽव नान्यावस्थः। तथा च-
वसिष्ठः—: "व्रजंस्तिष्ठंश्शयानः प्रणतोवाना-
चामेदिति"। दक्षिणं बाहुं जान्वोः मध्ये कृत्वा-
यज्ञोपवीति, यदि कदाचिदयज्ञोपवीती भूत्वा-
प्यासीत्तदाप्याचमनेऽवश्यं, यज्ञोपवीतिनाभवि-
तव्यमिति। तथा चापस्तंबः—: "उपासने-
गुरूणां वृद्धानां अतिथीनां होमे जप्यकर्म-
34 णि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्या-
दिति"। आचमनाङ्गत्वेनान्य यज्ञोपवीतोपादाना-
र्थं वा। तथा च वसिष्ठः—:
"स्नातकानान्तु नित्यां स्यां अन्तर्वासस्तथोत्तर
यज्ञोपवीते द्वे यष्टी सोदकश्च कमण्डलुरिति॥
मणिः यस्मिन्देशे बध्यते स मणिबंधो देशः।
तस्मादामणिबंधनान् पाणी प्रक्षाल्य वाग्यतः-
स्तूष्णीं हृदयस्पृशो हृदयङ्गमा अपां परिमाणार्थ-
मिदं माषनिमज्जनमात्राः तावत्यो भवन्ति। तथा चा-

होशना :- "मात्रनिमज्जनमात्राः हृदयङ्गमा भवन्ती"
ति । त्रिश्चतुर्वेत्यत्र विकल्पो व्यवस्थितः । यदापः-
पुनन्त्वि"त्यादिकं मंत्रमुक्त्वा समंत्रकमाचम्य-
ते । तदा चतुरन्यत्र त्रिरिति । अब्ग्रहणं गो-
मूत्रादिनिवृत्त्यर्थम् । तेषां शुद्धिहेतुत्वसामा-
न्यात् ग्रहणं माभूदिति । सोष्णबुद्बुदफेन-
कषायकलुषादिवर्जनार्थं वा पिबेदिति -
वक्तव्ये आचामेदिति गुरुसूत्राकरणं वि-
ध्यन्तरोपसंग्रहार्थम् । तत्रानु उशना आह-
दक्षिणं हस्ततलं गोकर्णाकारं विन्यस्य
ब्राह्मेण तीर्थेनाशब्दं पिबेत् (ऋग्यजुः
सामवेदान्ध्यायन्निति )

सू: ऋग्यजुस्सामवेदान्ध्यायन्निति द्विः परि-
मृज्यात् ॥

प्रकृतावोष्ठौ अत्रानुक्तत्वात् । स्मृत्यन्तरदर्शना-
च्च । ब्राह्मेणैव तीर्थेन । परीत्युपसर्गो विध्यन्तरो-

पसंग्रहणार्थम्। तत्रतूक्तं कण्वेन—:

"अथर्ववेदेतिहासपुराणौ ध्यायन् ब्राह्मेणतीर्थेनोष्ठयोः सलोमदेशमुन्मृज्यादिति।

सू. पादौचाभ्युक्षेत ॥

36 चकारान्मुखंच। अभ्युपसर्गो विध्यन्तरोपसंग्रहार्थः। तत्राह भार्गवः—: "ओष्ठौ परिमृज्यात् ततो मुखं परिमृजेदग्निं ध्यायन्। ततः पादावभ्युक्षेत् विष्णुं ध्यायन्निति"।

सू. खानिचोपस्पृशेच्छीर्षण्यानि ॥

शीर्षण्यानि, खानि नयन नासिका कर्णानि। चकाराद्धृदयंच। तथा च मनुः—:

"त्रिराचामेदपः पूर्वं द्विरुन्मृज्यात्ततो मुखम्। खानिचोपस्पृशेदद्भिः आत्मानं शिरएवच"॥ इति। उपोपसर्गो विध्यन्तरोपसंग्रहणार्थः। तत्र तूशना आह—: "अंगुष्ठोपकनिष्ठकाभ्यां नयने चन्द्रादित्यौ ध्याय-

36 ततः उपस्पृश्य तर्जन्यंगुष्ठाभ्यां नासिकावकाशौ-
प्राणान् ध्यात्वा तत उपस्पृश्य कनिष्ठिकांगुष्ठा
37 भ्यां कर्णौ दिशो ध्यात्वा तत उपस्पृश्य अंगुष्ठे-
नकेवलेन हृदयमुपस्पृशेत् आत्मानं ध्यात्वो-
पस्पृशेदिति"।

सू. मूर्ध्नि च दद्यात् ॥

मूर्ध्नि चेति वक्तव्ये दद्याद्ग्रहणं सर्वांगु-
-ल्यर्थम्। तथा च स्मृत्यन्तरम्—:
"सर्वांगुलीभिः श्रियं ध्यात्वा मूर्ध्नि प्रक्षिपे-
त् इति। चकारात् सव्ये च पाणौ। तथा च-
वसिष्ठः —: "मूर्ध्नि च दद्यात्सव्ये च पा-
णाविति" क्षत्रियवैश्ययोरविशेषाभि-
धानादेतदेवाचमनम्। स्त्री शूद्रौ तु
सकृत्सकृदिति स्मृत्यन्तर दर्शनात् स्त्री
शूद्रयोश्च सकृत्वा। म्नानात् सकृदो-
ष्ठस्पर्शनाच्च शुद्धिर्दृष्टव्या। अत्रा-

37 - नुत्रापि नच केवलमुच्छिष्टस्यैवाचमनम् ।

अन्यदप्याचमननिमित्तमाह —:

सू॰ सुप्त्वा भुक्त्वा क्षुत्वा च पुनः ॥

38 पुनर्ग्रहणात् आद्यावन्ते च आचमनं कुर्यादित्य-
र्थः । चकारात् स्नात्वा पीत्वा रुदित्वा च । तथा-
च वसिष्ठः —: "सुप्त्वा भुक्त्वा च क्षुत्वा स्नात्वा
पीत्वा रुदित्वा चाचान्तः पुनराचामेदिति" ।
तत्र क्षुतस्यानियतकालत्वादशक्यमाद्यवाच-
मनमिति चेत् तत्रापि नित्यप्रायश्चित्यर्थ आ-
रम्भः । तथाचापस्तंबः —: (भोक्ष्यमाणस्तु
प्रयतो) मुहूर्तमपि शक्तिविषये नाप्रयतः ति-
ष्ठेदिति स्वापादौ प्रयतस्याप्याचमन प्रारंभ साम-
र्थ्यात् । अतः तत्रादावन्ते चाचमनं
कुर्यात् । तत्र भोजने केचिद्द्विरादावेवा-
चमनमिच्छन्ति । तथाचापस्तंबः —:
"भोक्ष्यमाणस्तु प्रयतोपि द्विराचामेदिति"

38 अन्ये तु स्वापादावन्त एव द्विराचमनमिच्छं-
39 ति। तथाचाहोशनाः—

"सुप्त्वा भुक्त्वा क्षुत्वा स्नात्वा पीत्वा रुदि-
त्वाचाचान्तः पुनर्द्विराचामेदिति।" एवं च-
भोजने आदावन्ते च द्विराचमनं स्वापादावा-
दावेकं अन्ते द्विः। क्षुतस्यानियतकालत्वाद-
न्त एव द्विरिति सिद्धान्तः। इदानीं उच्छिष्टसं-
श्लेषादशुचित्वे प्राप्त आह:—

सू· दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिमर्श-
दशनान्तरलग्नेषु भक्ष्यभोज्यावयवेषु दन्त (नात्)
वद्भवति। अनुच्छिष्ट इत्यर्थः। नचेत्
जिह्वया संस्पृश्यन्ते। अत्रापि—

सू· प्राक्च्युतेरित्येके॥

तत्स्वपि जिह्वाभिमर्शने यावत्स्वस्थानात्
नच्यवन्ति तावच्छुचिरित्येके मन्यन्ते।

सू-च्युतेष्वास्राववद्विद्यान्निगिरन्नेव तच्छुचिः॥

40 च्युतेषु आस्ये यज्जलं तदास्रावं तद्वद्विजानीयात्।
तन्निगिरं छुचिरेव भवति। आचमन शंका ना-
स्तीत्यर्थः। एवं चास्रावमपि निगिरंश्छुचिरेव
भवति। कुतः च्युतेषु निगिरं शुचिरिति वक्त-
व्ये आस्रावद्विषयादित्यारंभात्। गौतम मतं तु
दन्तश्लिष्टानामपि जिह्वाभिमर्शने शुचिर्भवती-
ति। अन्यमतं प्राक्च्युतेरिति। सोयं व्यव-
स्थित विकल्पः। कर्मानुष्ठानाधिकृतस्या-
चमनं अन्यस्यनेति। यथोच्छिष्टावयवो
बहिर्भूतोऽशुचित्वमापादयति तद्वदास्राव-
स्यापि प्राप्त आह

सू. न मुख्याविप्रुष उच्छिष्टं कुर्वन्ति, न चेदङ्गे निपतन्ति ॥

मुखे भवाः मुख्याः विप्रुषः आस्रावावयवाः
ते मंत्रं मंत्रयमाणस्य विनिर्गतानां प्रायत्यं
41 जनयन्ति। यद्यंगे स्तनोदरादौ न निपतन्ति।

41 नि शब्दो निश्चयार्थः। निश्चयेन यदंगे पतन्ति
तदानीमेवोच्छिष्टं जनयन्ति। नाशंकामात्रे-
णेति। एवंच उच्छिष्टावयवो यत्र कुत्रचित्
पतन्नुच्छिष्टं जनयति। आस्त्रावोंऽगप्रवेति
सिध्दान्तः। सर्वशौचार्थमिदमधुनोच्यते।
सू. लेपगंधापकर्षणे शौचममेध्यलिप्तस्य॥
लेपगंधयोरपनयने कृते अमेध्यसंबंधस्य
शुचित्वं भवति। अमेध्य शब्देन द्वादशम-
ला उच्यन्ते। यदाहमनुः —:
"वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्णखाः।
श्लेष्मास्रु दूषिकास्वेदो द्वादशैते नृणां मलाः"।
इति। अनभिव्यक्तगंधानां श्लेष्मादीनां ले-
42 पमात्रदर्शनात् लेपग्रहणं मूत्रादीनां लेपा-
नुपलब्धौ गंधमात्रोपलब्धेश्च गंधग्र-
हणं, शौचाधिकारे पुनः शौचग्रहणं तैज-
-सादीनामपि लेपगंधापनयनादेव शौच-

42 मित्येवमर्थम् । तत्केन कर्तव्यमित्येतदाह :

सू. तदद्भिः पूर्वं मृदा च ॥

तच्छौचमद्भिः पूर्वं ततो मृदा । चकारात्तेन उभ-
येन तद्ग्रहणं अम्ललेपस्यापि चूर्णादिनाऽप-
कर्षणार्थः । तदद्भिः मृदा चेति वक्तव्ये पू-
र्वमपूर्वग्रहणं यत्र नातीव लेपो लक्ष्यते तत्राद्भि-
रेव प्रथमं शौचमित्येवमर्थम् । यदाह मनुः :
"निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुद्ध्यति ।
अब्जमश्ममयं चैव राजतं चानुपस्कृतम् ॥
इति । अथवा यत्र यत्र शौचमुक्तं तत्र-
43 तत्र अद्भिरेव प्रथमं शौचं कार्यं इत्येवम-
र्थम् । यथा मृतादापस्समुच्चीयन्ते तथा भ-
स्मादिरपि । समुच्चयार्थोऽपि समासः ।
तैजसादीनां द्रव्याणामुक्तत्वादिदं शौचं शरी-
रावयवस्यामेध्यलिप्तस्य द्रष्टव्यम् ।

सू. मूत्रपुरीषस्नेहविस्रंसनाभ्यवहारसंयो-
गेषु च ॥

43 च शब्दः आचमनानुकर्षणार्थः। विस्रंसनं-
निरसनं तन्मूत्रपुरीषस्नेहूणां प्रत्येकं अभि
संबध्यते। मूत्रपुरीषौ प्रसिद्धौ, स्नेहू रेतःए-
षमूत्रादीनां आचमनार्थएवोपन्यासः। लेपगं-
धापकर्षणस्य लेपनेन सिद्धत्वात। अभ्यव
हारसंयोगो अभ्यवहार्य द्रव्योपसंयोगः। तस्य
न मेध्यत्वात। लेपगंधापकर्षणार्थमभि-
धानम। आचमनस्य सुप्त्वा भुक्त्वेत्यनेन
सिद्धत्वात लेपगंधापकर्षणं च मृत्सलिल-
प्रक्षालनेन कुर्यात। एवं च "तदद्भिः पूर्वं मृ
दाचे"त्यत्र यदुक्तं चूर्णादिना लेपगंधापकर्ष-
44 णं तेनात्राक्य इहं द्रष्टव्यम। अथवाभ्यव-
हारसंयोगस्याप्याचमनार्थएवोपन्यासः।
सुप्त्वा भुक्त्वेत्यनेन सिद्धमनूद्यते। क्रमा-
र्थं कथं तद्ग्रहणेन अन्नलेपापकर्षणम। पू-
र्वमुक्तं तदपकर्षणं कृत्वा तत आचामेदित्ये-

44 वमर्थम्। अन्यथा सन्देहस्यादिति। तथाह्यप-
स्तंबः :— "मूत्रं कृत्वा पुरीषं वा मूत्रपुरीष-
लेपोऽन्नलेपो रेतसश्च ये लेपाः तान् प्रक्षा-
ल्य पादौचाचम्य प्रयतो भवतीति" (मूत्रपु-
रीषौ प्रसिद्धौ स्रोहू रेतः मूत्रादीनामाचमना-
र्थे उपन्यासः लेपगंधापकर्षणस्य लेपगं-
धापकर्षणशौचमित्यनेनोक्तत्वात्) यत्रचा

सू. यत्र चाम्नायोपिदध्यात् ॥

तत्र तदेव भवतीति शेषः। अत्र आम्नायो
वेदः। स तत्र यज्ञविषये स्रुच्यादीनां प्रक्षाल-
न मात्रेण शुद्धिं विदध्यात्। तत्र तदेव
45 न दारुत्व सामान्येन तक्षणादिरतुल्यत्व-
त्वादेवेदं सिद्धमिति चेत्, न श्रुत्युक्त-
स्य लौकिकेन प्रवेशनार्थ उपन्यासः।
दर्व्या यागविषये श्रुत्या प्रक्षालनेन शुद्धि-
रुक्ता, तस्याऽव लौकिके०यापृतायाअपि-

45 दर्वीति सामान्येन श्रुत्युक्तो मा भूत् । स्मृत्यु-
क्तमेव कुर्यादित्येवमर्थ उपन्यासः । अथवा-
आम्नायशब्देन मनुरुच्यते । स यत्र शौ-
चं विदध्यात् तत्र तदेव । यथा यतीनां तु
चतुर्गुणमित्यादि तदुक्तत्वादेवासंदेह इ-
ति चेत् उच्यते । यस्मिन् विषये न किञ्चिदु-
च्यते तत्र स्मृत्यन्तरोक्तं भवति । यत्र लेप-
गंधापकर्षणादि किंचिदुच्यते तत्र स्मृत्यं-
तरेण विकल्पाशंका भवतीति तन्निरासार्थ-
मुक्तम् । यत्र चाम्नायो विदध्यात् इति ।
46 एवं च लेपगंधापकर्षणे कृतेपि द्विगु-
णं ब्रह्मचारिणामित्येवमाद्याम्नायणीयो-
नियमः । इदानीं कृतशौचस्य ब्रह्मचारिणोऽध्य-
यनार्थं गुरूपसदनविधिमाह :——
सू. पाणिना सव्यमुपसंगृह्यानंगुष्ठम-
धीहि भो इत्यामंत्रयेत गुरुम् ॥

(51)

46 पाणिना दक्षिणेन सव्यं पाणिमंगुष्ठवर्जितं गृहीत्वाऽधीहि भो इति प्रार्थयेत। गुरुमध्यापकं, पाणिग्रहणं पादनिवृत्त्यर्थम्। पाणिप्रकरणात् सव्यमपि पाणिमेवेति गम्यते। उपसंग्रहणमंगुली प्रदेश इति गम्यते। अनंगुष्ठमित्युक्तत्वात्। किंच (तत्र चक्षुर्मना:)

सू. तत्र चक्षुर्मना: ॥

तत्र गुरौ चक्षुर्मनसि व्यवस्थापयेदित्यर्थ:। किंच :-

सू. प्राणोपस्पर्शनं दर्भै: ॥

कार्यमिति शेष:। साक्षात्प्राणानां उपस्प-

47 र्शनासंभवात् प्राणा इति चक्षुरादीन्द्रियाणि शीर्षण्यान्युच्यंते। तान्युपस्पृशेद् दर्भैराचमनोक्त क्रमेण। किञ्च :-

सू. प्राणायामास्त्रिय: पंचदशमात्रा: ॥

47 कार्य इति शेषः। प्राणायामः प्राणनिरोधः निरुच्छ्वासेनावस्थानम्। ते त्रयः कार्याः। प्रत्येकं पंच दश मात्राः। मात्रा-नाम मध्यमांगुष्ठ शब्देन लोके प्रसिद्धा। किञ्च —

सू. प्राक्कूलेष्वासनं च ॥

प्रागग्रेषु प्रकारणात् दर्भेष्वासनमुपवेशनम्। कार्यमिति शेषः। चकारात् दर्भपवित्रपाणिश्च। किञ्च —

सू. ओं पूर्वा व्याहृतयः पञ्च सत्यान्ताः॥

उदाहर्तव्या इति शेषः। प्रत्येकं प्रणवपूर्वा व्याहृतयः भूराद्याः तिस्रः पुरुषमध्याः सत्यान्ताः। एवं जाबालि स्मृतौ प्रसिद्धाः। किञ्च —

सू. गुरोः पादोपसंग्रहणं प्रातः॥

48 कार्यमिति शेषः। उपसंग्रहणमिति वक्तव्ये

48 पादग्रहणं स्मृत्यंतरोक्त विध्युपसंग्रहणार्थम्।
यदाह मनुः :—
"व्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः।
सव्येन सव्यस्पृष्टव्यो दक्षिणेन तु दक्षिणः"॥
इति। प्रातरुत्थाय प्रतिदिनं, गुरुग्रहणं
आत्मनो माभूदिति। ततश्चापूर्वं प्राणोपस्प-
र्शनादि आत्मनः। किंच
सू. ब्रह्मानुवचने चाद्यन्तयोः॥
वेदस्यारंभावसानयोः। चकारः पादोपसं-
ग्रहणानुकर्षणार्थः। किंच :—
सू. अनुज्ञात उपविशेत्॥
"प्राङ्मुखो दक्षिणतः शिष्य उदङ्-
-मुखो वा॥
आचार्येणानुज्ञातः शिष्यः तस्य
दक्षिणस्यां दिशि प्राङ्मुख उदङ्मुखो वो
पविशेत्। संभवतो विकल्पः। आसी-

48 तस्याचार्यस्य यथा तदभिमुखो भवति
तथा प्राङ्मुखो उदङ्मुखो वोपविशेदित्य-
49 र्थः। कर्थं तत्रचक्षुष्मन्तः इत्युक्तत्वात् शिष्य
ग्रहणं अन्यस्याप्युपसन्नस्यायमेवविधिरि-
ति ज्ञापनार्थम्। अनुज्ञातो दक्षिणत इति च
नियमार्थः। नाननुज्ञातोपविशेत् नदक्षिणतः।
किञ्च :—

सू. सावित्रीचानुवचनमादितो ब्रह्मण आदाने॥

सावित्री तत्सवितुरित्यादि। चकारादोंकारपूर्वा-
व्याहृतयश्च। तथा च मनुः :—
"ओंकारपूर्विकाः तिस्रो महाव्याहृतयोऽव्ययाः।
त्रिपदा चैव गायत्री विज्ञेया ब्रह्मणो मुखम्" ॥ इति
अनुवचनं अध्येतव्यम्। ब्रह्मणो वेदस्य आदाने
आरंभे, अध्ययनारंभकाल इत्यर्थः। आदितः
पूर्वम्। किञ्च :—

सू. ओंकारोऽन्यत्रापि॥

49 सावित्र्यनुवचनानंतरं ओंकारश्चोदाहर्तव्यः।
अन्यत्रापि अत्र क्रमः प्रातः पादोपसंग्रहणं
50 तदाहूतोपसदनं दर्भेषु। ततः प्राणोप-
स्पर्शनं दर्भैः ततः प्राणायामान् कृत्वा व्या-
हृतिः पञ्चचो कृत्वांजलिनाऽधीहि भो इति गु-
रुमामंत्र्योंकार पूर्विकां व्याहृतीं सावित्रीं चो-
क्त्वा प्रणव पूर्वमधीयीत। प्रथमाध्यय-
नऽवायं विधिः। कुतः सावित्रीचानुवच-
नं ततोऽधीयीतेति वक्तव्ये, आदितोब्रह्म-
णआदान इत्यारंभात्। प्रतिदिवसं त्वों-
कारमेवोक्त्वा, कुतः ओंकोऽन्यत्रेति अत्रा-
प्युक्तत्वात्। अन्यत्र प्रथमाध्ययनादन्य-
त्र। अपिशब्दः प्रथमाध्ययनेऽपि प्रणव-
प्रवेशार्थः। केचिदन्यत्रापीत्यनेनांगादौ-
प्रणवमिच्छंति।

सू॰ अन्तरागमने पुनरुपसदनम्॥

50. यद्यधीयानमध्यापयितारं अन्तरा मध्ये
कश्चित् गच्छेत् ततः पुनरपि पादोपसं-
ग्रहणादि प्रणवान्तो यो विधिः तं कुर्या-
त्। तस्य प्रायश्चित्तार्थं अप्रकरणे
51। प्रायश्चित्तमानन्तर्येणानुष्ठानार्थम्।
मानुषाणां गमनम्। यद्यधीयानम-
ध्यापयितारमंतरा मध्ये कश्चित् गच्छे-
त् ततः पुनरपि पादोपसंग्रहणादि
प्रणवान्तो यो विधिः तं कुर्यात्। त-
स्य प्रायश्चित्तार्थं अप्रकरणे प्रायश्चि-
त्ताभिधानं मात्रं आनन्तर्येणानुष्ठाना
र्थम्। मानुषाणां गमनऽनन्त्। इतरे-
षां ऊर्ध्वमभिधानात्। अत्रानध्याय
श्रवणाभावात् प्रायश्चित्तकरणा-
नन्तरमधीयीत। प्रथमाध्ययनापे
क्षया पुनर्ग्रहणं अन्यत्रोपसदना-

51 भावात् अतोऽन्यत्र प्रायश्चित्तार्थमेवोपस-
दनं कर्तव्यम् । (तथाचापस्तंबः —:) तद-
नन्तरमध्ययनं कर्तव्यम् । तथाचाप-
स्तंबः —: "अधीहि भो इत्युक्त्वाऽधीयीत
ध्यापयेद्वेति" । किञ्च —:

सू. श्वनकुलसर्पमण्डूकमार्जाराणां त्र्यहमु-
पवासो विप्रवासश्च ॥

एते प्रसिद्धाः । श्वादीनां प्रत्येकमंत-
रागमने त्र्यहं भुक्तित्यागः प्रायश्चित्तम् ।
52 एकाहं गुरुणा विरहितस्य चावस्थानम् ।
एवंच गुरुविप्रयोगोपदेशादेवैकाहमनध्या-
यसिद्धेः । कुतो व्येकाहोपलब्धेरितिचे-
त् । विसमासादन्यथा त्र्यहमुपवासवि-
प्रवासौ चेति वक्ष्यति । अतः एकाहऽनध्या-
नध्यायसिद्धेः । तथाच मनुः —:
"पशुमंडूकमार्जारश्वसर्पनकुलेषु च ।

P.T.O.

52 अन्तरागमने विद्यादनध्यायमहर्निशम्॥
इति। एवंचात्रापि विप्रकर्षग्रहणं चतुष्पदां पशूनां अपि उपलक्षणम्। चतुष्पाद्ग्रहणेन गृह्यमाणत्वान्मार्जारस्य पुनरुपन्यासः* प्रायश्चित्तगौरवार्थः। यथाहोशनाः— "मार्जारान्तरागमने घृतं प्राश्य त्र्यहमुपवसेदिति"। चकार उपसदनानुकर्षणार्थः। अतः अध्ययनकाले तत्कृत्वाधीयीत। केचिदुपवासमध्ययनत्यागमाहुः। तद्युक्तमयुक्तमेवेति विचारणीयम्। किञ्च :—
53 सू. प्राणायामं घृतप्राशनं चेतरेषाम्॥
इतरेषां काकादीनां प्राणायामोऽध्ययस्त्यः। बहुवचनश्रवणात् घृतप्राशनं च कायाप्लवनमात्रम्। उपसदनाच्च

53 कर्षणार्थश्चकारः। अतः त्रीन् प्राणाया-
मान् धारयित्वा घृतं प्राश्योपसदनं चकृ-
त्वाधीयीत। अनध्यायाश्रवणात्॥

सू. श्मशानाभ्यध्ययने चैवम्॥

आपस्तंबेन "श्मशाने सर्वतः शम्याप्रासा-
न्नाधीयीत" इत्युक्तम्। तस्य समीपे यद-
ध्ययनं तत् श्मशानाभ्यध्ययनम्।
अभ्युपसर्गः बुद्धिपूर्वसूचनार्थः।
अतोऽबुद्धिपूर्वेऽन्यत्नाय श्चित्तं।
लघुतररूपं द्रष्टव्यम्। तथाचाहोश-
नाः — अनभिसंध्या श्मशानाभ्य-
ध्ययनेऽधीहि भो इत्युक्त्वाऽधीयीते-

54 ति। चकारादनन्तरोक्तस्य प्राणाया-
मादेः सर्वस्य प्राप्तौ सत्यां ऽएवं शब्दे-
नानन्तरोक्तस्यैवोपसदनस्यैव प्राप्तिः
क्रियते तर्ह्येवं शब्दऽएव वक्तव्यः इति चे

54. तन उभयसकाशाद्देवायमर्थो लभ्यते ।
कथं पावं शब्दे च शब्देवा वक्तव्ये
उभयपाठस्य प्रयोजनमान्तरं कल्प
यितुं न्याय्यम् । न ह्येकस्यैवेति ।
अतः उपसदनमेव कर्तव्यम् । तथाच स्मृ
त्यन्तरम् — " श्मशानसमीपेऽ
धीत्य प्राणायामं धारयेत् । प्रा
णोपस्पर्शनमभिवादनं सावित्र्य
नुवचनमित्यादि । द्विरुक्तिरध्या
यपरिसमाप्त्यर्था । उक्तमिदं स-
र्वं प्रायश्चित्तम् । शिष्यस्यैव तद
र्थत्वादध्ययनप्रवृत्तेः । किञ्च स-
र्वत्र सोपसदनमेव प्रायश्चित्तम् ।
55 उपसदनं त्वभिवादनादि तदभिवाद
नमाचार्यस्य न संभवति ॥
ओं गौतमीये भाष्ये मस्करिकृते प्र

55 प्रथमोऽध्यायः

ओम्॥ द्विजातीनामुक्तमुपनयनम्। तेषामुपनयनात्प्रागपि कैश्चिद्वर्णधर्मैरधिकारः इष्यत इति तदर्थमाह —:

सू. प्रागुपनयनात्कामचारः कामवादः कामभक्षः॥

ननु च प्रागेवोपनयनादेतद्वक्तव्यम्। तत्र प्रागुपनयनादित्येतन्न वक्तव्यं भवति। अत्रोच्यते सत्यमेव। किं तूपनयनस्याद्यावभिधाने प्रयोजनमुक्तं। नानेन विधीयते। अर्थप्राप्तत्वान्न च नियम्यते।

56 अवश्य कर्तव्याभावादुपनयनादिर्नियम इति च वक्ष्यमाणत्वात्। पाक्षिकत्वाभावाच्च। नापि परिसंख्या व्यावर्त्याभावात्। न ह्यस्याकामचारित्वादि प्राप्तम्। अतः-

56 इदं सूत्रं अनुवादकम् । प्रायश्चित्तराज-
दण्डाभावज्ञापनार्थम् । तयोः सामान्येनो
पदिष्टत्वात् । ननु च राजदण्डप्रायश्चित्ता
नि विहिताकरणे प्रतिषिद्धसेवने
वा विधीयन्ते । नचास्य विधिप्रतिषेधा-
भ्यामधिकारः । नचास्य विधिप्रतिषेधो वा
श्रूयते इति । न ह्यस्याहुतत्वादि विधायि
ष्यते । प्रतिषेधिष्यते वा यद्यनतिक्रम उभ
यं भवतीति पित्रादीनामुपदेशात् । अतः
इदं सूत्रं अनर्थकमिति । अत्रोच्यते ।
यद्विहिताकरणे प्रतिषिद्धसेवने वा
57 प्रायश्चित्तमुक्तम् राजदण्डो वा तद-
स्यापि प्राप्नोत्येव । यद्यप्यस्यैवो-
द्देशेन विधिः प्रतिषेधो वा न श्रूयते ।
तथापि यत्तु सामान्येनोक्तमहिंसा सत्यम-
स्तेयमित्यादि तद्वर्णधर्मत्वादस्यापि प्रा-

57 प्रोति। तद्व्यतिक्रमे राजदण्डप्रायश्चित्ताव-
पि भवतः। अतः तन्निवृत्त्यर्थं इदं सूत्रं
आरब्धम्। उपनयनादिनियम इत्यनेन सू-
त्रेणोपनयनादारभ्य यो विधिरुच्यते
तद्व्यतिक्रमे प्रायश्चित्तं नान्यव्यति-
क्रम इति वक्ष्यमाणत्वात् नैवास्यापि व-
र्णधर्मातिक्रमे प्रायश्चित्ताभावो नानु-
मन्यते। राजदण्डाभावोऽपि। तथापि नि-
त्योपनतौ कालातीतस्य भिन्नबुद्धेः शा-
58 क्ये एकादश वर्षादूर्ध्वं षोडशवर्षात् प्रा-
क् प्रायश्चित्तार्थं प्रवेशनार्थम्। तत्र
अर्वाक् पंचवर्षादूर्ध्वं पित्रादीनां (पित्रा-
दीनां) प्रायश्चित्त प्रवेशार्थम्। तत् अर्वा-
क् अपराधाभाव ज्ञापनार्थं न सूत्रमा-
रब्धम्। तथाच भार्गवीयम् —
"अशीतिर्यस्य वर्षाणि बालो वाप्यून षोडश।

(64)

58. प्रायश्चित्तं नार्हति स्त्रियो व्याधितएव च॥
ऊनैकादशवर्षस्य पंचवर्षात्परस्य च।
चरेद्गुरुः सुहृच्चैव प्रायश्चित्तं विशुद्धये॥
अतो बालतरस्याथ नापराधोऽस्ति कुत्रचित्।
राजदण्डश्च तस्यातः प्रायश्चित्तं न विद्यते॥ नेष्यते
इति। एवं च उपनयनात्प्राक् यद्यपि सा-
मान्येन कामचारित्वादुक्तं तथापि पंच-
वर्षात्प्रागेवात्यन्त कामचारिता। ततऊर्ध्वं
वर्णधर्मेषु नियोक्तव्यं पित्रादिभिः। तद्
59 व्यतिक्रमे बालस्य सतः पित्रादीनां प्राय-
श्चित्त श्रवणात् अलमति प्रसंगेन। इ-
दानीं सूत्रं विव्रियते उपनयनात्प्राक्
कामचारः इच्छागतिः। तस्माच्चण्डाल-
स्पर्शनादौ प्रोक्षणमात्रं वक्ष्यति। अ-
न्यत्राबोक्षणे भयः इति। तदपि पंच-
वर्षात्प्रागेवोक्तम्। ततऊर्ध्वं चण्डाल-

58 स्पर्शे स्नापयितव्यम् ।ऽकादशवर्षादूर्ध्वं
स्वयमेवस्नायात् ।ऽवं सर्वत्र कामवा-
दोऽश्लीलाद्यपिवदति ॥ कामभक्षः पर्यु-
षिताद्यपि भक्षयति । पंच वर्षादूर्ध्वं वर्णधर्म
विरोधीनि कारयितव्यानि । उपनयनात्प्रागि-
त्यापत्कल्पोपनयनस्य संग्रहणम् । कु-
तः ब्रह्मचारीति लिंगान्नित्यकालात्प्राक्ब्र-
ह्मचर्यस्खलनासंभवादेव सिद्धत्वात् । ब्र-
60 ह्मचर्यरक्षणोपदेशोऽनर्थकस्यादिति का-
मचारस्योदाहरणम् । स्वयमेव वक्ष्यति
"यथोपपादितमूत्रपुरीषो भवतीति" । अ-
तः अत्यन्तबालावस्थायामपि ब्रह्महत्या-
देर्यत्नतो निवारयितव्यः । कामवादेऽभि-
शंसनादौ कामभक्षणे सुरापानादौ चात्य-
न्तबालावस्थायामपि यत्नतो निवारयि-
तव्यः । कामचार इत्यनेनैव सिद्धे वा-

60 दभक्षणयोः पुनरुपन्यासात् उपनयना
दिति वक्तव्ये प्राक्ग्रहणं नियमार्थम्।
उपनयनात्प्रागेव कामचारित्वादीनीत्य-
सति नियमे उत्तरेषां चैतद विरोधीत्यने
नाहुतशिष्टभक्षणवर्जनादि यतीनामपि प्रा-
प्नोति इति। इदानीं कामभक्षणस्यापवा
दमाह :—

सू. अहुतात् ॥

हुतं हुतशिष्टं चरुपुरोडाशादि। न
61 वैश्वदेवं तस्य सर्वार्थत्वात्। तथाहाप
स्तंबः सर्वान् वैश्वदेवभागिनः कुर्युरिति।
अहुतमश्नीति अहुतात् कार्य इति शेषः। अ-
र्थप्राप्तस्य प्रतिषेधोऽयं पित्रादीनामुप
देशो बालस्यापि ज्ञानाभावादेकादशवर्षा-
दूर्ध्वं तस्यैवेत्युक्तम्।

सू. ब्रह्मचारी ॥

61. ब्रह्मचर्यरक्षणंच कर्तव्यम् । इदानीं कामचा-
रित्वस्य उदाहरणमाह —:
सू. यथोपपादमूत्रपुरीषोभवति ॥
यथा अपरिवेष्टितशिरस्कः कृष्टादावपि
मूत्रपुरीषौ उत्पद्येते तिष्ठतोवा । तथा
तत्रैव कुर्यादित्यर्थः । किञ्च —
सू. नास्याचमनकल्पो विद्यते ॥
पञ्चवर्षादूर्ध्वं अस्यैकादशवर्षात्प्राक्
आचमनकल्पः । आचमनविधिर्नवि-
द्यते । कल्प प्रतिषेधादाचमनमात्रम-
62 स्तीति इति गम्यते । तच्च शूद्रेणहि सम-
स्तावद्यावद्वेदेन जायत इति स्मृत्यन्तरे
शूद्रेण तुल्यधर्मश्रवणात् आचमनं
शूद्रवद्द्रष्टव्यम् । ऊनैकादशवर्षस्ये-
ति कुतः अस्येत्यारम्भात् पंचवर्षात्प्रा-
ग्दोषाभावश्रवणात् एकादशवर्षादू-

62 एवं वर्णधर्मैरधिकृतत्वात् जैका दश वर्षा-
दूर्ध्वमाचमनकल्पोपि तस्माद्विद्यत एवे-
ति गम्यते। इदानीमतिबालस्याह—:
सू. अन्यत्रापमार्जनप्रधावनावोक्षणेभ्यः॥
अस्य न विद्यत इति वर्तते अस्योन-
पंचवर्षीय वर्षस्यापमार्जनादिभ्योऽ
न्यत्र न किंचिदपि शौचप्रकारो विद्यत
इत्यर्थः। अपमार्जनं भुक्तोच्छिष्टस्य
सोदकेनपाणिना तदुच्छिष्टापनयनम्।
प्रधावनं प्रक्षालनमुच्चारादौ, अवो
63 क्षणं चण्डालादिस्पर्शने प्रोक्षणं प्राप्त्य-
भावान्नास्याचमनकल्पो विद्यते"।
"अन्यत्र अपमार्जनप्रधावनावोक्ष-
णेभ्य" इतिच प्रतिषेधद्वयस्यानारंभः
प्राप्नोतीति चेत् नैष दोषः नास्याचमनक-
ल्पो विद्यते इत्यनेन ऊनषोडशवर्षस्या-

63 चमन कल्पो विधीयते । ऊनैकादशवर्षस्य
प्रतिषेध द्वारेणान्यत्र (बौक्षण) [प्रमार्जन] प्रधावनावो-
क्षोभ्य: इत्यनेनाप्यून पंचवर्षस्यापमा-
र्जनादि विधीयते ऽन्यशौचप्रतिषेध द्वा-
रेणेति । किञ्च —:

सू. न तदुपस्पर्शनादशौचम् ॥

तद्ग्रहणेनाकृतशौचो गृह्यते । अकृ-
तस्य शौचस्पर्शनात् तेन वा स्पृष्ट-
स्याशुचित्वं न भवति । अतिबालवि-
षयमेवैतत् । तर्ह्यस्य शौचविधा-
64 नमनर्थकम् । उक्त: द्वयमेव प्रयोजन
शौचविधानस्य दृश्यते । इतरस्पर्श-
योग्यार्थमनुष्ठानार्थं । अस्य त्वितरस्प-
र्शयोग्यार्थं न भवति । अकृतशौच-
स्यापि स्पर्शयोग्यत्वात् न तदुपस्प-
र्शनादशौचमिति । अनेनानुष्ठानार्थं

64 चनभवति। उपस्यानुष्ठानाभावादिति-
नानर्थकम्। रक्षणार्थत्वाच्छौचविधान-
स्येति। तथाच स्मृत्यन्तरम् "बालमापञ्च-
माद्वर्षाद्रक्षणार्थं शौचं कुर्यादिति। अकृत
शौचस्यास्यैव स्पर्शने दोषाभावज्ञापनार्थ
उपशब्द प्रयोगः। ऽन्येषामुच्छिष्ट
कृत मूत्रपुरीषाणां स्पर्शने आचमनं कर्तव्य-
म्। तत्स्पर्शनेन दोषः। शवरस्वृष्टि-
सूत्रे परिगणितत्वात्। तथाच स्मृ-
त्यन्तरम्। :-
65 अशुचिं स्पृशते यस्तु एकएव सदु
ष्यति। तं दृष्ट्वा ऽन्योन दुष्येत सर्व-
द्रव्येष्वयं विधिरिति॥

65. चण्डालस्पर्शनेतु शवस्पृष्टि सूत्रमेव वक्ष्यति।
तमुपस्पृशेदिति वक्तव्येन तदुपस्पर्शनादशौ-
चमिति गुरुः सूत्रकरणं प्रागुपनयनादित्य-
त्र नियमस्यापि बाधनार्थम्। नतश्चोपनयना-
दूर्ध्वमप्युच्छिष्ट कृतमूत्रपुरीषाणां स्पर्शने आ-
चमनं कर्तव्यम्। किञ्च—:

सू. न ह्येवैनमग्निहवनबलिहरणयोर्नियु-
ञ्ज्यात्॥

एनमिति सर्वस्यानुपनीतस्योपसंग्रहणार्थम्।
अग्नौ यत्क्रियते ऽग्निहोत्रहोमादि तदग्निहव-
नं वैश्वदेवोत्तरं काले दिग्देवताभ्यो यो बलि-
र्दीयते तद्बलिहरणम्। तु शब्दः विशेष-
वाची। अष्टकादौ ब्राह्मण पादप्रक्षालने भावेपि (दाव)
(हवन)
न नियुञ्ज्यात्। विशेषतो ऽग्निहरण बलिह-
रणयोरिति कामचारित्वाद्यत्र कुत्रचिन्मं-
66 त्रमधीत्याग्निहोत्रादौ यदि स्वयमेव प्रवर्ते-

66. त। तदा तं दृष्ट्वानुमन्तापि न स्यात् इत्येव-
मर्थमेवं शब्दस्योपदेशः। उपनीतस्यनि-
योगार्थमिदं वचनम्। प्राप्त्यभावात् प्र-
तिषेधस्य। एवं च "विद्वान् अग्निहोत्रं जु-
हुयात्" इति यद्यपि श्रुत्या बहुश्रुतस्यैवा-
धिकारः। तथापि तदसंभवेऽल्पविद्यम-
प्युपनीतं नियुंज्यात्। तथा च मनुः—:
"नैव कन्या न युवति र्नाल्पविद्यो न बालि-
शः होता स्यादग्निहोत्रस्य नार्तो नासंस्कृत-
स्तथा"॥ इति ॥
तत्राप्यल्पविद्य प्रतिषेधादेव असं-
स्कृत प्रतिषेधे सिद्धे नासंस्कृत इति प्र-
तिषेधोऽन्यस्य विदुषोऽभावेऽल्पविद्य-
स्यापि संस्कृतस्याभ्यनुज्ञानार्थमिति
प्रतिपादितम्। प्रागुपनयनादित्यादि
यदुक्तं तत्स्त्रीणामप्याविवाहाद् द्रष्टव्यम्।

66 कुतः स्मृत्यन्तरदर्शनात्। "वैवाहिको विधि
67 स्त्रीणामौपनायनिकस्मृतं" इति। एवं च अ-
ग्निहवनबलिहरणयोः कन्यायाऽपि नियोग-
प्रतिषेधासिद्धः। अतः विवाहोत्तरकालनियो-
गः कर्तव्यः। तत्र न स्त्री जुहुयादिति। श्रुत्या
अग्निहोत्रे प्रतिषिद्धत्वात् औपासनादौ द्रष्ट
व्यः। तथा च स्मृत्यन्तरम् :—
"पत्न्यौपासनं जुहुयाद्वैश्वदेवं चेत्यादि नयु
वनिरिति"। प्रतिषेधस्य परदारविषयत्वाददो
षः। किंच—:

सू॰ न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिन-
नयात् ॥

एनमित्यनुवर्तते। ब्रह्मशब्देन वेदा उच्य
न्ते। तस्मादेनं नाध्यापयेत्। उपनीतस्य
उपाकरणादूर्ध्वं अधीयीत छन्दांसी—
त्येन वेदाध्ययनविधानात् अनुपनी

67. तस्य प्रतिषेधेसिद्धे वेदस्य पुनः प्रतिषेधः वे-
दएव नाध्यापयितव्यः इतिनियमार्थः। तत-
68 श्च्छांगाध्यापन दोषः कामचारित्वात् स्वयमेव येनके-
नचित् प्रकारेण श्रुतं मंत्रमपि नोच्चारयेत्।
कुतः नाध्यापयेदितिवक्तव्ये नाभिव्याहार-
येदित्यारंभात् अन्यत्रस्वधानिनयनात् स्व-
धानिनयनं वचनं वर्जयित्वा अमुष्मै स्व-
धा इत्युक्त्वा यत्पिण्डोदकादि प्रेतेभ्यो-
दीयते तत्स्वधानिनयनं तदपि प्रेतकर्मणः
समस्तस्याप्युपलक्षणम्। तथाचवसिष्ठः
"अन्यत्रोदककर्मस्वधापितृसंयुक्तेभ्य" इति।
ऽावंच पुत्रेऽनुपनीतेपिसपिण्डादिभिः प्रे-
तक्रियानकर्तव्या। शास्त्रचोदनानर्थक्य
प्रसंगोमाभूदिति। अनुपनीतस्योक्त्वा
इदानीमुपनीतस्याह —:
सू. उपनयनादिर्नियमः॥

68 उपनयनादारभ्य योविधिरुक्तः स नियमसंज्ञः

69 प्राक्चास्याकरणे प्रायश्चित्तं न पूर्वस्य अतो
त्वारभ्य नियमो व्रतधारणं यो वक्ष्यते अग्नीं-
धनादिः स नियमः उपनयनादिः कर्तव्यः।

सू. उक्तं ब्रह्मचर्यम् ॥

उक्तग्रहणात् प्रागप्युपनयनान्नियम एवैतदिति।
ततश्च तत्स्खलनेऽनुपनीतस्याप्यवकीर्णिप्रा-
यश्चित्ते नैवाधिकारः। तथा च स्मृत्यन्तरम्:
"विप्लुतमवकीर्णिव्रतेन शुद्धमुपनयेत्, अन-
सप्तदशावर्षमतऊर्ध्वं व्रात्यावकीर्णिप्रायश्चि-
त्ताभ्यामिति" ब्रह्मचारिणस्तु स्त्रीप्रेक्षणादि प्र-
तिषेधादर्थसिद्धमिति चेत् न पश्वादिषु सं-
भवात्। किञ्च

सू- अग्नींधनभैक्षचरणे ॥

अग्नीन्धनं समिद्धोमः। इतरः प्रसिद्धः।
ते प्रतिदिनं कर्तव्ये सह निर्देशोऽनन्त-

69 -र्थानुष्ठानार्थः। तथाच मनुः :—

70 "प्रतिगृह्येप्सितं दण्डं उपस्थाय च भास्करम्।
प्रदक्षिणं परीत्याग्निं चरेद् भैक्षं यथाविधि॥"
इति॥ तत्रापि प्रदक्षिणं परीत्याग्निमित्य-
नेन समिद्धोम उक्त इत्युक्तं सायं प्रातरन्न-
न्नमभिपूजितमनिन्दन् भुञ्जीत द्विरिति।
द्विर्भोजनश्रवणात् सायं प्रातरग्नीन्धन-
मपि द्रष्टव्यम्। तथाच स्मृत्यन्तरम् :
"दूरादाहृत्य समिधः सन्निदध्याद्विहायसि।
सायं प्रातश्च जुहुयात् ताभिरग्निमतन्द्रितः" इति
केचित् समिद्धोमं प्रातरेवेच्छन्ति। किंच

स्तू. सत्यवचनम्॥

सर्वत्र कर्तव्यक्रियाऽध्याहर्तव्या। वचनग्र-
हणमसन्देहार्थम्। सत्यं अपामेवोपस्पर्शनमि-
त्येवं संदेहः स्यादिति। प्रथमग्रहणं आतुरस्या-
स्यापि अनुष्ठानार्थम्। ततश्चापूर्वयोः

P.T.O

P.T.O.

70 तत्र। तथाच मनुः—

71 "अकृत्वा भैक्षचरणमसमिध्य च पावकम्।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्॥

इति। किञ्च

सू. अपामुपस्पर्शनम्॥

अत्र ग्रहणं भस्मादीनामप्युपलक्षणम्।
तथाच भृगुः—

"स्नानानि पंच पुण्यानि कीर्तितानि मनीषिभिः।
आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च॥

इति। आग्नेयं भस्मना स्नानं अवगाह्य तु वारुणम्।
आपोहिष्ठेति च ब्राह्मं वायव्यं गोरजस्मृतम्॥
यस्तु स्यात् सातपं वर्षं दिव्यं तत्स्नानमुच्यते।
अशक्तो वारुणस्नानं आग्नेयादीन् समाचरेत्॥"

इति। स्नानमिति वक्तव्ये ऽवमभिधानं स्मृत्यन्तरोक्तस्य स्नानविधेरुपसंग्रहार्थम्। ऽवं च स्मृत्यंतरोक्तं द्रष्टव्यम्। उपशब्द अविना-

P.T.O.

71 त जलवर्जनार्थः। अग्नींधनभैक्षचरणयोः प्रथ-
72 ग्ग्रहणं भुक्तस्य नित्यस्नान प्रतिषेधार्थम्। न नै-
मित्तिकस्य। अतः नैमित्तिकं कर्तव्यम्। सत्यव-
चनस्य प्रथग्ग्रहणं आतुरस्य नैमित्तिकस्यापि
प्रतिषेधार्थम्। उपशब्दोऽर्धरात्र वर्जनार्थः इति
केचिद्वदंति। यदुक्तमत्र तत्सर्वं मनुनाप्युक्तम्—;
"न स्नानमाचरेत् भुक्त्वा नातुरो न महानिशि।
न वासोभिः सहाजस्रं नाऽविज्ञाते जलाशये॥ इति

सू- ऽाके गोदानादि॥

गोदानं नाम छन्दोगानां द्वितीयं व्रतम्। अन्ये-
षां षोडशे धारयितव्यम्। तेषामपि षोडशे गो-
दान धारणं केचिदिच्छंति। तत आरभ्य ऽाके-
स्नानमिच्छन्ति। गोदानात्प्राङ्नित्यस्नानं न कु-
र्यात्। नैमित्तिकमेव कर्तव्यम्। तत ऊर्ध्वं नित्य-
स्नानमपीति ऽाके आचार्या इच्छंति। ऽाकइति
वचनात् न तु गौतमः॥

72 सू- बहिस्संध्यत्वंच ॥

73 प्रकेग्रहणानुकर्षणार्थश्चकारः। बहिः ग्राम।
तः। संध्यत्वं संध्योपासनमप्येक इच्छन्ति।
न तु गौतमः। एतदुक्तं भवति ग्रामाद्बहिरेव
संध्योपासनं कर्तव्यमिति केषांचिन्मतम्। ब-
हिरभ्यन्तरे वा यत्र कुत्रापि शुचौ देशे कर्तव्य-
मिति गौतममतम्। इदानीं प्रसंगात् संध्योपा-
सनं कदा कथंच कर्तव्यमिति अत आहः—

सू. तिष्ठेत्पूर्वां (आसीतोत्तरां) संध्यां समा-
सीनोत्तरां सज्योतिष्या ज्योतिषो दर्शना-
द्वाग्यतः ॥

वाग्यत इति स्थानासनयोः प्रत्येकमभिसंबध्य
ते। यस्यामादित्य उदेति सा पूर्वा संध्या। पूर्वसूत्र
खण्डात् संध्या शब्दोऽनुवर्तते। यस्यामा
दित्योऽस्तमेति सा उत्तरा संध्या। स्थानास
ने अत्र गुणभूते। उपासनमत्र प्रधानकर्म। अतो-

P.T.O

यद्यपि वितिष्ठेदित्युक्तम्। तथापि तिष्ठन्नुपासी-
त आसीन उपासीतेति च द्रष्टव्यम्। तथाच
मनुः —

"पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति।
पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम्॥"

इति। सज्योतिः कालः पूर्वसंध्यायां नक्षत्रज्यो-
तिः कालः नक्षत्रज्योतिषा सह वर्तते। स
ज्योतिः। तस्मिन् सज्योतिषि काले आरंभः
कर्तव्यः। उत्तरस्यां तथाऽऽदित्यज्योतिषि।
ततः आज्योतिषोदर्शनात्। पूर्वस्यामादि-
त्यदर्शनात्। उत्तरस्यां नक्षत्रदर्शनात्।
आज्योतिष इति वक्तव्ये दर्शनग्रहणं
सम्यगर्थम्। तथाच मनुः —

"पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमार्कद-
र्शनात्। पश्चिमां तु समासीत सम्यगृक्ष-
विभावनादिति॥

74 तस्मिन्नुपरमः कर्तव्यः इत्यर्थम्। अत्रऽहनि
75 विध्यर्थः। दीर्घसंध्यत्वस्याभीष्टत्वात्। तथा-
च मनुः—

"ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः।
प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव वा॥ इति

ननु चोत्तरेषां चैतद्विरोधीत्यनेन स्नातकस्या-
ग्निमतऽान प्राप्यते। तस्य अग्निहवनेना-
स्य कालस्य विरुद्धत्वात्। उच्यते यस्मा-
वत् स्मार्थः सायंप्रातर्होमः तत्र कालभेदा-
विरोधऽाव। कथं सायंशब्देन रात्रिरुच्यते।
प्रातश्शब्देन च दिवसः। उदितहोमादिवाक्य-
वदत्र तथाविधस्याभावात् संध्योपसनान-
न्तरमेव होमस्यानुप्रवेशस्यादिति। अथा-
पि केषांचित्सांध्याकालऽाव होमउक्तः।
तस्यापि दीर्घसंध्यत्वस्याभीष्टत्वात् होमस्यान-
न्तरमपि संध्योपासनस्यावकाशोऽस्तीति।

75 ऽवं श्रौते अनुदित होमादिविषये प्यविरोधऽ-
76 वेति। तिष्ठन् पूर्वां संध्यां आसीन उत्तरां संध्यां
उपासीतेति वक्तव्ये ऽवमभिधानं स्मृ-
त्यन्तरोक्तस्यापि विधेर्ग्रहणार्थम्। तथा-
चाहोशनाः—: सायं प्रातरुदकं गत्वा पू-
ताभूत्वा पवित्रेण मार्जयित्वाऽपोहिष्ठीया-
भिः ~~त्रिभि~~ तिसृभिः अब्लिंगाभिः वामदेव्येन-
ततः शुचौ देशे दर्भेष्वासीनः दर्भान्धार-
यमाणः प्रत्यङ्मुखो वाग्यत आत्मानं ध्या-
त्वा ततस्स रेचक पूरक कुंभकादीं स्त्रीन्-
प्राणायामान् कृत्वा धारयित्वा ऋषिच्छंदो दे-
वताध्यान पूर्वकं भूर्भुवस्सुवरित्यादिकां
सावित्रीं सहस्रकृत्व आवर्तयेत्। शत-
कृत्वो वा दशावरमथ तिष्ठन् सूर्यं हूणा-
न् प्रत्यक् दक्षिणोदीच्यासु क्रमेणानम-
स्कृत्वाऽग्निं त्रिः प्रदक्षिणं कृत्वा पुनर-

76/77 पि प्रतीचीन्नमस्कुर्यात्। एवं प्राङ्मुखः
प्रातः तिष्ठन्नमित्रादित्यो नमस्कुर्यादिति।

स्. नादित्यमीक्षेत॥

यदि संध्याकालयोरेवायं प्रतिषेधः स्यात् तदानी-
मेकमेव क्रियेत। तिष्ठेत्पूर्वां संध्यां समासीतोत्तरां-
सज्योतिषा ज्योतिषो दर्शनाद्वागयतः नादित्यमी-
क्षेतेति। यदि सर्वदा स्यात्तदानीं "वर्जयेन्मधु-
मांसं" इत्यादि द्वावादित्येक्षणमपि पठंति। उभया-
करणादन्याभिप्रायेणेदं उक्तमिति ज्ञातुं शक्यते।
अभिप्रायश्च स्मृत्यंतरोक्तो द्रष्टव्यः। यदाहोशा-
नाः— "नेक्षेतादित्यं संध्यागतं मध्यदिनगतं
राहुग्रस्तं वारिस्थितमिति"॥

स्. वर्जयेन्मधुमांसगंधमाल्यदिवास्वप्ना-
ञ्जनाभ्यंजनयानोपानच्छत्रकामक्रोधलो-
भमोहवादवादनस्नानदन्तधावनहर्ष-
नृत्तगीतपरिवादभयानि॥

78· वर्जयेदिति प्रत्येकं संबध्यते। मधु माक्षिकं,
तस्याबुद्धिपूर्वेन दोषः। अकामोपपन्नं मधु वा
वाजसनेयके न दुष्यतीति स्मृत्यन्तर दर्शनात्।
मांसं गृहस्थस्याप्रतिषिद्धमपि तत्राप्यातुरस्यौ
षधार्थम्। गुरोरुच्छिष्टस्य भक्षणे न दोषः।
सचेद् व्याधितः कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयादिति स्मृत्यंतर दर्शनात्।
एवं चानातुरस्य श्राद्धेपि वर्जनीयम्।
तथा च मनुः—:
व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् ॥
काममभ्यर्थितोऽश्नीयाद् व्रतमस्यैन लुप्यते ॥
इति। गंधं चंदनादि। तस्यापि सुखार्थस्य प्रतिषेधः। न देवतावशिष्टस्य। देवताशिष्टमेव गृह्णीयात् ब्रह्मचारीति स्मृत्यन्तर दर्शनात्।
79 माला याऽपि तथैव। दिवास्वप्नो, दिवानिद्रासेवनं तदप्यातुरस्य न दोषः। अंजनमक्ष्णोः

79 अत्राप्युपभोगार्थस्य प्रतिषेधः। नौबद्धार्थ-
स्य अभ्यंजनम्। तैलेन शास्त्राभ्यंगे केचिद्गं-
धतैलस्यायं प्रतिषेध इति वदन्ति। तस्मिन् पक्षे इतरस्य न दोषः अस्मिन्
गंध प्रतिषेधेनैवायं प्रतिषे-
धस्सिद्ध इति चेत् न विशेषत एव लोकप्रसिद्धे-
र्न गंधमात्रस्य ग्रहणं भवतीति। यानं शिबिका-
दि। तदप्यातुरस्यैव। उपानच्छत्रौ प्रसि-
द्धौ (प्रसिद्धौ) मयूरपत्रकृतस्यादोषः।
कामः स्त्रीगतो भोगाभिलाषः। क्रोधः
परस्यानिष्टचिन्तनम्। लोभोऽन्यायेन प-
रद्रव्यादित्सा। मोहोऽज्ञानम्। मोहे वादो-
बहुप्रलापः। वादनं भेरीताडनादि। स्नानं
80 शिरस्नानादि। नोपभोगः विहितत्वादितरस्य।
दंतधावनं प्रसिद्धम्। ताम्बूलेनापि तन्नकर्त-
व्यम्। पंकदन्तो भवेदिति स्मृत्यंतरदर्शनात्।
हर्षः प्रीतिः। एवंच तद्धेतूनां नाटकादीनां-

४०। अपि प्रेक्षणस्याविप्रतिषेधः सिद्धः। तद्दर्शने -
प्रीत्युत्पत्तेः निवारयितुमशक्यत्वात्। नृत्तं गात्र -
विक्षेपः। गीतं कामरसबंधस्य वाक्याभिधा -
नम्। परिवादः परदोषसंकीर्तनम्। भयं
परभीषणम्। इतरस्य परिहर्तुमशक्यत्वा -
त्। किंच —

सू. गुरुदर्शने कंठप्रावरणसक्थिकापाश्रयण -
पादप्रसारणानि॥

गुरुः आचार्यादिः। कुतः यद्याचार्यस्यैव ग्र -
हणं तदानीं आचार्यदर्शन इति वक्तव्ये गुरु -
ग्रहणं सर्वेषां गुरुस्थानीयानां अप्युपलक्षणा -
४१। र्थम्। तथाच स्मृत्यन्तरे "मान्यानां तु सर्वेषां
सकाशे संकुचितस्तिष्ठेदिति"। कंठप्रावरणं
कंठे वस्त्रविक्षेपः। अवसक्थिकं जान्वोः
परिकरबंधः शेषं प्रसिद्धम्। परवशादेता -
नि क्रियंत इति प्रतिषेधः। किंच —:

81 सू. निष्ठीवितहसितविजृंभितावस्फोटनानि॥

गुरुसमीपे ऽन्यसमीपे वा वर्जनार्थं प्रथगभि-
धानम्। निष्ठीवनं प्रसिद्धम्। हसनं परवशम-
पियत्नतो निवारयितव्यम्। तथा चापस्तंबः
न स्मयेत यदि स्मयेतापि गृह्य स्मयेतेति ब्राह्मणं
इति। विजृम्भणं प्रसिद्धम्। अवस्फोटनं सशब्द-
स्संधिप्रमोक्षः। किंच —:

सू: स्त्रीप्रेक्षणालंबने मैथुनशं-
कायाम्॥

वर्जयेदितिच वर्तते। प्रेक्षणं प्रकर्षेणावयव-
निरूपणम्। रूपमात्रदर्शनंतु निमित्ततो वा-
रयितुमशक्यत्वात्। आलंबनं स्पर्शनम्।
82 स्पर्शन इति वक्तव्ये ऽवमभिधानं अभि-
संधिस्पर्शनवर्जनार्थम्। ऽवं च प्रमादा-
न्नदोषः। अभिसंध्यान्धकारादावपि स्प-
र्शनं न कर्तव्यं ऽतदुभयं स्त्रियैन कुर्यात्।

८२ यस्यां मैथुनशंका अन्येषां भवति तस्यामेव
नान्यस्याम्।

सू॰ द्यूतं हीनसेवामदत्तादानं हिंसाम्॥

वर्जयेदिति। द्यूतं धूनमक्षादिभिः। हीनसेवा-
मूर्ख मूत्रपुरीषापमार्जनादिसेवा। एवं च इतरव्यन-
नुरूपासेवा न कर्तव्या। अदत्तादानं अननुज्ञा-
तस्यो सिस्तृष्टस्यापि ग्रहणम्। हिंसा प्राणिव-
धः प्राणिपीडावापि समासान्नकारयेन्नानु-
मन्येतापि। किंच—

सू॰ आचार्यतत्पुत्रस्त्रीदीक्षितनामानि॥

वर्जयेदिति प्रस्तुतम्। आचार्यस्य तत्पुत्रस्य
च तद्भार्यायाश्च दीक्षितस्य च संज्ञां पित्रादि-
८३ कृतान्नोच्चारयेत्। किंच—

सू॰ शुक्ता वाचः॥

शुक्ता निष्ठुराः परस्योद्वेगकारिण्यः सर्वेषां
वर्जयेत्। किंच:—

83 सू. मद्यं नित्यं ब्राह्मणः ॥

वर्जयेदिति। प्रकृतं। गौडं मधुपिष्टकृतं अन्य-
दपि यन्मदकरं तत्सर्वं ब्राह्मणः नित्यं प्रागुप-
नयनादूर्ध्वं च ब्रह्मचर्याद्वर्जयेत्। एवं च क्षत्रि-
यवैश्ययोः प्रागुपनयनादूर्ध्वं च ब्रह्मचर्यात्
पैष्टि वर्जितायाः अप्रतिषेधः। स्मृत्यन्तर द-
र्शनात्। तथा च मनुः—

"गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा।
यथैवैका न पातव्या तथा सर्वा द्विजोत्तमैः" ॥
इति। इदानीं कर्तव्यता प्रतिपादनार्थमाह:—

सू. अध शय्यासनी पूर्वोत्थायी जघन्यसं-
वेशी ॥

गुर्वपेक्षया नीचे शय्यासने कुर्यात्। तस्यै-
84 व च पूर्वोत्थायी पश्चाच्च संवेशी। यथाह
मनुः—

"नीचं शय्यासनं चास्य नित्यं स्याद्गुरुसंनिधौ।

84. उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत्" इति।

~~इति~~ सू. (वाग्बाहूदरसंयतस्यादिति शेषः॥)

सू. वाग्बाहूदरसंयतः॥

स्यादिति शेषः। वाक् संयतः निबद्धप्रलापः। परतः बाहुसंयतः लोष्ठमर्दनादिवर्जितः। उदरसंयतः हितमितभुक्। "वाग्बाहूदरकर्म संयत इति केचित् पठन्ति। तद्बाहुसंयतेनाऽर्थसिद्धत्वात् युक्तमयुक्तं वेति विचारणीयम्। किञ्च—,

सू. नामगोत्रे गुरोः समानतो निर्दिशेत्॥

गुरुग्रहणमाचार्यादीनामप्युपलक्षणम्। समानतः सम्यग्मानतः। प्रह्वः संध्यात्वा नमस्कारं कृत्वेत्यर्थः। ऽवंच तथाप्याचार्य तत्पुत्रेत्यस्मिन् आचार्यग्रहणं गुर्वा-

85 दीनामप्युपलक्षणम्। तेषामपि नामधेयोच्चारणस्य प्रतिषिद्धत्वात्। तथाच स्मृत्यन्त-

P.T.O

P.T.O

85 रम् —

"आचार्यं चैव तत्पुत्रं तद्भार्यां दीक्षितं गुरुम् ।
पितरंच पितृव्यंच मातरं मातुलं तथा ॥
हितैषिणंच विद्वांसं श्वशुरं पतिमेव च ।
न ब्रूयान्नामतो विद्वान् मातुश्च भगिनीं तथा ॥
यदि ब्रूयात्तु तं ध्यात्वा नमस्कृत्वा वदेत्तथा ।
इति ।

सू॰ अर्चितो श्रेयसि चैवम् ॥

अर्चितो मान्यो विद्वानित्यर्थः । श्रेयान् हितै-
षी वयसा वृद्ध इति द्रष्टव्यम् । चकाराद्देवे-
तासिद्धे । एवं शब्दः समस्तातिदेशार्थः । ततश्च -
गुरुदर्शने यदभिवादनादि तत्रापि कर्तव्यम् ।

सू॰ शय्यासनस्थानानि विहाय प्रतिश्रवणम् ॥

यदा गुरुराज्ञां दद्यात्तदा । शयनं खट्वादि,
86 आसनं फलकादि, । स्थानं यत्र स्थितिः । एता-
नि विहाय त्यक्त्वा । प्रतिश्रवणं, प्रतिवचनं

P.T.O

87 दद्यादित्यर्थः ।

सू· अभिक्रमणं वचनाददृष्टेन ॥

अदृष्टेन गुरुणा आज्ञायां दीयमानायां अभि-
क्रमणं तदभिमुखेन गमनं कार्यमित्यर्थः ।

सू· अधस्स्थानासनतिर्यग्वातसेवायां-
गुरुदर्शने चोत्तिष्ठेत् ॥

यथा गुरुः तथैव च तिष्ठेत् । अन्यमुखो भूत्वा ।
शिष्यो दासः तथैव चेति । ~~आरस्थो~~ यथा गुरुरधो नीचैस्तिष्ठेत्
आसीत वा तिर्यग्वातसेवा मूत्रपुरीषोत्सर्गः । तत्र गुरुं
दृष्ट्वोत्तिष्ठेत् चकारादन्यमुखो भूत्वा । तथा च स्मृत्य-
न्तरम् :—

87 "कूपस्थितं गुरुं दृष्ट्वा तटाकस्थं तथैव च ।
तिष्ठेदन्यमुखो भूत्वा शिष्यो दासः तथैव च ॥ इति ।
अथवा चकारात् अपगमनमुच्यते । एवं सूत्रार्थ-
श्च तदानीं दृष्टव्यः । अधस्स्थानासन तिर्यग्वात-
सेवयां उत्तिष्ठेदपयायाच्च क्रमेणेति ॥ तत्रा-

P.T.O

87 घस्थानासने द्रष्ट्वोत्तिष्ठेत् । तिर्यग्वातसेवायां अ-
पयायादिति क्रमः ॥

सू. गच्छन्तमनुव्रजेत् ॥

गच्छंतं दृष्ट्वा अनुव्रजेत् । चकारोऽनुवर्तते ।
तेनानुक्तमपि समुच्चीयते । आसीनं द्रष्ट्वो-
त्तिष्ठेत् शयानं द्रष्ट्वाऽसीतेति । तथाच स्मृत्यंतरं-
" गच्छंतमनुगच्छेदासीनंचोत्तिष्ठेत् शयानंचे-
तदासीन उपासीतेति" ॥

सू. कर्म विज्ञाप्याख्याय ॥

88 यदस्य कर्म कर्तव्यं तत्करोमीत्याचार्यस्य वि-
ज्ञाप्य तत्कृत्वा कृतमित्याख्याय तिष्ठेत् । वाक्य-
स्यापरिपूर्णत्वाद्विज्ञाप्येत्यत्र कृत्वेत्याहर्तव्यम् ।
आख्यायेत्यत्रापि तिष्ठेदिति क्रिया प्रविश पि-
ण्डीमितिवत् ॥

सू. आहूतोऽध्यायी ॥

यदैव गुरुणाऽहूतो भवति तदैवाधीयीत । न-

८८. त्वेन चोदयेदित्यर्थः ॥

सू॰ युक्तः प्रियहितयोः ॥

स्यादिति शेषः। युक्तः तत्परः प्रियहितयोः समुचितयोः हितस्य चाप्रियस्याकर्तव्यस्य त्वात् प्रियं प्रीतिकरं हितं आयति क्षमं य प्रियं आयति क्षमं च तदेव कुर्यादित्यर्थः ॥ तथा च स्मृत्यन्तरम् — "हितं च नाप्रियं कुर्यादि"त्यर्थः।

८९ सू॰ तद्भार्यापुत्रेषु चैवम् ॥

तस्य यौ सवर्णौ सदृशौ भार्यापुत्रौ तयोरपि प्रियहितयोः युक्तः स्यात्। एवंकारात् कंठप्रावृतादपि। कुतः सवर्णाभ्यामेवग्रहणमिति चेत् बहुवचनस्य पूजार्थत्वादिति। इदानीमेतस्यापवादमाह —

सू॰ नोच्छिष्टाशनस्नापनप्रसाधनपादप्रक्षालनोन्मर्दनोपसंग्रहणानि ॥

तद्भार्यापुत्रयोः एतानि न कुर्यात्। प्रिय-

P.T.O

P.T.O.



८९. हित्वान्त्रास्तं प्रतिषिध्यते। अनयोरेव प्र-
तिषेधात् गुरोरेतानि कर्तव्यान्येव। तथाचा-
पस्तंबः — "प्रोषितो भैक्षादग्नौ हुत्वा भुं-
जीत"। भैक्षं हविषा संस्कृतं अत्राचार्यो दे-
९० वतार्थे आहवनीयार्थेश्च। ततः तं भोजयित्वा-
यदुच्छिष्टं प्राश्नाति हविरुच्छिष्टमेव, तदित्या-
दि। तथाच वसिष्ठोपि "उच्छिष्टं गुरोरभो-
ज्यमि"त्यादि। प्रसाधनं अलंकारः। शेषं प्र-
सिद्धम्। उपसंग्रहणस्येदानीं प्रतिप्रसव-
-माह —:

सू. विप्रोष्योपसंग्रहणं गुरुभार्याणाम्॥

विप्रोष्य प्रत्यागतेन गुरुभार्याणां उपसंग्र-
हणं कार्यं नाऽन्यथा नाऽन्यस्याः। तत्रापितु —

सू. नैके युवतीनां व्यवहारप्राप्तेन॥

व्यवहारसमर्थेन पूर्णषोडशवर्षेणेत्यर्थः।
युवतीनां तरुणीनां विप्रोष्यापि न कार्यमि-

१० त्येके मन्यन्ते। ननु गौतमः। आशंकनीया-
११। नाशंकनीयापेक्षया विकल्पो द्रष्टव्यः। उ-
क्तमग्नीन्धनभैक्षचरणे इति तत्राग्नीन्धनं
गृहेभ्य एव पृथक् प्रथगुपलभ्यत इति।
भैक्षचरणविधिमाह —

सू. सार्ववर्णिकं भैक्षचरणमभिशस्त-
पतितवर्जम्

किमर्थमिदं सूत्रमारभ्यते। भैक्षचरणं तावदनेन
न विधीयते अग्नीन्धनभैक्षचरणे इत्यनेन विहि-
तत्वात्। अभिशस्तपतितवर्जनं च प्रशस्तानां
स्वकर्मस्वित्यनेनैवोक्तत्वादिति। अत्रैक आहुः।
शूद्रप्रावरणार्थोऽयमारंभः। प्रशस्तानां स्वकर्म-
स्वित्यनेनाऽप्राप्तत्वादिति। नचैतद्युक्तं वृत्तिक्षो-
भांतरेण शूद्रादित्यनेनापदि शूद्राभ्यनुज्ञान
सिद्धेः। नचानापद्यपि ब्रह्मचारिणः शूद्राभ्य
१२ नुज्ञानमनेन युक्तम्। स्मृत्यन्तरे प्रतिषेधात्।

१२ "शूद्रान्नरसपुष्टांगो ह्यधीयानोपि नित्यशः।
जुह्वन्वा विजपन्वापि गतिमूर्ध्वां न विंदति ॥"
तस्मादनापद्येव ब्रह्मचारिणो प्रशस्तद्विजा-
ति प्रावरणार्थों यमारंभः। अप्रशस्तानाम-
विशेषेण प्राप्तौ सत्यां अभिशस्तपतित-
वर्जमिति युज्यते च प्रतिषेधः। इतरथा -
शूद्रप्रापणे सति अभिशस्तादीनां प्राप्त्य-
भावादेव प्रतिषेधो न युज्यत इति न शक्य-
ते वक्तुं शूद्रविषय एवायमपवाद इति।
यत्र हि द्विजातयः प्रशस्ता एवाधिक्रियंते।
तत्र शूद्रोपि अप्रशस्ततर एवेति इतरस्य
प्रसंग एव नास्तीति। तेन प्रथमकल्प-
स्तावत् ब्रह्मचारिणः प्रशस्तेभ्य एव भैक्ष-
चरणम्। तदलाभे अप्रशस्तेभ्यः तदलाभे आचार्यादिभ्यः। तदला-
१३ भे आपदि शूद्रादिति स्थितम्। नाह सर्ववर्णाः
नार्हंतीति सार्ववर्णिकम्। सर्वेषां भवतीत्य-

९३ र्थः। सर्वग्रहणं क्षत्रियवैश्यप्रापणार्थम्।
अन्यथा ब्राह्मणस्यैव प्रहि प्रतिग्रहविका-
रान्तस्यैव स्यादिति वर्णग्रहणम्। शूद्रस्या-
पि प्रापणार्थं असति वर्णग्रहणे सर्वग्रहणं त्र-
योरेव स्यादिति तदर्थं वर्णग्रहणं कृतम्।
तेन शूद्रस्याप्राप्तौ तत्प्रापणार्थं वर्णग्रहण-
म्। ततश्च शूद्रस्यापि वृत्तिहीनस्य भिक्षा-
चरणेन दोषः। भिक्षाणां समूहो भैक्षम्।
ततश्च बहुभ्यो गृहेभ्यः आहर्तव्यं अभिश-
स्त उपपातकदोषेणाभिशस्तो गृह्यते।
पातकदोषेणाभिशस्तस्य पतितग्रहणेनैव
सिद्धत्वात्। यदाह वसिष्ठः— "ब्राह्मण
मनृतेनाभिशस्य पतनीयेन उपपतनीयेन
९४ वेत्यादि"। केचित् सर्वेषु वर्णेषु भैक्षं सा-
र्ववर्णिकमिति विग्रहं कुर्वन्ति। तेषां सर्वश-
ब्दस्य प्रयोजनं न विद्मः। तेषां सर्वशब्दो-

९४ स्य) अप्रशस्तद्विजातिप्रापणार्थं चेत् न
सूत्रारंभस्यापि तदेव प्रयोजनत्वात्। शूद्रप्रा-
पणार्थत्वेपि उक्त एव परिहार इति। तस्मात्तद्-
भूसुरैर्विचारणीयम्। (आदिमध्यांतेषु भव-
च्छब्दः)

सू. आदिमध्यांतेषु भवच्छब्दः प्रयोज्यो-
- वर्णानुपूर्व्येण ॥

द्विज पदस्य भिक्षां देहीति शब्दस्य प्रार्थनां
देहीत्यस्यापि च सामर्थ्यप्राप्तस्यादौ ब्राह्मणेन
भवच्छब्दः प्रयोक्तव्यः। मध्ये क्षत्रियेणान्ते-
वैश्येन भवच्छब्दस्य प्रातिपदिकत्वात्।
केवलस्य च प्रयोगाभावात्। स्त्रीणां सका-
शे तदामंत्रित विभक्त्यंतः प्रयोक्तव्यः।
९५ ० भवति भिक्षां देहीति। पुरुषसकाशे भ-
वान् भिक्षां देहीति प्रत्युपसर्गात् स्मृत्यंत
रोक्तमपि द्रष्टव्यम्। तदपि क्षकारहिका-

१५ रौनो वैश्र्यावित्ति। तथाच यथा गृह्य-
स्मृतिः—"ब्राह्मणो भिक्षेत भवति भिक्षांदे-
हीति, भवन्मध्यमया राजन्यो भिक्षांभ-
वति देहीति, भवदन्त्यया वैश्यो देहि भि
क्षां भवतीति, क्षांच हिंच नवर्धयेत् इति।
वर्णग्रहणं शूद्रस्य मंत्र प्रापणार्थम्।
ततश्च त्रयाणामेवान्यतमो मंत्रो द्रष्टव्यः।
अन्योवा रचना विशेषः कर्तव्यः। वैश्य
वच्छूद्र वृत्तिरिति वृत्यंतर दर्शनात्।
वैश्योक्तोवा द्रष्टव्यः। अनियतवृत्ति ब्रा-
पनार्थः सा क्षान्मंत्रेणोक्तः। तथाह-
वसिष्ठः—"अनियता च वृत्तिरनियतके-
शवेषा इत्यादि।" तस्यैव विकल्पोमा
भूदिति आनुपूर्व्य ग्रहणम्।
सू. आचार्य ज्ञाति गुरुस्वेष्वलाभे-
ऽन्यत्र ॥

९६ आचार्य उक्तः ज्ञातिः सपिण्डः गुरुः मातुला-
दिः स्वमात्मीयं अन्यत्रालाभे ऽप्ये भैक्षं-
प्रार्थनीयम् । क्रमस्तु प्रतिपादितः अत्रापि
तेषां यो यः प्रथमनिर्दिष्टः तत्र तत्र परिहरेत् ।
अन्यत्रालाभे पूर्वं पूर्वं परिहृत्यापि तेषामेव
सकाशे भैक्षं चरितव्यम् । नोपाध्यायगृहादि-
त्येवं नियमार्थं तेषां ग्रहणम् । ततश्च सर्वत्रा-
लाभे उपाध्यायगृहादित्येवं द्रष्टव्यम् । तथा-
च स्मृत्यन्तरम् — : "अलाभेऽन्यत्रोपाध्या-
यगृहादपीत्यादि ॥
सू॰ निवेद्य गुरवेऽनुज्ञातो भुंजीत ॥
इदं भैक्षं इति गुरवे कथित्वा ततो भुंक्ष्वेति
तेनाऽनुज्ञातो भुंजीत । एवंच निवेदनं भै-
क्षसंस्कारार्थम् । अनुज्ञात इति वचनात्
९७ यदि गुरुर्न ब्रूयात् तदाऽन्यदाहर्तव्यम् ॥
सू॰ असन्निधौ तद्भार्यापुत्रसब्रह्मचारिभ्यः ॥

× तत्र पूर्वं पूर्वं परिहृत्य ।

97 आचार्यासन्निधाने तद्भार्यादीनां निवेदनं यथा-
संभवं कर्तव्यम्। तद्ग्रहणं भार्यापुत्रयोः-
समानजातीयत्वार्थम्। सब्रह्मचारी समा-
नचरणः सन् साधुः प्रकृष्टगुणः तत्कथं-
भुंजीतेत्यत आह —:

सू. वाग्यतस्तृप्यन्नलोलुप्यमानस्सन्निधा-
योदकम्॥

वाग्यतः तूष्णीं, तृप्यन् संतोषं कुर्वन्।
पूर्वमसंतुष्टोप्यन्नदर्शनमात्रादेव हृष्येदित्य-
र्थः। तथाच स्मृत्यन्तरम् —:
" द्रष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनंदेच्च सर्वतः।"
इति अलोलुप्यमानो विशेषस्पृहां परिहरन्न-
ति भोजनं वर्जयेत् इत्यर्थः। तथाच (स्मृत्यंतरम्) मनुः —:
98 अनायुष्यमनारोग्यमस्वर्ग्यं चाति भोजनम्।
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत्॥
इति। अथवा भोजनमपि (मपरि) वर्जयन्नित्यर्थः।

P.T.O

९८ ततश्च स्मृत्यन्तरे भोजनविधिर्द्रष्टव्यः। सम्य
ङ्निधाय उदकं प्राशयेदित्यर्थः। समुपसर्गस्स्मृ-
त्यन्तरोक्तमार्गोपसंग्रहणार्थः। तथाचाहोशनाः
“सत्यं त्वर्तेने”त्यादिना उदकं परिषिच्य “अ-
मृतोपस्तरणमसी”त्यादिना प्राशयेदिति। अ-
थवा उदकमिति कमण्डलुरिति स्वच्यते। त-
त् सन्निधाय, ततश्च ब्रह्मचारिणोऽपि कम-
ण्डलु धारणं कर्तव्यम्। तथैव मनुरपि मे-
खलादिभिः सह प्रतिपत्ति विधानात्। ब्र-
ह्मचारिणः कमण्डलुधारणं ज्ञापयति। —
११८ मेखलामजिनं दण्डं उपवीतं कमण्डलुम्।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवित्॥
इति। ऽवंच ततऽवाचमनं कर्तव्यम्। वच-
न सामर्थ्यादुच्छिष्ट स्पर्शेनेन दोषः स्मृत्य-
न्तरोक्तं वा द्रष्टव्यम्। यथाह वसिष्ठः —
“अप्सु पाणौ च काष्ठे च कथितः पावकः शुचिः।

99 तस्मादुदकपाणिभ्यां परिमृज्यात्कमण्डलुम् ॥"
केचित् समुपसर्गादेवैतमर्थं समर्थयंति।
इदानीं यदि ब्रह्मचारी गुरोस्सम्यग्विनये-
नावतिष्ठेत् तदानीं किं कर्तव्यमित्यत आह-

सू- शिष्यशिष्टिरवधेन ॥

शिष्यशिष्टिः शिष्यशासनं वधंमुक्त्वा नि-
र्भत्सनादिना कर्तव्यमित्यर्थः। अधिकारादे-
100 वसिद्धे शिष्यग्रहणं अन्यस्यापि शासनीय
स्य भार्यादेरयमेव धर्म इति ज्ञापनार्थम्।

सू- अशक्तौ रज्जुवेणुविदलाभ्यां तनु
भ्याम् ॥

निर्भत्सनादिनाशासनाशक्तौ रज्ज्वा वेणुविदलेन वा सह निर्दिष्टयोरपि तुल्यार्थत्वाद्विकल्पः। तेनाविनतूनां ।

सू- अन्यथा घ्नन् राज्ञा शास्यः ॥

अन्येन हस्तादिना क्रोधवशेन गौरवार्थं शा-

100. जगद्ग्रहणम् । अथ कियन्तं कालं एवं वर्तितइ
त्यत आह :—

सू॰ द्वादशवर्षाण्येकवेदे ब्रह्मचर्यं चरेत् ॥
सर्वेषु ग्रहणान्तं वा

(सर्वेषु वेदेषु यावतैव कालेन अध्ययनम-
भिनिवर्तते तावन्तमेव कालं ब्रह्मचर्यम् । त-
स्यैतदर्थत्वात्सर्वत्र ग्रहणम् । यद्येकमधीयी
न, यदि वा द्वौ, यदि वा सर्वानित्येवमर्थम् ।
101 तथा च मनुः)

~~101~~ एक वेदमध्येष्यमाणो द्वादशवर्षाण्यविच्छि-
न्नरूपम् । ब्रह्मचर्यं चरेत् कुर्यात् । ब्रह्मचर्य-
शब्देन यमनियमलोपा उच्यन्ते । ब्रह्मार्थत्वात्
प्रतिद्वादशवा, प्रतिवेदं द्वादशवर्षाणि ब्रह्म-
चर्यं चरेत् । सर्वेषु वेदेषु यावतैव काले-
न अध्ययनमभिनिवर्तते तावन्तं कालं ब्र-
ह्मचर्यम् । तस्यैतदर्थत्वात् सर्वत्रग्रहणम् ।

यद्येकमधीयीत, यदिवा द्वौ यदिवा सर्वान्
इत्येवमर्थम्। यथाच मनुः —
"वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्"।
इति। सोऽयमुक्तादवधेरूर्ध्वमर्वाक् चापवादः।
नियमेनाधीतं वीर्यवद्भवतीति नियमोक्तिः।

सू. विद्यान्ते गुरुः अर्थेन निमंत्र्यः॥

विद्यासमाप्तौ तदनुक्रान्तां गुरुः आचार्यः
अर्थेन प्रयोजनेन निमंत्र्यः प्रष्टव्यः। किं
गुर्वर्थं करवाणीति। ततः किमित्याह —

सू. कृत्वानुज्ञातस्य वा स्नानम्॥

कृत्वा दत्वेत्यर्थः, गुरूपदिष्टमर्थं, तेन वा,
अलं गुरुदक्षिणयेत्यनुज्ञातस्य वा स्नानं -
समावृत्तिः। इदानीं पित्राद्यनेकगुरुसन्नि-
धाने कः प्रथमः पूज्यः इत्यत आह —

सू. आचार्यः श्रेष्ठो गुरूणाम्॥

आचार्यः उक्तलक्षणः सः श्रेष्ठः प्रधानः।

101 गुरूणां अन्येषां पित्रादीनाम् । ततश्च "स-
102 न्निधाने परस्येत्" परशब्देन अयमेवोच्यते ।

सू. मातेत्येके मातेत्येके ॥

एके माता श्रेष्ठेति मन्यते । इतिकरणात् पिते-
त्यपरे । अन्यथा मातैक इत्येव सिद्धत्वात् -
तत्र केवलपितुराचार्यः प्रधानः । तथाच -
मनुः :-

"कामं माता पिता चैनं यदुत्पादयतो मिथः ।
संभूतिं तस्य तां विद्या द्योनावभिजायते ॥"
आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः ।
उत्पादयति सावित्र्या सा नित्या साऽजरामरा ॥"
इति । यदि पितैवाचार्यो भवति तदा पिता वि-
शिष्यते । माता सर्वेषां श्रेष्ठा । तथाच वसिष्ठः
103 "उपाध्यायाद्दशाचार्य आचार्याणां शतं पिता ।
सहस्रं तु पितुर्माता गौरवेणातिरिच्यते" ॥ इति
अत्र पितृशब्देन पितैवाचार्यो भवति सएव -
P.T.O

103 गृह्यत इति

ओं इति गौतमीयविवरणे मस्करीये

॥ द्वितीयोऽध्यायः ॥

---

तृतीयोऽध्यायः ॥.

ओम्। एवं कृतनियमस्य कृतविद्यस्य च

सू. तस्याश्रमविकल्पमेके ब्रुवते ॥

तस्याखण्डितब्रह्मचर्यस्य। तथा च मनुः—

"वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्।

अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत्" ॥

104 इति। एवं च विप्लुतस्यौपपातकप्रायश्चित्तं

द्रष्टव्यम्। शूद्रपर्युदासार्थं वा तत् ग्रहणम्।

आश्रमधर्माभिधानान्माभूत् तस्यापीति वी-

प्सार्थं वा। तस्य तस्येति ब्रह्मणस्य क्षत्रियस्य

वैश्यस्य चेति तद्ग्रहणमंतरेणापि अधिका

रादेवैतत्सिद्धमिति चेत्। न, स्मृत्यंतरामा

104 साशंका निवृत्त्यर्थत्वात् । एवं हि स्मृत्यन्तरे प्र-
तिभाति "एष वाभिहितो धर्मः ब्राह्मणस्य चतु-
र्विधः" इति । तत्र ब्राह्मणस्यैवायं चतुर्विधो धर्मः
इतरयोः एकविधः इत्याशंकास्यादिति । त-
र्हि तत्कथमिति चेत् तत्र ब्राह्मणग्रहणं प्रद-
र्शनार्थम् । कथं गम्यत इति चेत् त्रयाणामे-
व वर्णानां चत्वार आश्रमाः इति स्मृत्यंतर-
105 दर्शनात् । तथाचापस्तम्बः —

सर्वेषामुपनयन प्रभृति समान आचा-
र्यकुले वासः सर्वेषामनुत्सर्गो विद्याया
कर्माणि बुद्ध्वा यत्कामयते तदारभेतेति ।
एके ब्रुवते तत्रैके तावत् ब्रुवते तुल्यब-
लत्वादाश्रमविकल्पम् । द्विविधं हि फ-
लं अभ्युदयरूपं निश्रेयसरूपं चात-
दन्यतमेनैव लभ्यत इति । तथाच सुबा-
लश्रुतिः — "त्रयो धर्मस्कंधा यज्ञोऽध्य

P.T.O

P.T.O ))

105. यनं दानमिति । प्रथमः तप एव द्वितीयस्तृ-
तीयमाचार्यकुले (वासः सर्वेषामनुत्सर्गःवि-
धया कर्माणि कुर्वाणो यत्कामयते तदार
भेतेति एके ब्रुवते । तत्रैके तावत् ब्रुवते तुल्य
बलत्वा दाश्रम विकल्प) वसनमेतोनारुह्य ब्र-
ह्मलोकं गच्छति । ब्रह्मसंस्थोऽमृतत्वमेतीति
अर्थस्तु त्रयो धर्मस्याश्रयाः यज्ञोऽध्यय
नं दानं इति गृहस्थस्य निर्देशः । तपएवेति
106 वानप्रस्थ परिव्राजकयोः धर्मः । आचार्यकु
ले वसनं ब्रह्मचारिणः । एतानारुह्येति ब्रह्मच
र्याश्रमं गृहस्थाश्रमं वानप्रस्थाश्रमं परिव्रा-
जकाश्रमं वा सम्यगास्थायेत्यर्थः । यस्तेषां
ब्रह्मसंस्थो ब्रह्मनिष्ठो ज्ञानी अमृतत्वं मोक्षं ग-
च्छति इति । तत्रश्च सर्वेषामपि ब्रह्मलोक-
प्राप्ति प्रतिपादनात्तुल्य बलतैवोक्ता । तथा जा-
बालिश्रुतावपि तुल्यबलतैव श्रूयते । ब्रह्म-

P.T.O.

106 र्यं परिसमाप्य गृही भवेत्। गृही भूत्वा वनी-
भवेत् वनी भूत्वा प्रव्रजेत्। यदि वा इतर-
था ब्रह्मचर्यादेव प्रव्रजेत्। गृहाद्वनाद्वा-
ब्रह्मलोकं गच्छति इति। मनुरप्याह॥
"सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः।
107 यथोक्तकारिणं विप्रं नयाति परमां गतिम्"॥
इति। अत्र अपि शब्दादेकोऽपि द्रष्टव्यः। आ-
पस्तम्बोऽप्याह—: "चत्वार आश्रमा गार्ह-
स्थ्यमाचार्यकुले वसनं मौनं वानप्रस्थ्यमिति"
तेषु सर्वेषु यथोपदेशं हि व्यग्रो वर्तमानः
क्षेमं गच्छतीति। तेन तुल्यबलत्वाद्विकल्प इति।
ननु च तुल्यफलत्वे सति ब्रह्मचर्येणैवोभय-
विधफलावाप्तेः इतराश्रमविधानानर्थक्य
प्रसंग इति। उच्यते यो यस्यानुष्ठाने समर्थः
तस्य तदाश्रम प्रतिपत्त्यर्थमितराश्रमविधानमि-
ति। जन्मान्तरवासनया वा इष्टाश्रम प्रतिप-

107 त्यर्थं श्रुतिरपि तं विद्या कर्मणि समन्वारभेते<del>ति</del> पूर्वप्रज्ञा चेति यावज्जीवश्रुतिरपि-
108 गृहस्थस्यार्थिनः शक्तिविषये द्रष्टव्याऽऽवं-गृहीते र्व्युत्थानश्रुतिरप्युपपद्यते। एतमात्मानं विदित्वा पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्यु-
त्थायाथ भिक्षा चर्यं चरतीति। इतरथाहि भिक्षा-
चर्यमिति सन्यासोपदेशो नोपपद्यते इति
जायमानश्रुत्यापि यज्ञादीनामवश्यकर्त-
व्यता प्रतिपाद्यते। गृहस्थस्य नतु जायमा-
नस्यैव ऋणत्रयसंबंधस्यात्यन्तासंभ-
वात् ब्रह्मचर्यादेव प्रव्रजेदित्यादि श्रुति-
विरुध्दत्वाच्च। सोऽतऽएव ब्रह्मचर्यात्प्रव्र-
जति यमिच्छेत्तमावसेत् इत्यादिश्रुति-
स्मृतिविरुध्दत्वाच्च। अर्थवादानां च -
कार्यशेषत्वात्तत्स्थपदार्थोप्येवं गृ-
109 हीतव्यः। गृहस्थो जायमानः पूर्ववास-

109 नयागार्हस्थ्यं प्रविष्टः। ब्राह्मणग्रहणं -
क्षत्रियवैश्ययोरपि उपलक्षणम्। त्रिभिः
ऋणैः संबध्यते। यज्ञेन देवेभ्यः ऋणी-
भवति। अतो यज्ञः कर्तव्यः। प्रजया पितृ-
भ्यः अतः प्रजोत्पादनं कर्तव्यम्। ब्रह्मच-
र्येण ऋषिभ्यः अतः पर्वादौ ब्रह्मचर्यरक्ष-
णं च कर्तव्यमिति। एवं गृहीते सर्वत्र
श्रुतिस्मृत्योर विरोधो भवति। एके ग्रह-
णात् न तु गौतमः। तस्य तु समुच्चयो मतः
कथमवगम्यते। ऐकाश्रम्यं त्वाचार्या
इति बाधकपक्षस्यापि विमतत्वेन निर्दे-
शनात् प्रागुत्तमात्त्रय आश्रमिण इति च
लिंगात् उत्तमात्प्रागाश्रमत्रयस्याभा-
वात् विकल्पपक्षे गौतमस्तावदेवं मन्य-
110 ते। "यज्ञेन देवानाप्नोति वैराजं तपसापु-
नः। सन्यासात् ब्रह्मणस्थानं वैराग्यात्

110 -प्रकृतौ लयम् ॥ इति भिन्नफलत्वोपदेशात्
सुबालश्रुतावप्यन्यतममारुह्येति अनुक्-
त्वाऽऽतानारुह्येति समुच्चयाभिप्रायेण
समुच्चयेनोक्तत्वात् ब्रह्मलोकप्राप्तिरपि स-
मुच्चय फलत्वेन उपदिष्टा । जाबालिश्रुता-
वपि प्राधान्येन पूर्वं समुच्चयपक्षस्यैवा-
भिहितत्वात् । सर्वेऽपि क्रमश इत्येतस्मिन्म-
नुवाक्ये अपि शब्दस्य समु-
च्चयार्थत्वात् । आपस्तंबवाक्येऽपि तेषु सर्वे-
ष्विति बहुवचनान्नैकस्मिन्नेव वर्त-
मानः । किंतु सर्वेष्वेव वर्तमान इत्यभिप्रा-
येणोक्तत्वात् । इतराश्रमविधानस्य चा-
स्मिन् पक्षे सुतरामुपपद्यमानत्वात् पूर्वे-
111 प्रज्ञा चेति श्रुतेरपि विद्याभियोगविषये-
ऽप्युपपद्यमान बाधायावज्जीवश्रुतेरपि-
गृही वनं प्रविशेद्यदि गृहमेव कामयेत ।

111 तदा यावज्जीवमग्निहोत्रं जुहुयादित्यस्मिन्
जाबालश्रुतिवाक्ये (विषय) नित्यत्वदर्शना-
दस्मिन् पक्षे उत्थानश्रुतेरपि सुतरामुपप-
द्यमानत्वादृणत्रयश्रुतेरपि यथार्थावबोप-
पद्यमानत्वाच्चतुर्थमायुषो भागदानमिति।
अनेनापि मनुना समुच्चयपक्षमेवांगीकृत्य-
उक्तत्वात्समुच्चयपक्ष एव श्रेयानिति। अत-
एव विकल्पबाधापक्षौ परमतत्वेनोपन्य-
स्तौ। एवं च यमिच्छेत् तमावसेदित्या-
112 दि वाक्यानि विकल्पाचार्य दर्शनेनोक्ता-
नि इति द्रष्टव्यानि। असमर्थो यः समुच्च-
यानुष्ठाने पंग्वादिदोषेण निःस्वत्वादिना वा-
तेन विकल्पपक्षोपि आश्रयितव्य इत्यभि-
प्रायेण ब्रुवत इत्यर्थसिद्धस्याप्युपन्यासः।
अथवा य आत्मज्ञानी तेन विकल्पपक्षः
आश्रयितव्यः। इतरेण तु समुच्चयपक्ष इ-

P.T.O

112 ति। कुतः अनुष्ठानस्यापि ज्ञानोत्पत्तिः प्रयोजनम्। तस्मिन्नुत्पन्ने यत्र क्वाप्याश्रमे स्थितस्य पुरुषार्थः सिध्यतीति आश्रमग्रहणं संव्यवहारार्थम्। वर्णा आश्रमाश्चेत्यादौ के पुनस्ते आश्रमा इत्यत आह—:

सू. ब्रह्मचारी गृहस्थो भिक्षुर्वैखानसः॥

ब्रह्मचर्यं चरतीति ब्रह्मचारी। ब्रह्मण एव वा विषये निस्पृहश्चरतीति ब्रह्मचारी।

113 गृहं पत्नी तत्संयोगात् गृहस्थः। भिक्षाशीलत्वात् भिक्षुः। विखनसा प्रोक्तं शास्त्रं वैखानसं तद्विधिना वर्तत इति वैखानसः। विसमासः एषामेव पृथक्त्वज्ञापनार्थम्। यथाचाहो शनाः—: " द्वौ ब्रह्मचारिणावुपकुर्वाणौ नैष्ठिकश्चा। द्वौ वैखानसौ सपत्नीकोऽसपत्नीकश्च। द्वौ सन्यासिनौ भि-

113 कुटीचकसन्यासी वेदसन्यासी च । बहुधा ~~गृहस्था~~

गृहस्थाः शालीन यायावरादि भेदेनेत्यादि।

ननु च स्मृत्यन्तरे वैखानसमभिधाय भिक्षु-

कः इत्यभिधानं क्रमभेद इति । उच्यते-

प्रागुत्तमा त्रय आश्रमिण इत्यत्र वैखा-

नसवर्जनार्थः। क्रमभेदः तस्य ग्राम-

प्रवेशन प्रतिषेधादेव सिद्धमिति चेन्न -

114. अर्थिनामरण्यगमनस्यापि संभवात् ।

तथा च स्मृत्यंतरम् :

"चातुर्वैद्यो विकल्पी च नैरुक्तो धर्मपाठकः।

ब्रह्मचारी गृही भिक्षुः पर्षदेषा दशावरा ॥

इति। प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षि-

णाम्। आत्मन्यग्नीं समारोप्य ~~ब्रा~~

ब्राह्मणः प्रव्रजेत् गृहात् ॥ इत्येतत्स्मृ-

-त्यन्तरमवलंब्य गार्हस्थ्यादेव सन्या-

सः कर्तव्य इत्येवमर्थं क्रमभेद इति वर्ण-

P.T.O

114 -यन्ति। तत्पूर्वसूत्रेणैव प्रतिपादितं उतने-
ति भूसुरैर्विचारणीयम् ॥.

सूत्रम् • तेषां गृहस्थो योनिः अप्रजन-
नत्वादितरेषाम् ॥

चतुर्णामप्याश्रमाणां गृहस्थः कारणम्।
कुतः अप्रजननत्वादितरेषाम्। ~~ब्रह्मचार्यादीनां~~ ब्रह्मचर्यादीनां वैखानसार्यो
115 हेतूक्तिः। ब्रह्मचारिणो ब्रह्मचर्यरक्षण-
विधानात्। भिक्षोः ऊर्ध्वरेतस्त्व विधानात्।
एवंच वैखानसस्य सपत्नीक पक्षेपि -
ब्रह्मचर्यरक्षणं कर्तव्यम्। अधिकारा-
देव सिद्धे तेषां ग्रहणं गृहस्थोत्पन्ना-
-नामेव तेषां धर्माधिकारमित्येवमर्थम्।
तथाच शातातपः:—
चण्डालाः प्रत्यवसिताः परिव्राजकतापसाः।
तेषां जातान्यपत्यानि चण्डालैस्सहवासयेत्॥

115. इति। तेषां गृहस्थ्यऽव योनिरित्युक्तौ तेऽव-
कारादिवेतरेषां ब्रह्मचर्यरक्षणे सिद्धेऽवम-
-भिधानेऽपां पुनः निवृत्तिः माभूदिति। यदि-
ते गार्हस्थ्यं प्रति निवृत्ता भवेयुः तदा ते
चण्डालाः भवंति। कुतः उदाहृत शातातप
116 वचनात् तत्र चण्डालाः भवंति। प्रत्यव-
सिताः परिव्राजकतापसाः प्रतिनिवृत्ताः
ये परिव्राजकतापसाः नैष्ठिकाः वैखानसाः
तस्मात्तेषां जातान्यपत्यानि चण्डालैस्सह-
-वासयेत् राजा ग्रामो वेत्यर्थः। इदानीमाश्र-
मधर्मेषु क्रमेण वक्तव्येषु प्राप्तेषु सर्वाश्रम-
सामान्यत्वात् उपकुर्वाणस्य पूर्वमुक्तत्वान्नै-
ष्ठिकस्य क्रमेण प्राप्तं वक्तुमाह:—

सू. तत्रोक्तं ब्रह्मचारिणः॥

तत्र उपनयन प्रकरणे यदग्नीन्धनाद्यु-
क्तं तदस्यापि भवतीत्येकत्यतिदेशः।

116 ननु च नैष्ठिकस्यैवेदं नोपकुर्वाणस्येति कथं
अवगम्यते इति । उच्यते । उपकुर्वाणस्यो-
क्तत्वात् गृहस्थभिक्षुवैखानसानां वक्ष्यमाण-
117 त्वान्नैष्ठिकस्येदं नोपकुर्वाणस्य च भवतीति ।
तर्हि ब्रह्मचारिग्रहणं किमर्थमिति चेत् । येनो-
पकुर्वाणव्रत मनुष्ठितं तस्यैव नैष्ठिक-
धर्मेऽधिकार इत्येवमर्थम् । अतिदेशादु-
-पकुर्वाणव्रतमेव नैष्ठिकस्यापि अनुष्ठित-
व्यमित्युक्तत्वात् । इदानीमस्य विशेषविधि
माह —

सू· आचार्याधीनत्वमान्तम् ॥

आचार्य पारतंत्र्यं तच्चित्तानुविधायित्वं आमरणा
त्कर्तव्यम् । किंच —

सू· गुरोः कर्मशेषेण जपेत् ॥

गुरुशुश्रूषातिरिक्त काले जपं कुर्यात् ।
एवं च जप एवास्य विशिष्टं धर्मसाधनम् ।

इति। आचार्य इति प्रकृते गुरुग्रहणं माता-
पित्रोरपि गुरुशुश्रूषा प्रापणार्थम्।
११४ तथा च मनुः—
तेषां त्रयाणां शुश्रूषा परमं तप उच्यते।
न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत्॥
इति।
सूत्र. गुर्वभावे तदपत्ये वृत्तिः॥
गुर्वभावे तदपत्ये शुश्रूषा इति नियमार्थं
न. अध्यापयितुरेवाभावे तदपत्ये शुश्रूषे
ति नियमार्थं गुरुग्रहणम्। समानजातीया-
पत्यग्रहणार्थं तत् ग्रहणम्। अपत्यग्रहणं
भार्यानिवृत्त्यर्थम्॥ इति॥
सू. तदभावे वृद्धे सब्रह्मचारिण्यग्नौ वा।
तद्गुरुपुत्राभावे, विद्यावृद्धे, तदभावे सब्रह्म-
चारिणि, समानचरणे, तदभावेऽग्नौ, अग्नि-
११५ शुश्रूषा ज्योतिरूपस्याग्नेः ध्यानम्। किं-

१२T.०

119 पुनरस्याश्रमस्य फलमित्यत आह—

सू- एवं वृत्तो ब्रह्मलोकमवाप्नोति जितेन्द्रियः॥

एवं यथोपदेशं वर्तमानः ब्रह्मणः स्थान-
मवाप्नोति। स चेज्जितेन्द्रियो भवति। ब्रह्म-
चर्यरक्षणोपदेशात् उपस्थेन्द्रियजय-
स्य पूर्वमुक्तत्वादिदं चक्षुरादि विषय-
मिति द्रष्टव्यम्। तथा च मनुः—
"श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च
यो नरः। न हृष्यति ग्लायति वा स विज्ञेयो
जितेन्द्रियः"॥ इति
उत्तरेषामप्येतदेव प्रधानमित्येवमर्थं फला-
120 वसानेऽभिधानम्। इदानीं अन्येषामपि
सामान्यधर्ममाह—

सू उत्तरेषां चैतदविरोधि॥

यद् ब्रह्मचारिण उक्तं तदुत्तरेषामपि भवति।
यदविरुद्धं यथा द्यूतादिवर्जनं यद्विरुध्यते

P.T.O

126. नन्यावर्तते। यथा अग्निकार्यम् ॥ प्रव्रजितस्य।
गुरुकुल गुरुकुलवासः ॥ वैखानसस्य।
गृहस्थस्य ब्रह्मचर्यम्। चशब्दा दुक्तस्य यदु-
क्ष्यमाणं तदप्यविरुद्धं पूर्वेषामपि भ-
वतीति ज्ञापयति। यथा न म्लेच्छाशुच्य-
धार्मिकैः सह संभाषेतेत्यादि।
सू- अनिचयो भिक्षुः ॥
इदानीं क्रमप्राप्तस्य गृहस्थस्य धर्माः वक्त-
व्याः तान् विलंघ्य किमर्थं भिक्षोरभिधीयत-
इति। तत्र उच्यते बहुवक्तव्या गृहस्थस्या-
127 भिधीयमाना धर्मा अविरुद्धाः। केचित्
कथं नाम पूर्वेषां स्युः इति ॥ तदर्थं व्युत्क्रमे-
णाभिधानम्। तर्हि वैखानसस्य वक्तव्या
इति चेत् उपन्यासक्रमेणोक्तत्वाददोषः।
अतः भिक्षोस्तावदुच्यते। अनिचय-
शब्देनोपचयितस्य द्रव्यस्य त्यागः उप-

P. T. O

121. ते। न नित्यद्रव्यस्य शिखायज्ञोपवीतादेः।
ननु च नित्यस्यैवत्यागो युक्तः उपवीतशब्देन
न्यासविशेषोऽभिधीयते। उच्यते दक्षिणे-
पाणावुपवीतीत्युच्यते बुधैरिति। यज्ञार्थमु-
-पवीतं यज्ञोपवीतं यज्ञोपवीतस्य यज्ञा-
धिकाराभावात्। "न कुड्यान्नोदके संगो न-
चैले न त्रिपुष्करे। नागारे नासने नान्ने यस्य-
122 स्यान्मोक्ष वित्तु सः"॥
स्मृत्यन्तरे कुड्यादीनां त्यागोपदेशाच्चेति
तोजाबालिश्रुतावपि-: "नरवानि निकृत्य
यज्ञोपवीतं विसृज्येति" यज्ञोपवीतस्यत्यागो-
पदेशाच्चेति। उच्यते प्रथमं तावद्युक्तं
यज्ञाधिकाराभावादिति तत्र यागशब्दो
देवपूजादावपि वर्तते। देवपूजनं त्वस्य
ध्यानेन परमात्मपूजनं अस्त्येव। कु-
तः-:

122 अरण्यनित्यस्य जितेंद्रियस्य
सर्वात्मकप्रीति निवर्तकस्य ।
अध्यात्मचिंतागतमानसस्य
ध्रुवाह्यनावृत्तिरुपेक्षितस्य ॥

इति स्मृत्यंतरदर्शनात् । आत्मयागाद्यधि-
कारात् । तथाच श्रूयते " श्रुतौ धर्मो
हविर्मनः स्रुवं प्राणोऽध्वर्युरिंद्रियाणि
ण्युद्गाता शब्दादयो होताऽतैः ऋत्विग्भिः
त स्रुवेण तद्धविरहरहर्यतिना परमात्म-
न्यग्नौ होतव्यमिति । अतो यागाधिका-
123 राभावात् अदोषः । यच्चोक्तं न कुण्डया-
मोदके (~~संभः~~) संगः इति तत्रापि कुण्डि-
कादीनां वैचित्र्यवर्जनार्थम् । संगस्यैव
परित्यागः न कुण्डिकादेः । तत्र यज्ञोपवीतु-
दककमण्डलुहस्त इति वक्ष्यमाणत्वात् ।
तत्र सर्वाश्रमाणां धर्मत्विमिति सर्वाश्रमाधि-

123 कारात् सामान्यत्वेन वर्तमानो विशेषधर्मे-
-ण बाध्यत इति चेत् न यदि सर्वाश्रमा-
धिकारः तत्रोच्यते । तत्र प्रकरणे वाक्या-
र्थोच्चारणाघटनार्थं यज्ञोपवीत्युदककम-
-ण्डलुहस्तत्वमिति भावप्रत्ययेनैवावक्ष्यत् ।
पैशुन्यमत्सराभिमानाहंकारानार्जवात्मस्त-
वपरगर्हदम्भलोभमोहवर्जनं धर्माश्र-
माणां धर्मिणामिति पूर्वमुक्त्वा ततश्चाभा-
124 -वप्रत्ययेन विशेषोद्देशेन यज्ञोपवीत्यु-
-दककमण्डलुहस्त इति निर्देशः सर्वाश्र-
-माधिकारनिवृत्त्यर्थ इति ज्ञातुं शक्यते ।
अतः तत्र सर्वाश्रमाधिकाराभावात् पू-
र्वापरविरोधप्रसंगो माभूदिति न कुण्ड्यादके
संग इति । तत्रापि संगमात्रस्यैवात्या-
गः क्रियत इति गृहीतुं शक्यत एवेति ।
तदर्थमेव संगशब्दस्यापि निर्देशः ।

(124)(127)

124 तस्मात्तेनापि न कुण्डिकादीनां त्यागः। यच्चोक्तं
नखानि निकृत्य यज्ञोपवीतं विसृज्येति तत्रापि
प्रथमं सन्न्यासाश्रम प्रवेशकाले पुराणस्य
यज्ञोपवीतस्य त्यागमात्रं क्रियते नतदानीं
गृह्यमाणस्य प्रतिषेधः कृतः। कुतः।
125 नखानि निकृत्य पुराणवस्त्रं यज्ञोपवीतं
कमण्डलुं त्यक्त्वा नवानि गृहीत्वाऽऽश्रमं
प्रविशेदिति स्मृत्यंतर श्रवणात्। तस्मा-
दौपचयिक द्रव्यस्यैव त्यागो युक्तः। किंच
नित्य द्रव्यस्य त्यागे भिक्षोराचमनाभावश्च
प्राप्नोति। आचमने यज्ञोपवीतीत्यारंभात्
तदभावेऽचमनस्यापि अभावः प्राप्नोतीति मुण्ड-
शिखीवेति मुण्डपक्ष आचमनांश। शिखावर्जित-
स्यापि आचमनं युष्माभिरभ्युपगम्यते यथा
तद्वदस्माकमपीति चेन्न न तत्र वचनाद-
दोषः। मुण्डः शिखी वेति युष्माकं तु यज्ञो-
P.T.O

125 पवीतं त्यक्तव्यमिति वचनाभावाद्दोषऽवेति -
भिक्षुर्नियय इति वक्तव्ये धर्मस्यादावभिधानं नित्य-
126 स्याग्निहोत्र दारादेरपित्यागार्थम्। ऽवं च गार्ह-
स्थ्यादेव यः प्रव्रजेत् तेन श्रौतस्य स्मार्तस्य-
चाग्नेः दारपुत्र पंचयज्ञादिसहितस्य त्यागः
कर्तव्यः उक्तः। वैखानसादेव यः प्रव्रजेत्
तत्रापि सपत्नीकपक्षे प्राप्तस्य दारस्य श्रा-
श्रामणकाग्निसहितस्य विहितस्य पंचयज्ञा
देरपि त्यागः कर्तव्यः। केचिन्नैष्ठिकस्या-
पि अनियतत्व विधानार्थमादावभिधानम्।
इति वर्णयंति। तदयुक्तं गुरोः कर्मशेषेण जपे-
दिति जपस्यैव प्रधानधर्मत्वेनोपदिष्टत्वात्तेनैव
अग्निहोत्रादेरभावो ज्ञातुं शक्यतऽवेति ॥

सू- ऊर्ध्वरेताः ॥

उत्तरेषां चैतदविरोधीत्यनेन ब्रह्मचारिण उक्तेन-
127 ब्रह्मचर्यरक्षणेनास्यापि सिद्धेः ऊर्ध्वरेतोग्रहणं -

127 यथा यथा रेतः क्षीणं भवति तथा तथोपायः
कर्तव्यः इत्येवमर्थम्। उपायाश्चाल्पाल्पाभ्य-
वहारादिभिः यथा भगवान् वासुदेवः —;
"विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते"॥इति
तथाऽल्पाल्पाभ्यवहाराभिप्रायेण स्मृत्यंतरे-
-ऽप्युक्तम्। "अष्टौ ग्रासाः मुने र्भुक्त"मित्यादि।
(तथाच) एवंच ब्रह्मचारिणः संपूर्णभोजने
नदोषः। तथाच वसिष्ठः —
अनड्वान् ब्रह्मचारीच आहिताग्निश्च ते त्रयः।
भुंजाना एव सिध्यंति नैषां सिद्धिरनश्नताम्॥
इति

सू. ध्रुवशीलो वर्षासु॥

वर्षास्विति बहुवचनात् ग्रामात् ग्रामां-
128 तरं चतुर्षुमासेषु नगच्छेदित्यर्थः। एकत्रापिच
निवसन्नयं चंक्रमणशीलस्यादिति ध्रुवशीलः

128 ग्रहणम्। अनेनैवास्यानिकेतनत्वं सिध्यति।
तथा च स्मृत्यन्तरम् —: "ग्रामान्ते, देवगृहे शून्या-
गारे, वृक्षमूलेवेति" शील ग्रहणं च कुर्वाणे तद्-
ज्ञापयति नापत्यमेवं भवेत्। ततश्च दुर्भिक्ष
राष्ट्रभ्रंशादौ गच्छेदपीति।

सू- भिक्षार्थी ग्राममियात्॥

भिक्षां भिक्षमाणत्वात्तदर्थं ग्रामं गच्छेत्। अर्थाच्छे-
षं काले अरण्य, देवायतनादौ तिष्ठेदिति सिद्धम्।
ब्रह्मचारी भिक्षाकाले प्राप्त आह —:

सू जघन्यमनिवृत्तं चरेत्॥

जघन्यं भोजनक्रिया। ततः पश्चादित्यर्थः। तथा-
129 च मनुः —:

"विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने।
वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत्॥

इति॥ अनिवृत्तं कस्मिंश्चिद् गृहे प्रत्याख्या-
तः तस्मिन् दिने तद् गृहं पुनः न प्रविशे-

P.T.O

129 दित्यर्थः। चरेदितिस्मृत्यंतरोपसंग्रहणार्थम्।
यथा वसिष्ठः—"विधूमे सन्नमुसले ऽक-
शाटी परिहितो ऽजिनेन वेति।

सू. निवृत्ताशीः॥

भिक्षादानाभिवादनादावाशिषं न प्रयोक्ते-
त्यर्थः। हिंसानुग्रहयोरनारंभीत्यनेनै-
वैतल्लभ्यत इति चेन्न क्रियारूपत्वादनुग्रहस्य-
वागात्मकत्वादाशिषः।

सू. वाक्चक्षुः कर्मसंयतः॥

130 ब्रह्मचारिप्रकरणे वाग्बाहूदरसंयत इत्यनेनै-
व सिद्धेऽतिशयार्थं पुनर्वचनम्। अतः वा-
क्संयमनं मौनमन्यत्र स्वाध्यायजप-
पथिप्रश्न धर्मप्रयोग प्रश्नेभ्यः।(धर्मयोगं
पथि प्रश्नं)
"धर्मयोगं पथिप्रश्नं स्वाध्यायं चतथैव च।
भिक्षार्थं देहि वचनं न निन्दति यतेरपीति"॥

130 इतिस्मृत्यंतरदर्शनात्। चक्षुसंयमन आत्मनो
व्याधेरपि ईक्षणं नकर्तव्यमिति। तथात्र वसिष्ठः
उपेक्षकः सर्वभूतानां इति कर्मसंयमो याव-
द्विहितानुष्ठान मात्रं काम्ये प्रवृत्तिः
माभूदिति। इदानीमनिचयो भिक्षुरित्यनेन
सर्वस्यौपचयिकस्य द्रव्यस्य परित्यागे-
सति प्रतिप्रसवः क्रियते।

131 सू- कौपीनाच्छादनार्थं वासो बिभृयात्॥
कौपीनमिति नग्नतोच्यते। तदावरणार्थं मात्रं
वासः परिदध्यात्। तावंच प्रशस्तद्विजाति-
भ्यः तावन्मात्र प्रतिग्रहे न दोषः। ततश्च
"अभयं सर्वभूतेभ्यः दत्वा यस्तु निवर्तते।
हन्ति जातानजातांश्च प्रतिगृह्णाति यस्स चेतन्"॥
इति स्मृत्यन्तरे यद्दोषसंकीर्तनं तदस्मादन्य-
त्रेति द्रष्टव्यम्।

सू- प्रहीणमेके निर्णिज्य॥

131. शाके मन्यते प्रतिग्रहदोषपरिहारार्थं प्रकीर्णं
यद्द्रव्यादौत्यक्तं तत्प्रक्षाल्य परिदद्यात्।
निर्णिज्येति प्रत्यामिक शौचप्रापणार्थम्।
132 सू· नाविप्रयुक्तमोषधिवनस्पतीनामंगमुपाददीत॥
ओषधयः फलपाकान्ताः उभपुष्पा ये फलवंतः,
ते वनस्पतयः। उभयग्रहणेन सर्वे स्थावरागृह्यंते।
तेषामपिप्रयुक्तं ततोऽनवगतं अंगं शाखापत्रा-
दि नगृह्णीयात्। हिंसानुग्रहयोरनारंभीत्य-
वेष ?
नेन सिद्धमिति चेत् तत्र जंगमवृक्षाव
हिंसेति केचिद्वदंति। तदभिप्रायेणोक्तत्वाददो-
षः। उपशब्दात् प्रयोजयितापि न स्यात्।
ध्रुवशीलत्वोपदेशादूर्ध्वंभ्योऽन्यत्र -
काम चारप्राप्तावाह —
सू· नद्वितीयां अपर्तुरात्रिं ग्रामे वसेत्॥
133 ऋतुशब्देन वर्षा वोच्यंते। अपगते
ऋतौ द्वितीयां रात्रिं ग्रामेन वसेत्। शाकमि-
P.T.O

133 न ग्रामे दिन द्वयं न वसेदित्यर्थः। ग्राम ग्रहणात्
अरण्ये न दोषः इत्यर्थः। अपर्तुग्रहणात् -
वर्षासु कदाचिद्द्वितीयायामपि वसतो न दोषः।
वर्षाशब्देन हेमंतग्रीष्ममध्यमासा उच्यंते।
ततश्च तस्मिन् वर्षाकाले ऽप्येकत्रैव वसेत्।
अन्यत्र न चंक्रमेदित्यर्थः॥

सू. मुण्डः शिखी वा॥

जटिल प्रतिषेधार्थ आरंभः इच्छातो विकल्पः।

सू. वर्जयेद्बीजवधम्॥

वधं बीजादीनां, वधं, अवघातनादिना।

सू. समो भूतेषु॥

सर्वप्राणिषु मध्यस्थस्स्यात्। आत्मपक्षपरपक्ष-
134 विभागवर्जकःस्यादित्यर्थः॥

सू. हिंसानुग्रहयोरनारंभी॥

ब्रह्मचारि प्रकरणे हिंसामित्यनेनैव सिद्धे-
ऽतिशयार्थं पुनर्वचनम्। ततश्चाज्ञाते -

P-T.O

P-T.O

134 वि प्राणिवधे ऽहरहस्तत्परिहारार्थं प्रायश्चि-
त्तं कर्तव्यम्। यथाहोशना:—
"अज्ञातवधशुध्यर्थं रात्रावहनि त्रीन त्रीन प्राणा-
यामान्धारयेदिति"। अनुगतहशब्देन स्नेह-
मपि न कुर्यादित्यर्थ:। भिक्षोरुक्त्वा इदानीं
वैखानसधर्ममाह—
सू. वैखानसो वने मूलफलाशी तपःशील:॥
वैखानस शब्द: कृतनिर्वचन: सोऽरण्ये वस-
135 न्मूलफलाद्यशनशील:स्यात्। न संस्कृतमन्नमश्नी-
यादित्यर्थ:। तपःशील: शरीरपरिशोषण-
शील:। तावंच फलमूलाद्यपि स्वल्पमेवा-
श्नीयात्। स्मृत्यंतरदर्शनात षोडशकबला-
न्वानप्रस्थस्य षोडशेति।

सू- श्रामणकेनाग्निमाधाय॥

श्रामणकं नाम वैखानसं शास्त्रम्। तेनाग्निमा-
धाय, गृहीत्वा सायं प्रातः होमं कुर्यादिति शेष:।

135 सू. अग्राम्यभोजी ॥

मूलफलमपि ग्रामजं न भक्षयेत इति ।

सू. देवपितृमनुष्यभूतर्षिपूजकः ॥

ग्राम्यान्न साधनैः गृहस्थस्य पंचमहायज्ञाः

अस्यच ग्राम्यान्न प्रतिषेधान्निवृत्तिः माभूदिति

136 आरंभः । तथाच मनुः —— :

"मुन्यन्नैर्विविधैर्मेध्यैश्शाकमूलफलेन वा ।

एतानेव महायज्ञान् निर्वपेद्विधिपूर्वकम्" ॥

इति ।

सू- सर्वातिथि प्रतिषिद्धवर्जम् ॥

यावदस्याश्रमं गच्छति तत्सर्वं अस्यातिथैरेव "ब्राह्मणस्यानतिथिरब्राह्मण इत्यादि ~~वर्णनीय~~ वर्णनियमस्संख्यानियमो वा नास्तीत्यर्थः । प्रतिषिद्धाः स्तेनादयः प्रतिलोमाश्च तद्वर्जम् ।

सू बैष्कमप्युपयुंजीत ॥

विष्कैः व्याघ्रादिभिः हतस्य भक्षस्य पशोः

P.T.O

P-T.O

136 मांसं वैष्कम्। तमुपयुंजीत, अपिशब्दो गर्हा-
यां ततश्चापद्येवोपयोजयेत्।

सू॰ नफालकृष्टमधितिष्ठेत्॥

137 अरण्येपि फालकृष्टं प्रदेशं नाक्रामेत्।
आवासं तत्र न कुर्यादित्यर्थः। नाक्रामेदिति
सिद्धे नाधितिष्ठेदिति वचनं प्रमादादाक्रमतो
दोषाभावज्ञापनार्थम्। कृष्टमिति सिद्धे
फालग्रहणं क्षेत्रसमीपे वासप्रतिषेधार्थम्।

सू॰ ग्रामं च न प्रविशेत्॥

अफालकृष्टेनापि मार्गेण जनावासं न प्रवि-
शेत्। च शब्दात् ग्रामांतरमपि।

सू॰ जटिलः चीराजिनवासः॥

जटिलः केशी जटीऽव स्यादिति नियमा-
र्थ आरंभः। चीरं दर्भादिनिष्पन्नं इदं
अधोवासो ब्रह्मण्यम्। अजिनं चर्म
उत्तरीयमिदम्। तथाच स्मृत्यंतरम्—

138 चीरवासाः अजिनोत्तरीयश्चेति सांवत्सरं भुंजी-
त । मूलफलमपि गतसंवत्सरं न भुंजी-
त । तथात्र मनुः —:
"त्यजेदाश्वयुजे मासि" इत्यादि । एवं च संव-
त्सरमात्रं निचयः सिद्धः ॥

वैखानसस्योक्त्वा इदानीमेकीयमतेनाश्रम-
बाधापक्षं वक्तुं आह :—

सू॰ ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात्
गार्हस्थ्यस्य गार्हस्थ्य ॥ स्य

ऐकाश्रमे भवं ऐकाश्रम्यं तु शब्दोऽवधारणा-
र्थः । गार्हस्थ्यस्येति कर्मणि षष्ठी । गार्हस्थ्य
मेवाचार्या इच्छंति । कुतः प्रत्यक्षवि-
धानात् । उपलब्ध श्रुति विधानादित्यर्थः ।
यद्यपि गृहस्थो भवेदित्येवं न विहितः ।
139 तथापि अग्निहोत्रादि गृहस्थसाध्यक्रिया
विधानादाश्रयस्येदं द्रष्टव्यम ॥ ओम् ॥

P.T.O

139 इति श्रीगौतमीय स्मृतिविवरणे
मस्करी कृते
तृतीयोऽध्यायः॥

ओं ॥ ब्रह्मचर्यादीनां धर्माः उक्ताः। सांप्रतं
गृहस्थस्य धर्मा वक्तव्या इत्यत आह।
सू० गृहस्थः सदृशीं भार्यां विन्देतान-
न्यपूर्वां यवीयसीम्
140 गृहस्थ इति भाविन्या संज्ञया व्यपदेशः
स्नातकस्य यावत्पाणिग्रहणं तावदवि-
रुद्धस्य गृहस्थ धर्मस्य प्रवेशार्थः।
सदृशीं जात्या न कुलतः। विद्या प्रणष्टा-
पुनरभ्युपैति जाति प्रणाशे त्विह सर्वना-
शः। कुलापदेशेन हि याति पूज्या त-
स्मात् कुलीनां स्त्रियं उद्वहेतेति। स्मृत्यं-
तरे उत्कृष्टकुलायाऽवाप्यधिवेदन अव-

P.T.O

P.T.O

140 णात। भार्यां भरणीयां लक्षणयुक्तामित्य-
र्थः। विन्देत याचेत, अनन्यापूर्वां मन्यस्य
वाचाप्यदत्तामित्यर्थः। यवीयसीं आत्म-
नो हीनवयसीम्। अस्यापवादः असम-
मान प्रवरैर्विवाहः, समान प्रवरत्वं समा-
नार्षेयता तदभाव असमानप्रवरत्वम्।
141 तैरसमानप्रवरैस्सह विवाहः कर्तव्य इत्यर्थः।
असमानप्रवरैरिति वक्तव्येऽ एवमभिधानं यदि
मातृतः सगोत्राभवति तदानीम् दोषाभाव
ज्ञापनार्थम्। एवं च पितृपक्षत एव स-
गोत्र प्रतिषेधः। तथाच मनुः —:
"असपिण्डा च या मातुः असगोत्रा च या पितुः"।
इत्यादि ॥

सू- ऊर्ध्वं सप्तमात्पितृबंधुभ्यः॥
पितृबांधवाः पितुर्मातुल भगिन्यादयः तेभ्यः सप्त-
मादूर्ध्वं विवाहः कर्तव्यः, अष्टमात्प्रभृति विवाहः-

141 कर्तव्य इत्यर्थः।

सू. बीजिनश्च ॥.

ऊर्ध्वं सप्तमादित्यनुकर्षणार्थश्चकारः। बीजं
यत्परक्षेत्रे उप्तं तस्य जातिमात्राद्वेत्यनेनास-
142 मान प्रवरत्वेन प्राप्तौ सत्यां प्रतिषेधः॥

सू. मातृबंधुभ्यः पंचमात् ॥.

ऊर्ध्वं विवाहेति वर्तते मातृबांधवाः मातुल-
मातृस्वस्त्रादयः। तत्र पंचमादूर्ध्वं विवाहः
कर्तव्यः। इदानीं विवाहविधिमाह ॥

सू- ब्राह्मो विद्याचारित्रबंधुशीलसंपन्नाय-
दद्यादाच्छाद्यालंकृताम् ॥

ब्राह्म इति विवाहसंज्ञा, विद्या त्रयी, चारित्रं चो-
दितकर्मानुष्ठानम्, बंधुः प्रशस्ताभिजनः। शीलं
धर्मप्रावाभिमुख्यम्। संपन्नशब्दः प्रत्येकमभि-
संबंध्यते। आच्छाद्य वस्त्रयुगलेन वरमलंकृ-
~~तम्~~ तां भूषणादिभिः दद्यादुदकपूर्वेण।

143 आच्छाद्यालंकृतामित्युत्तरस्मिन्नपि विवाहत्रये

द्रष्टव्यम् ॥ त्ये [मिति ॥

सू॰ संयोगमंत्रः प्राजापत्ये सहधर्मश्चर्यता-

प्राजापत्य इति विवाहसंज्ञा। तस्मिन् प्राजापत्ये-

विवाहे, संयोगार्थो मंत्रः संयोगमंत्रः, तस्मिन्

प्रदान काले उक्त्वा दद्यात् सहधर्मश्चर्यतामिति।

सू॰ आर्षे गोमिथुनं कन्यावते दद्यात् ॥

आर्ष इति विवाहसंज्ञा तस्मिन् पूर्वं वरेण गो-

मिथुने दत्ते पश्चादाच्छाद्यालंकृतां दद्यात्।

सू॰ अंतर्वेद्यृत्विजे दानं दैवः ॥

अंतर्वेदीति प्रक्रांत यज्ञग्रहणार्थम्। ऋ-

त्विक् श्वशुर इत्यादौ क्रियोत्तरकालमपि

ऋत्विज इति व्यवहार दर्शनात्तन्निवृत्त्यर्थं दक्षिणा-

144 कमिति ज्ञापनार्थं दानग्रहणम्। दैव-

इति विवाहसंज्ञा ॥

सू॰ अलंकृत्येच्छंत्याः स्वयंसंयोगो गांधर्वः ॥

144 अलंकृत्य स्वयमेवात्मानं वक्ष्यति। उत्सृज्य पित्र्या-
नलंकारानिति तद्विषयमेवैतदिति। इच्छंत्या: का-
मयमानाया: स्वयमेव वरेण संयुज्येत। सगांधर्वो
नाम विवाह:॥

सू. वित्तेनानतिस्त्रीमतामासुर:॥

यत्र धनदानेनानमनं कन्यावतां क्रियते स आसु-
रो नाम विवाह:। कन्यावतामिति वक्तव्ये स्त्रीग्र-
हणं कन्यादान फलनिवृत्त्यर्थम्।

सू. प्रसह्यादानाद्राक्षस:॥

145 यत्र विक्रमेणादानं स राक्षस:।

सू. असंविज्ञातोपसंगमान्नपैशाच:॥

यत्र अज्ञातां कन्यां सुप्तां मत्तां प्रमत्तां वा
अन्यव्यापारे वा सक्तामुपगच्छेत् स पैशा-
चो नाम विवाह:। उपगमनशब्द: उपगम-
नार्थेष्वालिंगनादिषु द्रष्टव्य:। क्षतयो-
न्या: संस्काराभावात्। यथाह मनु:-

145 "पाणिग्राहणिका मंत्राः कन्यास्वेव प्रतिष्ठिताः"
इति। (चत्वारो धर्म्याः प्रथमाः।)
सू. चत्वारो धर्म्याः प्रथमाः॥
अर्थाः चत्वार एव धर्म्याः, धर्मादनपेताः। आद्याः इति वक्तव्ये प्रथमग्रहणं यो यः प्रथमः स स प्रशस्त इत्येवमर्थम्। ततश्च पूर्वस्याभाव एव उत्तरोत्तरो द्रष्टव्यः॥

146 सू. षडित्येके॥
एके तु गांधर्वासुरावपि धर्म्यौ मन्यन्ते। तथाच वसिष्ठः— "षड्विवाहाः ब्राह्मो दैव आर्षो गान्धर्वः (क्षात्रो) मानुष आसुरः" इति। एवं च राक्षसपैशाचौ अत्यंत निकृष्टौ चोदना सामर्थ्यात् पूर्वस्याऽभावे द्रष्टव्यौ॥
इदानीं तासु प्रजातानां पुत्राणां विशेषार्थमाह—
सू. अनुलोमाऽनंतरैकांतरद्व्यंतरासु जा-

ता: सवर्णाम्बष्ठोग्रनिषाददौष्यंतपारशवाः॥

अनुलोमाः वर्णानुपूर्व्येणोत्पन्नाः। ब्राह्मण-

147 स्यानन्तराः क्षत्रियाः, ऽएकांतराः वैश्याः,

द्व्यंतराः शूद्राः, क्षत्रियस्यानंतराः वैश्याः,

ऽएकांतराः शूद्राः, तस्य द्व्यंतरा नास्ति। वैश्य-

स्यानंतराः शूद्राः ऽएकांतरा तस्य नास्ति।

ततश्च ब्राह्मणेनानंतरायां जातः सवर्णः। क्षत्रि-

येणानंतरायां जातोऽम्बष्ठः। वैश्येनानन्तरायां

जातो उग्रः। ब्राह्मणेन ऽएकांतरायां जातो निषादः।

क्षत्रियेणैकान्तरायां जातो दौष्यंतः। ब्राह्मणेन-

द्व्यंतरायां जातः पारशवः॥

सू. प्रतिलोमाः सूतमागधायोगवक्षत्तृवैदेहक

चण्डालाः॥

प्रातिलोम्येनोत्पन्नाः प्रतिलोमाः। तासु अनन्त-

148 रैकान्तर द्व्यंतरास्वेव। क्षत्रियस्यानन्तरा ब्राह्मणी,

वैश्यस्यानंतरा क्षत्रिया, शूद्रस्यानंतरा वैश्या॥

148 वैश्यस्यैकांतरा ब्राह्मणी। शूद्रस्य क्षत्रिया। शूद्र-
स्य द्व्यंतरा ब्राह्मणी। क्षत्रियस्यानंतरायां जातः
सूतः। वैश्यस्य मागधः। शूद्रस्यायोगवः।
वैश्यस्यैकांतरायां जातः क्षत्ता। शूद्रस्यैकांतरा-
यां जातः वैदेहकः। शूद्रस्य द्व्यंतरायां जातः चं-
डालः। एवं तावत् गौतममतम्॥

इदानीमन्येषां मतेन संज्ञाभेदमाह —

सू. ब्राह्मण्यजीजनत्पुत्रान्वर्णेभ्य
आनुपूर्व्यात् ब्राह्मणसूतमागधचंडालान्॥

ब्राह्मणी जनितवती ब्राह्मणादिभ्यो वर्णेभ्यः आ-
नुपूर्व्यात् ब्राह्मणात् ब्राह्मणं, क्षत्रियात्सूतं,
149 वैश्यात् मागधं, शूद्राच्चण्डालम्। संसारस्या-
नादित्वं प्रदर्शनार्थमजीजनदिति भूत
निर्देशः॥

सू. तेभ्य एव क्षत्रिया मूर्धावसिक्त-
क्षत्रियधीवरपुल्कसान्॥

149 अजीजनदिति, आनुपूर्व्येणेति च वर्तते। तेभ्य
एव ब्राह्मणादिभ्यः आनुपूर्व्येण क्षत्रिया
अजीजनत्, जनितवती। क्षत्रियायां ब्राह्म-
णाज्जातः मूर्धावसिक्तः। क्षत्रियायां क्षत्रि-
याज्जातः क्षत्रियः। वैश्यात्क्षत्रियायां जातः
धीवरः। शूद्रात् क्षत्रियायां जातः पुल्क-
सः॥

सू. तेभ्य एव वैश्या भृज्यकंठमाहिष्य
वैश्य वैदेहकान्॥

अजीजनदानुपूर्व्येणेति च वर्तते। एवं
150 वैश्यायां ब्राह्मणाज्जातः भृज्यकंठः।
वैश्यायां क्षत्रियाज्जातः माहिष्यः। वैश्या-
यां वैश्याज्जातः वैश्यः, वैश्यायां शूद्रा-
ज्जातः वैदेहकः॥

सू. पारशवयवनकरणशूद्रान् शूद्रेत्येके॥
एतेभ्य एवानुपूर्व्यात् शूद्राज्जनितवती। शूद्रायां-

150 ब्राह्मणाज्जातः पारशवः, क्षत्रियाद्यवनः, वैश्या-
त्करणः शूद्राच्छूद्रः इत्येवं संज्ञाभेदेन
एके आचार्या वर्णयंति। एकीयमतेन संज्ञा-
भेद कथनैन च देशान्तरेष्वेतत्संज्ञोपलब्धावपि-
न जातिभेदो मंतव्य इत्येवमर्थः॥

एषामपि च।—

151 सू. वर्णान्तरगमनमुत्कर्षापकर्षाभ्यां सप्तमेन॥
वर्ण शब्देन उत्पादकं बीजमुच्यते। यो वर्णः उत्पा-
दकः तद्वर्णत्वं भवतीत्यर्थः। सप्तमेन युगपरि-
वर्तनेन अंतर शब्देन क्षेत्र मुच्यते। ततश्च
क्रमेण द्रष्टव्यम्। उत्कर्षेणोत्पादकवर्णत्वं
अपकर्षेण क्षेत्रवर्णत्वमिति। ततः स्त्रीतः
उत्कर्षो मंतव्यः। पुरुषादपकर्षश्च। तद्यथा
ब्राह्मणेन क्षत्रियायां मूर्धावसिक्तो जायते।
सः क्षत्रियाया संबध्यमानः क्षत्रियएव
भवतीति अपकर्षः। सापि मूर्धावसिक्ता-

151 तत्रोत्कृष्टबीजगुणां ब्राह्मणेनैव दुहितरमुत्कृष्टबी-

152 जगुणां जनयति। सोऽपि ब्राह्मणेनैवेत्येवं सप्तमे-
युगे ब्राह्मण्येव भवतीति उत्कर्षः। तथा-
मूर्धावसिक्तो जायते। सः क्षत्रियया
ब्राह्मणेन क्षत्रियायां संबध्यमानः पूर्ववत्क्षत्रि-
अप
यएव भवतीति कर्षः। एवं शूद्रापत्या-
दावपि सर्वत्र द्रष्टव्यम्॥ तथा च मनुः
"शूद्रायां ब्राह्मणजातः श्रेयसा चेत् प्रजायते।
अश्रेयांच्छ्रेयसीं जातिं प्राप्नोत्यासप्तमाद्युगात्"॥
"शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्।
क्षत्रियाज्जातमेवं तु विद्याद्वैश्यात्तथैव च"॥
इति॥

सू- पञ्चमेनाचार्याः॥

पंचमएव युगपरिवर्तने वर्णान्तरगमनं भवतीति
इदमपि
केचिदाचार्या वर्णयंति। कृताद्यपेक्षया द्रष्टव्यम्॥

सू. सृष्ट्यंतरजानां च॥

153 सृष्टिः चत्वारो वर्णाः। तदन्तरं मूर्धावसि-

153 न्तादि, तेषां जाताः सृष्ट्यंतरजाः। वर्णां-
तरगमनमुत्कर्षाभ्यां ऽपकर्षाभ्यां सप्त-
मेनाचार्या इत्यस्यानुकर्षणार्थ श्चकारः।
ततश्च तत्रापि अनुलोम प्रतिलोमान् कल्प-
यित्वा उत्पादकक्षेत्र जात्यंतरगमनैस्सृष्ट्यै॥
॥

सू· प्रतिलोमास्तु धर्महीनाः॥
तु शब्दः विशेषार्थः सृष्टिरपि प्रतिलो-
माज्जातः सूतादिः धर्महीनः तदन्तरे प्रतिलो-
माज्जातो विशेषेणेति। धर्मशब्देन उपनयनमुच्य-
ते। द्वावंच अनुलोमजानां उपनयनं सिद्धम्। वेदा-
ध्ययनेतु प्रतिषेधो द्रष्टव्यः। कुतः - अनुलो-
154 मानामुपनयनमेव, न वेदाध्ययनं, न पंचयज्ञं,
नौपासनं, नाग्निहोत्रं, न समित्कार्यं, न
संध्योपासनं, उपनयनमपि तूष्णीमेव", इत्या-
दि स्मृत्यंतर दर्शनात्॥

154 केचित् चकारं न पठंति। तेषामुत्तरसूत्रात् "शूद्रायाँच" इत्यतः चकारमध्याहृत्य योजनीयं ~~सृष्टिय~~ सृष्ट्यंतरजानां" इत्यस्मिन् सूत्रे। अपरे सृष्ट्यन्तरजानां प्रतिलोमास्तु धर्महीनः इत्येकमेवेदं सूत्रमिति व्याचक्षते। सर्वत्र व्याख्यानं तुल्यमेव॥

सू. शूद्रायाँच॥

अनुलोमानामपि शूद्रायां जातः उपनयनादिरहितः। ऽव सवर्णांबष्ठनिषादानामेवो-

155 पनयनम्। तथाच स्मृत्यन्तरे:—

~~सवर्ण~~ "सवर्णमुपनीय धनुर्वेदं शिक्षयेत्" अंबष्ठमुपनीय वैद्यशास्त्रं, निषादमुपनीय हस्तिशिक्षां, शिक्षयेत्" "अन्येषामुपनयनाभावः" इति। केचिदम्बष्ठायां सवर्णाज्जातमुपनीय अग्निनृत्तं शिक्षयेदिति वर्णयंति। अंबष्ठमुपनीय वैद्यशास्त्रमिति इच्छंति।

155 उग्रादयो वृत्तिविशेषेण ज्ञातव्याः इति। उग्रो हंता व्यालमृगादीनां, दौष्यन्तो मत्स्यघातकः, पारशवः भद्रकालीपूजकः, सूतो हयशिक्षकः, मागधो वणिक्पथसेवी, पद्रकृद आयोगवः, क्षत्ता चाक्रिक, सऽाव लवणविक्रेता, वैदेहकः अजपालः इत्यादि ॥

सू॰ असमानायां च शूद्रात्पतितवृत्तिः ॥

156. उत्कृष्टायां शूद्राज्जातः पतितवत्स्पर्शन प्रतिग्रहादौ वर्जनीय इत्यर्थः ॥.

सू॰ अन्त्यः पापिष्ठः ॥

शूद्रेण ब्राह्मण्यां जातः पापतमः(पिष्ठः)। अतः सोऽत्यन्तं परिहर्तव्यः। तथाच स्मृत्यन्तरम्—"चण्डालमार्गात् वालव्यजनादि गच्छेत्" इत्यादि।

तत्रानुलोमानामुपनयन विधानात्, अन्यायेनोत्पन्नानां तदयोग्यत्वात्, यद्यपि सदृशीं भार्यां विन्देतेत्यत्र समानजातिरेव चोदितः

156 तथापि प्रथमनिर्दिष्टस्य निकृष्टजातिष्वपि
क्रमेण विवाहोऽस्तीति ज्ञापयति। तथाच
वसिष्ठः—: "तिस्रो ब्राह्मणस्य भार्या
157 वर्णानुपूर्व्येण, द्वे राजन्यस्य, एकैका
वैश्य-शूद्रयोरिति"। "प्रतिलोमशूद्राभ्यां-
जातो धर्महीनः" इति वक्तव्ये 'शूद्रायां
च' इति पृथक् सूत्रकरणात् शूद्राविवाह-
स्यापि कथंचिद्योग्यतां दर्शयति। तच्च
प्रथममुत्तमजातिषूत्पन्नपुत्रस्य कामिनः
शूद्राविवाहोऽपि मंत्रवर्जो द्रष्टव्यः। तथाच वसि-
ष्ठः— "शूद्रामप्येके मंत्रवर्जम्" इति। तत्रा-
पि शब्दस्य निंदार्थत्वात्, उत्पन्नपुत्रस्येति.
तत्रार्थः। 'प्रतिलोमास्तु धर्महीनाः' इत्यनेन
निकृष्टस्योत्तमविवाहाभावं दर्शयति। तथाच -
वसिष्ठः—:
"एवमेते समास्तु ये केचित्प्रातिलोम्य गुणाश्रिताः।

157. गुणाचारपरिभ्रंशात् कर्मभिस्तान् विजानीयुः"॥

158 इत्यादि। वर्णोत्पन्नत्वेन प्रातिलोम्येन

विवाहाभावः उक्तः इति तत्रार्थः॥

विवाहविधिं च पुत्रोत्पादनविधिं च उक्त्वा इदानीं

विवाहस्तुत्यर्थमाह —:

सू. पुनन्ति साधवः पुत्राः ॥

पुनन्ति दुःखात् त्रायन्तीत्यर्थः। तथा च व्यासः—

"पुदिति नरकस्याख्या दुःखं च नरकं विदुः।

पुदि त्राणात्ततः पुत्रं इहेच्छन्ति परत्र च"॥ इति॥

साधवः विवाहेनैवोत्पन्नाः तस्माज्जारत्वेन वा

प्रातिलोम्येन वा पुत्रोत्पादनं न कर्तव्यम्। पुत्राः

शिक्षिताः। कुतः। "तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः"

इति श्रुतेः॥

सू. त्रिपुरुषमार्षात् ॥

159 आर्षविवाहोढायां जातः पित्रादि पुरुषत्रयं नरकादु-

द्धरतीत्यर्थः।

159. सू. दश दैवात् ॥

दैव विवाहोत्पन्नो दश पुरुषान् ॥

सू. दशैव प्राजापत्यात् ॥

उभयत्र दशेति माभूदित्येवमर्थम् "प्राजापत्याद्"
इति नोक्तम् । एव शब्दो विस्पष्टार्थः ॥

सू. दश पूर्वान् दशापरान् आत्मानं च ब्राह्मीपुत्रो -
ब्राह्मीपुत्रः ॥

ब्राह्मविवाहोत्पन्नो ब्राह्मः पुत्रः अतिक्रान्तान् दश,
भविष्यांश्च दश पुनाति । उपन्यास क्रमं विहाय व्यु-
त्क्रमेण फलाभिधानं कन्यादातुरपि फलभू-
यस्त्व प्रदर्शनार्थं, यथा जाबालि श्रुतिः—
"यस्संपन्नाय पुत्रीं दद्यात् सोऽग्निष्टोम फलमाप्नोति"
160 इति । तथा कौषीतक ब्राह्मणमपि—"तस्य पुत्राः
दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृ-
त्याम्" इति ॥

इति मस्करीये गौतमभाष्ये चतुर्थोऽध्यायः ॥

ओम्.

160 पंचमोऽध्यायः ॥

ओम् ॥ अपत्योत्पादनार्थं कर्मार्थं च भार्या-
परिणयनमुक्तम् । तत्र पूर्वं अपत्योत्पादन
विधिमाह ।——

सू. ऋतावुपेयात् ॥

ऋतुर्गर्भग्रहणसामर्थ्येन स्त्रीगतेनोपलक्षितः
कालः । सः षोडशाहोरात्रः । तथाच मनुः ——
161 "ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ।
चतुर्भिरितरैस्सार्धमहोभिः सद्विगर्हितैः" ॥
इति । तस्मिन् उपेयात् उपगच्छेत्, प्रकृतां-
भार्यां, प्रहर्षयन् न तु पशुवत्, उपोपसर्ग-
योगात् ।

नायं विधिः कामतः एवार्थप्राप्तत्वात् । नाऽ
पि नियमः । कोऽसौ नियमः? अयं नियमः
पक्षे प्राप्तस्य पुनर्वचनं नियमः, इच्छातः
प्रवृत्तिः, ऋतौ गमने चागमने च प्रा—

161 प्र ऋतावुपेयादेवेति। अस्मिन् पक्षे गृहीतेऽ
नृतौ न विधिः न प्रतिषेध इति प्रवृत्तिरे-
व भवति मरीच्यादिवत्। मरीचं भक्षयेत्
न भक्षयेद्वेति न क्वचिद्धर्मशास्त्रे श्रूयते। तथा-
पि शिष्टा भक्षयंति तद्वदत्रापि प्रवृत्तिरेव
162 भवतीति "सर्वत्र वे"त्यस्यानारंभः प्राप्नोति,
अगमने प्रायश्चित्तं च। ननु चोभयमपीष्यते,
यत्र तु प्रीत्युपलब्धितः प्रवृत्तिः न तत्र शास्त्र-
मस्ति, तदनुवर्तमानो नरकाय राध्यतीति इच्छा-
तः प्रवृत्तौ नरकपातश्रवणात्तन्निवारणा-
र्थः, 'सर्वत्र वा' इत्यस्यारंभः। स्मृत्यन्तरे
अगमने प्रायश्चित्तं श्रूयते।
"ऋतुस्नातां तु यो भार्यां सन्निधौ सन्नोपगच्छति।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः"॥
इति॥ नैतदेवं। "यत्र तु प्रीत्युपलब्धितः प्रवृत्तिः"
इत्यादेस्तावदयमर्थः। यत्र यस्मिन्ननुष्ठाने प्री-

162 – त्युपलब्धितः प्रवृत्तिः फलं ज्ञात्वा तत्प्रीत्या
प्रवृत्त्या प्रवृत्तिः फलाभिसंधिना प्रवृत्तिरित्य
र्थः। तस्यां प्रवृत्तौ न शास्त्रमस्ति अत्यंतं
न फलेतीत्यर्थः। तदनुवर्तमानः फलाभि-
संध्या अनुष्ठानं कुर्वन् नरकाय राध्यति। नरकं
गच्छतीति। संध्योपासनादेः फलाभिसंधित्या-
गेनानुष्ठानार्थमिदं वचनम्। तथाच भगवान्वा-
सुदेवः 'मा कर्मफलहेतुर्भूः' इत्यादि। यदि
सर्वत्र प्रीतिप्रवृत्तिनिवारणं स्यात् तदानीं मरीचा-
163 दीनामपि शास्त्रं वक्तव्यम्। शास्त्रेण विना
नरकपतनं संभवतीति। तस्मात् 'सर्वत्र वा'
इत्येतदपि शास्त्रेणानुग्रहार्थं न वक्तव्यम्।
(यच्चोक्तं) तर्हि ऋतावुपगमनमकुर्वतः दोषाभावः
प्राप्नोतीति सदोषइतिचेन्न अस्माभिरपि दोषा-
भावस्येष्यमाणत्वात्। दावमपि पुत्रार्थिनः
अनृतौ गमनं कुर्वतः प्रायश्चित्तं प्राप्नोति –

163 सदोष इति चेन्न तथैव परिसंख्याफलत्वात् ।
येषां शास्त्रप्राप्तस्य पुनर्वचनं परिसंख्येति तेषाम-
प्युपपद्यते ऽतत् । यथा जातपुत्रोऽग्नीनादधी-
त त्रिभिर्ऋणैर्वा न जायते इत्यादि श्रुतेः,
"पुनंति साधवः पुत्राः" इति च स्मृतेः पुत्रोत्पाद-
नार्थं गर्भग्रहणसामर्थ्यादृतावेव गमने प्राप्ते
164 पुनरिदं वचनं अनृतकालप्रतिषेधपरं विज्ञा-
यत इति । तस्मात्परिसंख्यैवेयं यदुपेयादृ-
तावेवेति । ननु च यदि पुत्रार्थं गमनं तदा
उत्पन्नपुत्रस्य न प्राप्नोतीति । उच्यते । बहु-
पुत्रस्याभीष्टत्वात् । यथाह शङ्खः —
'पुत्रपौत्रप्रतिष्ठस्य बह्वपत्यस्य जीवतः' इत्या-
दि । तथा च श्रुतिः 'दशास्यां पुत्रानाधेहि
पतिमेकादशं कृधि' इति । तस्मात् परि-
संख्यार्थमिदं सूत्रमिति स्थितम् ॥

सू. सर्वत्र वा प्रतिषिद्धवर्जम् ॥

164 पर्वादीनि प्रतिषिद्धानि । यथाह मनुः —
अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम्
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥
165 इति । वाशब्दो व्यवस्थितविकल्पार्थः । अन्ये तु
व्याचक्षते 'ऋतावुपेयादि'त्यनेन ऋतावेव सकृ-
द्गमनं चोद्यते । 'सर्वत्र वे'त्यनेन सर्वस्मिन् काले
सकृद्गमनमिति । तदयुक्तं 'ऋतावुपेयात्
द्विरेकतो वा अनृतौ कामतः' इति काठकश्रुतिदर्शनात् ॥

सू. देवपितृमनुष्यभूतर्षिपूजकः ॥

इति पंच महायज्ञाः । तत्र देवपूजकशब्देन वैश्व
देवमुच्यते । (पूज्या) पितृपूजक इति पित्रर्थंऽप्येकं ब्राह्मणं
भोजयेन्नित्यमिति । तथा च मनुः —
एकमप्याशयेद्विप्रं पित्रर्थं पांच यज्ञिके ।
न चैवात्राशयेत् कंचित् वैश्वदेवं प्रति द्विजम् ॥
इति ॥ अन्नासंभवे पयो दद्यात् । तदसंभवे
166 मूलं; तदसंभवे फलं, सर्वासंभवे उदकम् ।

166 तथाच मनुः

"दद्यादहरहः श्राद्धं अन्नाद्येनोदकेनवा ।
पयोमूलफलैर्वाऽपि पितृभ्यः प्रीतिमावहन्" ॥ इति
तत्रापि सर्वासंभवे उदकमिति द्रष्टव्यम् । मनुष्य-
पूजक इति अतिथिपूजनमुच्यते । तत्राप्यन्नासंभ-
वे आसनार्थं तृणं दद्यात् । संवेशनार्थं भूमिं, शीता-
पनोदनार्थं अग्निं, पंकापकर्षणार्थं उदकं मधुरां-
च वाणीम् । यथाह वसिष्ठः — 'तृणभूम्यग्न्यु-
दकवाक्सूनृतानसूयाः सतां गेहेषु नोच्छिद्यंते
167 कदाचन ' इति । स्वयमपि च वक्ष्यति अतिथिपूजनम् ।
तच्चेषः वसिष्ठोक्तः द्रष्टव्यः ।

भूत पूजक इति वैश्वदेवान्तरकालं दिग्दे-
वताभ्यो यत् बलिहरणम् । ऋषिपूजक इति नित्यस्वाध्या-
यः । अग्नि परिग्रहात् प्रागेषामभिधानं अनग्निक-
स्यापि लौकिकेऽग्नौ प्राप्त्यर्थम् द्रष्टव्यम् । तथाऽवकीर्णि-
होमश्च ॥

16) स्र. नित्यस्वाध्यायः ॥

नित्यस्वाध्याय इति ब्रह्मयज्ञोऽभिधीयते। पूर्व-
मृषिपूजक इत्यनेनाभिहित एव इतरानुष्ठानाश-
क्तावपि नित्यमेव गुणेनैव कर्तव्यः (प्रकिगुणोपि) ।
पूर्वोक्तेनैव प्रकारेण ऋषियज्ञ इति वक्तव्ये
स्मृत्यंतरोक्तस्य विधेः प्रापणार्थमेव मभिधा-
नम्। तथाचाह उशनाः —: 'अथ ब्रह्मयज्ञे दर्भे-
ष्वासीनो दर्भान् धारयमाणः प्राङ्मुख उदङ्मु-
खो वा प्रणवव्याहृतिसावित्रीपूर्वकं वेदाना
मेकदेशं पठेत्। वेदानामादिं वा ऋग्यजुस्सा
म्नामेकं वा त्रिर्वा प्रणवमैतिहासिकश्लोकं वा
समाहितः इत्यादि ॥

स्र. पितृभ्यश्चोदकदानम् ॥

चकाराद्देवतानामृषीणां च। उदकमिति सिद्धे
दानग्रहणं तर्पणपूर्वत्वज्ञापनार्थम्। तत्पूर्वकत्वादु-
दकदानस्य। तथाच स्मृत्यन्तरं ——

"देवतानामृषीणां च तर्पयित्वा समाहितः।
पश्चाद्दद्यात् पितृणां च स्वधापूर्वं तिलैस्सह"॥
इति॥ नित्यं पितृभ्यः उदकदानस्योदनयैव
अहरहः श्राद्धमपि अर्थात्सिद्धं तत्पूर्वकत्वा-
169 दुदकदानस्य। तथा च मनुः—
"नित्यं स्नात्वा शुचिः कुर्यात् देवर्षिपितृतर्पणम्"॥
इति॥ पितृभ्य उदकदानं द्विविधम्। यदप्सु दीयते
यदाकाशे चेति। ननु च भूम्यामेव चोद्यते नाप्सु।
यथाह भृगुः—
"नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना।
नोपतिष्ठति तत्तोयं यद्भूम्यां न प्रदीयते"॥
इति॥ तथा च बृहस्पतिः—
"उदके नोदकं दद्यात् पितृभ्यस्तु कदाचन।
उत्तीर्य तु शुचौ देशे कुर्यादुदकतर्पणम्"॥
इति॥ नैतदेवं स्मृत्यन्तरे— विरुद्धविधा-
नाद्विषयभेदकथनाच्च। यथाहोशनाः—

170 "आपो देवगणास्सर्वे आपः पितृगणास्स्मृताः।
तस्मादप्सु जलं देयं पितॄणां दत्तमक्षयम्"॥
इति॥ तत्र कात्यायनोपि षड्विभागमाह —
"देवतानां पितॄणाञ्च जले दद्याज्जलाञ्जलिम्।
असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलिम्"॥
इति॥ तर्पणादुदकदानान्तमुभाभ्यां हस्ताभ्यां
द्रष्टव्यम्। उदकदाने तावन्न दोषः। जलां
जलिमिति वचनात्। तर्पणे तु नोपपद्यते।
नैकपाणिनेत्यस्य विरुद्धवाक्यश्रवणात्।
यथाह भृगुः —
"उभाभ्यामपि हस्ताभ्यां उदकं तर्पयेद्द्विजः।
171 सम्मूढो नरकं याति कालसूत्रमवाक्छिराः"॥ इति॥
चेन्नैष दोषः विषयविभागवाक्यश्रवणात्। यथा-
ह बृहस्पतिः —
"आचद्धे सेचनकाले चेत् ऽकपाणिं प्रदापयेत्।
तर्पणे तूभयं कुर्यादेष धर्मः सनातनः॥" इति॥

(क) (उदकं)
171 तस्मादेवमप्स्वेव चोद्यते । आकाशे यच्चोद्यते तदप-
रम् । तत्राह भृगुः —

"नाभिमात्रे जले स्थित्वा चिंतयेदूर्ध्वमानसः ।
आगच्छंतु मे पितरः इमां गृह्णंत्वपोंजलिम् ॥
त्रिस्त्रिरंजलिमाकाशे उच्चैरुच्चतरं बुधः ।
उत्क्षिप्योत्क्षिप्य क्षिपेद्वारि वाग्यतो दक्षिणामुखः ॥
पितॄणां स्थानमाकाशं दक्षिणादिक् तथैव च ।
172 तस्मात्तत्र सदा देयं पितॄणां स्यात्तदक्षयम् ॥"

इति ॥ पितॄणां यत्क्रियते तत्सर्वं तिलैर्दर्भैश्च-
सह द्रष्टव्यम् । तथा चाह भृगुः —

"तिलदर्भयुतं वारि स्वधया यत्प्रदीयते ।
तत्सर्वममृतं भूत्वा पितॄणामक्षयं भवेत् ॥"

इति ॥ तस्मात् (गवं) पितृभ्य उदकदानं कर्तव्यम् ॥

सू॰ यथोत्साहमन्यत् ॥

कृत्स्नयज्ञोदकदानाभ्यां अन्यद्यदपि शिष्टं
गृहस्थधर्मरूपं तद्यथाशक्ति कुर्यात् ।

172. उत्साहवचनात्। ततश्च मुख्यासंभवे अ-
मुख्येनापि कर्तव्यम्। उदाहरणं च "पयो
मूल फलैर्वापी"त्यादि॥

173 सू· भार्यादिरग्निर्दायादिर्वा॥

भार्याशब्देन विवाहो लक्ष्यते। अग्निशब्देन औ-
पासनं वैवाहिकाग्निमौपासनरूपेण धारयेदित्यर्थः।
केचिदेवं व्याचक्षते। जातकाग्नेरेव पारंपर्यागत-
स्य विवाहोत्तरकालं औपासनरूपेण धारणार्थमभि-
धानमिति। तदयुक्तम्। विवाहं कुर्वन् लौकिकमग्नि-
माधायेति गृह्यस्मृतेः। यदि जातकाग्निरागच्छ-
ति तदानीं तत्र लौकिकग्रहणं न करोति। ततश्चा-
विकृत्वात् जातकाग्निः त्यक्तव्य एव। यदा वा
अस्य भ्रातृभिः पित्रा वा सह विभागः तत्र
वाऽग्नि परिग्रहणं कुर्यात्। विवाहोत्तरकाल-
174 मपि द्रष्टव्यापेक्षया विकल्पः, कर्मणां द्रव्य-
साद्यत्वात्। यो हि द्रव्यवान् स विवाह-

174 काले परिगृह्णीयात्, निस्स्वो दायकाल इति ॥

केचिद्विवाहात्प्रागपि दायादमग्निं परिगृह्णीया-
दिति व्याचक्षते। तदयुक्तम्। "विधुरः पुनर्नि-
विष्टः पुनरग्निं च गृह्णीयात् अभार्यस्याग्न्य-
भावात्" इत्यादिस्मृत्यंतरदर्शनात्।

कथमवगम्यते स्मार्तस्यैव धारणं न श्रौ-
तस्येति? "जातपुत्रोऽग्नीनादधीत" इति श्रुतेः,
तत्राप्यग्नीनिति बहुवचन~~श्रवणात्~~
प्रयोगात् ॥

सू. तस्मिन् गृह्याणि ॥

तस्मिन्नेवौपासने गृह्याणि कर्माणि पुंसव-
नादीनि कुर्यात्। ग्रहणपक्षे इदम्। अगृ-
175 हीतपक्षे लौकिकाग्नावेव द्रष्टव्याणि ॥

सू. देवपितृमनुष्ययज्ञाः स्वाध्यायश्च ॥

देवयज्ञो वैश्वदेवः। पित्रर्थं ब्राह्मणभोजनं पितृ-
यज्ञः। मनुष्ययज्ञोऽतिथिपूजनम्। एतेषा-

175. मग्निसंबंधोऽपि वैश्वदेवस्य प्रसिद्धः। पितृ-
यज्ञस्य तद्भोजनार्थः पाकः, स्वाध्यायशब्दे-
न ब्रह्मयज्ञ उच्यते। तस्यैकीयमतद्वाऽग्निसं-
बंध इति विसमासः। तथाचाहोशना—
"उदकसमीपे अथ ब्रह्मयज्ञः" इत्यारभ्य
ब्रह्मयज्ञमुक्त्वा "अग्निसमीपे इत्येकेषाम्" इति।
176 एकेषां गृह्योक्त कर्मत्वादेव सिद्धमिति चेत्
न शङ्कानिवृत्त्यर्थत्वात्पुनरभिधानस्य। का
शंकेति चेत् देवयज्ञादीनां पूर्वं लौकिकेऽ
ग्नौ विधानात् तत्रैव तेषामधिकारः, नौ-
पासने। "तस्मिन् गृह्याणी"त्यनेना(भि)ति विहित-
तानां गृह्यकर्मणामेव ग्रहणं, तेषां पूर्वं
पृथगभिधानादिति कस्यचिदाशंका स्या-
दिति। एवंच तेषामुभयत्राधिकारः। तत-
श्चाग्निमतो(म)पि लौकिकाऽग्नौ कृते न दोषः।
~~[struck]~~ तथाच कारणाद्धनियमं (नदीयं) ?
. . . . . . - - - - - - - - -

176 [बादरायण] सूत्रम् = "अग्निमतोऽपि वचनेन
निषिद्धाः पंच यज्ञाः आहिताग्नेः" इति ॥.

सू० बलिकर्म ॥.

अनेन भूतयज्ञः उक्तः। आशंकानिवृत्त्यर्थमेवा
177 स्याभिधानम्। चकारः पूर्वसूत्रादधिक्रियते
तस्मिन्नेवेत्यनुकर्षणार्थः। वैश्वदेवानन्त
रमेव कर्तव्यं न पृथगित्येवमर्थं पृथक्
(पुनः) सूत्रकरणम्। तथा च गृह्यकारः "पूर्वं
देवानां हुत्वा पश्चाद्बलिं हरेत्" इति। पूर्ववद् भूत
यज्ञ इति वक्तव्ये ऽवमभिधानं वैश्वदेवात्पृ
थग्विधिसूचनार्थम्। ततश्च सिद्धस्यान्नस्य
वैश्वदेवार्थं भूतयज्ञार्थं च ऽकदेशो ~~विगृह्णीया~~
विगृह्णीयात्। तथा च जैमिनिः "अन्नस्य
बलीं वर्धयित्वा" इति द्विवचनं सायंप्रातः कर्त-
व्यार्थम्। (~~तथा च गृह्यस्मृतिः — सायंप्रात-~~
178 ~~वैश्वदेवं~~) कर्मग्रहणं वैश्वदेवस्यापि सायं-

178 प्रातः कर्तव्यमेव । तथाच गृह्य स्मृतिः —

सायं प्रातः बलिहरणं वैश्वदेवं चेति ।

अनुक्त गृह्यकाराणामपि सामान्येन प्रवेशना-

र्थमिदानीं वैश्वदेवमाह —

सू. अग्नावग्निर्धन्वन्तरिर्विश्वेदेवाः प्रजा-

-पतिस्विष्टकृदिति होमाः ॥

होमग्रहणादेव लभ्यमानस्याग्नेः सुसमिद्धेऽ-

ग्नौ होमार्थं पुनर्वचनम् । होमाइति बहुव-

चनमेकाहुति प्रतिषेधार्थम् । होमग्रहणं

च स्वाहाकार प्रदर्शनार्थम् । इतिकरणं

179 चतुर्थ्युपसंग्रहणार्थम् । विसमासो

मंत्र प्रसिद्ध्यर्थः । ततश्चाऽग्नये स्वाहा,

धन्वंतरये स्वाहा, विश्वेभ्यो देवेभ्यः स्वा-

हा, प्रजापतये स्वाहा, स्विष्टकृच्छब्दोऽत्र

अग्न्युपपदश्चतुर्थ्यंतो द्रष्टव्यः । अग्नये-

स्विष्टकृते स्वाहेति । ऽतावान् वैश्वदेवः ॥

179 इदानीं (भूत यज्ञं) बलिहरण विधिमाह —

सू. दिग्देवताभ्यश्च यथास्वम् ॥

पूर्वं दिग्देवताभ्यो बलिं हरेत्। इन्द्राग्नियम
निर्ऋति वरुणवायुसोमेशानानां प्राच्यादि
प्रदक्षिणं, ऊर्ध्वं विष्णुः, अधोऽनन्तः,
इंद्राय नम इति मंत्रोऽत्र द्रष्टव्यः। चशब्दात्
180 तत्पुरुषेभ्यश्च। ततश्चेन्द्रपुरुषेभ्यो नम
इत्यादि द्रष्टव्यम्। यथास्वं यथास्था-
नमित्यर्थः॥

सू. द्वार्षु मरुद्भ्यः॥

बहुवचनात्सर्वेषु मरुद्भ्यो नमः इति द्रष्टव्यः।
अत्र तत्पुरुषचोदना नास्ति, चकाराभा-
वात्॥

सू. गृहदेवताभ्यः प्रविश्य॥

प्रविश्येति वचनात् पूर्वं गृहाद्बहिः द्रष्टव्यम्।
ततश्च गृहाद्बहिःऽकस्मिन्प्रदेशे गोमयेन

180 मंडलं कृत्वा दिग्देवताभ्यो बलिहरणं कृत्वा
ततोऽन्ताह्याभ्यंतरेषु द्वारेषु बलिहरणं कृत्वाऽ
भ्यंतरमेव प्रविश्य गृहदेवदेवताभ्यो बलिं
181 हरेत् । ताः श्र्यादयः, यथा चाहोशनाः—:
"शयनस्य शिरस्थाने श्रियै नमः" इति दद्यात्, पादे-
स्थाने भद्रकाल्यै नम इति, कोष्ठागारे
धनपतये नम इति, स्तम्भनिलये रुद्राय नमः
इति, गोष्ठे मित्राय नमः इति, उलूखलमुस-
लयोः वरुणाय नम इति, कूपे अहये —
बुध्न्याय नमः इति, पेषण्यामग्निसमीपे
चैताभ्यो देवताभ्यो दद्यात् इति ॥

सू· ब्रह्मणे मध्ये ॥.

गृहमध्ये ब्रह्मणे नमः इति दद्यात् ॥

सू· अद्भ्यः उदकुम्भे ॥

अद्भ्यो नम इति उदकुंभे दद्यात्

सू· आकाशायेत्यन्तरिक्षे ॥

181 आकाय नम इत्यंतरिक्षे ऽङ्गण प्रदेशे दद्यात्।
182 इति शब्दः प्रकारवाची। ततश्च मृत्यवे -
नम इत्यन्नशालायाँ, अजायैकपदे नमः इति, -
फलकेषु च द्रष्टव्यः॥

सू॰ नक्तंचरेभ्यश्च सायम्॥.

सायं चेत् फलका बलिहरण दृष्ट्वं आकाशे।
नक्तंचरेभ्यो नमः इति दद्यात्। चकारः
पूर्वसमुच्चयार्थः। इतरथा नक्तंचरेभ्य
ऽव स्यादिति॥

सू॰ स्वस्ति वाच्य भिक्षादानमप्पूर्वम्॥
स्वस्तीति भिक्षुकं वाचयित्वा तत उदक
पूर्वमस्मै भिक्षादानं कर्तव्यम्। भिक्षादाने
स्त्रिया अधिकारात् तस्या ऽवश्याचित
त्वात् अतः तामेवं कारयेत् गृहस्थः। केचि-
द्व्याचक्षते वैश्वदेवानन्तरमेव विधाना-
183 दग्रे भैक्षस्यायं विधिः न सामान्यस्येति॥

183 तेषां पक्षे स्वस्तिवाचनमपि पुरुषेण कार-
यितव्यमिति द्रष्टव्यम् ॥

सू॰ ददातिषु चैवं धर्म्येषु ॥

ददाति शब्देन हिरण्यादि दानमुच्यते। धर्म-
ग्रहणान्मित्रादिभ्यो दृष्टार्थं दानम्।
तदेवमेवोदकपूर्वं दद्यात्। चकारादेवसि-
द्धे एवं शब्दः समस्तातिदेश प्रापणार्थः।
ततश्च यथा भिक्षादानं स्वीकृतमपि भर्तुर-
नुज्ञया प्रमाणं भवति तद्वद्धिरण्यादि
दानमपि प्रमाणं (प्रमाणं) भवति। तथा-
च नारदः——

"स्वीकृतान्यप्रमाणानि कार्याण्याहुरनापदि।
विशेषतो गृहक्षेत्र दान धर्माम्न विक्रियाः॥"
184 दातान्येव प्रमाणानि भर्ता यद्यनुमन्यते॥
इत्यादि। भिक्षादानमपि भर्तुरनुज्ञया विना
न कार्यम्। तथा च मनुः——

184 ["बालया वा युवत्या वा वृद्धया वापि योषिता।
न स्वातंत्र्येण कर्तव्यं कार्यं किंचि]द्गृहेष्वपि॥
इति॥

सू. समद्विगुणसाहस्रानन्तानि फलान्यब्राह्मण-
ब्राह्मणश्रोत्रियवेदपारगेभ्यः॥

पात्रविशेषात्फलविशेषार्थोऽयमारंभः। सम-
शब्देन षट्फलमुच्यते। अब्राह्मणाय दत्तं
हिरण्यादि भैक्षं वा। अब्राह्मणशब्देनोपनीत
मात्र उच्यते। तथाचाहोशनाः — येन-
वेदाऽनधीता व्रतानि चाननुष्ठितानि अब्राह्मण एव स-
185 इति। अब्राह्मणशब्दं ब्राह्मण एव प्रयुक्तवान्।
दत्तान् ब्राह्मणाय दत्तान्। ब्राह्मणाय दत्तं द्विगुणं
भवति। ब्राह्मणशब्देनानुष्ठितवेदव्रतोऽनधीतवे-
-द उच्यते। यथाह वसिष्ठः —
"यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः।
यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः॥" (बिभ्रति)

185 इति। श्रोत्रियाय यद्दत्तं तत् सहस्रगुणं भवति।
श्रोत्रियशब्देन एकशाखाध्याय्युच्यते। यथा-
ह बोधायनः— "एकां शाखामधीत्य -
श्रोत्रियो भवतीति। अनन्तं भवति वेदपार-
गाय दत्तम्। वेदपारगशब्देन साङ्गवेदा-
186 ध्याय्युच्यते। यथाह कण्वः— "येन
साङ्गो वेदोऽधीतः स वेदपारगो भवतीति।
पूर्वं फलाभिधानात्। एवं जातिविशेषादपि-
द्रष्टव्यम्। यथाह प्रजापतिः—
"शूद्रे समफलं दानं वैश्ये तद्द्विगुणं भवेत्।
क्षत्रिये त्रिगुणं प्राहुः अमितं ब्राह्मणे भवेत्॥"
एवं पात्रविशेषापेक्षया दानफलमुक्त्वा इदानीं
तत्प्रसंगेनान्यदपि दानप्रकारमाह —
सू. गुर्वर्थनिवेशौषध्यार्थवृत्तिक्षीणयक्ष्य-
माणाध्ययनाध्वसंयोगवैश्वजितेषु
द्रव्यसंविभागो बहिर्वेदि॥

187 गुरुग्रहणं मातृपितृभृत्यानांचोपलक्षणम्।
यद्वाह मनुः —

"सांतानिकं यक्ष्यमाणं अध्वगं सर्ववेदसम्।
गुर्वर्थं पितृभृत्यार्थं स्वाध्यायार्थ्युपतापिनौ॥

इत्यादि। निवेशार्थं च। एवं च याचित्वापि विनिवेशः कर्तव्यः। इदमपि समुच्चयपक्षे द्रष्टव्यम्। औषधार्थं अर्थग्रहणे प्रस्तुते पुनरर्थग्रहणं एभ्यो विद्याविशेषतोऽर्थस्यापि गुरुलाघव ज्ञापनार्थम्, निस्वेभ्य एव दातव्यमित्येवमर्थं वा। यथाह मनुः —

"निस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः"॥

188 इति। वृत्तिक्षीणः आपन्नः। यक्ष्यमाणः, नित्ययज्ञार्थमिदं वचनम्। ततश्च "अलं सोमाय, नासोमयाजी, स सोमं पातुमर्हतीत्येवमादीनि। स्मृत्यंतर वाक्यानि काम्ययज्ञे द्रष्टव्यानि। याचित्वापि यक्ष्यमाण-

188 त्वान्नित्ययज्ञस्य। अध्ययनार्थं वेदाध्ययनार्थं,
अध्वसंयोगः अध्वनि वर्तमानः। क्षीणः पथ्य-
दानार्थं च संयोगग्रहणात्। वैश्वजितो विश्वजि-
तार्येनष्टं, तेभ्यः संविभागः कर्तव्यः हिरण्या-
देरपि द्रव्यग्रहणात्। नियमेन कर्तव्यम्;
सम्उपसर्गप्रयोगात्। वैश्वजितस्य आसंव-
त्सरात् याच्ञाप्रतिषेधात् अप्रार्थयमानायै-
वदेयम्। इतरेभ्योऽप्रार्थयमानेभ्यो वा प्रार्थयमा-
189 नेभ्यो वा दद्यात्। द्रव्यविभागश्च यथाऽत्मनः
कुटुंबपीडा न भवति तथा कर्तव्यः, व्युपस-
र्गप्रयोगात्। ततश्चैकदेशो दातव्य इत्यर्थः।
बहिर्वेदिग्रहणात् अंतर्वेद्यन्येभ्योऽपि। एवं
च नियमेन कर्तव्यत्वादकुर्वतो न केवलं फला-
भावएव। किं तर्हि? प्रत्यवायश्च भवति।
तर्हि तत्कुर्वतोपि प्रत्यवायाभावएव प्रयो-
जनं न फलार्थमिति चेत्, न विद्याविशे-

189 षत इति लिंगात् पात्रविशेषात्फल(विशेषोऽस्तीति) विशेषेऽर्थयमानेभ्यो वा अस्तीति ज्ञापयति। तथाच व्यासः —

"गुरुनिवेशीषधार्थं स्वाध्यायार्थं(च भारत) तथैवच।
अध्वन्यपिप्रवृत्तस्य यागार्थं च तथैवच ॥
कृतवैश्वजितस्यापि वृत्तिक्षीणस्य पार्थिव।
दत्वा विद्याविशेषेण स्वर्गलोके महीयते"॥

इति। ततश्च संध्योपासनादिव द्रष्टव्यम्। यथा संध्योपासनाद्यकुर्वतः प्रत्यवायः
190 कुर्वतः प्रत्यवायाभावः फलप्राप्तिश्चेति॥

सू. भिक्षमाणेषु कृतान्नमितरेषु॥

उक्तव्यतिरिक्तेषु भिक्षमाणेषु कृतान्नं दद्यात्। इतरेभ्य इति केचित्पठंति। तेषामप्ययमेवार्थः।

ननुच "स्वस्तिवाच्यभिक्षादानमप्पूर्वमिति त्येनैव सिद्धत्वादेतन्नवक्तव्यमिति"।

190 उच्यते। इति कर्तव्यतामात्रं तत्। इदं तु
पुनर्नियमेन भिक्षा कर्तव्येत्येवमर्थमिति।
एवं च इदमपि संध्योपासनादिवद्दृष्ट-
व्यम्। अविशेषेणोक्तत्वाद्दानं च बहिर्वे-
द्यंतर्वेदि च। कृतान्नग्रहणात् तंडुलादेरनिय-
191 मः। भैक्षमितरेष्विति वक्तव्ये भिक्षमाणेष्वि-
तिवचनात् 'भवति भिक्षां देही'त्येवमादिभिर्मं-
त्रैः प्रार्थ्यमानेष्वेव नियमः। नाप्रार्थ्य
माणेषु। अथवा भिक्षार्हाणामेवायं नियमइति।
यदाह वसिष्ठः —
"अव्रताह्यनधीयाना: यत्र भैक्षचरा द्विजाः।
तं ग्रामं दण्डयेद्राजा चोरदत्तप्रदो हि सः"॥
(हस्तेऽपि)
इति। तत्र भिक्षादाने यतेरंतेप्युदकदानं कर्त-
व्यम्। यथाऽऽह भृगुः —
" यतिहस्ते जलं दद्यात् भैक्षं दद्यात्पुनर्जलम्।
भैक्षं पर्वतमात्रं स्यात् तज्जलं सागरोपमम्"॥

191 इति ॥ दानापवादमधुनोच्यते —

सू॰ प्रतिश्रुत्याप्यधर्मसंयुक्ते न दद्यात् ॥

192 अधर्मसंयुक्तो गुर्वाद्यर्थमुद्दिश्य यः प्रार्थ-
यते, न च करोति, तस्मै प्रतिज्ञातमपि
न दद्यात् । अपि शब्दात्संकल्पितमपि ॥
अधर्मसंयुक्तत्वं च न यस्य कस्यचिद्वचना-
त् प्रतिपत्तव्यमित्याह —

सू॰ क्रुद्धहृष्टभीतार्तलुब्धबालस्थविरमूढ-
मत्तोन्मत्तवाक्यान्यनृतान्यपातकानि ॥

क्रोधहर्षभयरोगलोभाविष्टानां बालादीनां च
वचनैर्नाधर्मसंयुक्तमर्थं नाध्यवसेयम् । अप्रमा-
णत्वात्तेषां वचनस्य । वाक्यग्रहणमन्यत्रा-
प्येषां वचस्याप्रामाण्यप्रसिद्ध्यर्थम् ॥

प्रासंगिकमुक्त्वा इदानीं प्रकृतमाह —

193 सू॰ भोजयेत्पूर्वमतिथिकुमारव्याधित
गर्भिणीसुवासिनीस्थविराञ्जघन्यां-

P-200

P-T.O. (182)

193 न्यांश्च ॥

आत्मनः प्रथमं एतान् भोजयेत्। अतिथिः वक्ष्यमाणः, कुमारो बालः, व्याधितो रोगार्तः, स्ववासिन्यो दुहितरः, (जामि युक्ताः) (प्रोषिता) स्थविराः वृद्धाः, जघन्याः परिचारकाः। च शब्दात् दीनानाथादयः उपसंगृह्यंते। विसमासः क्रमनियमार्थः। ततश्च यथाऽनुग्राह्यमेतान् भोजयेत् ॥

सू. आचार्यपितृसखीनां तु निवेद्य वचनक्रिया ॥

यो ह्येतस्मिन् काले आचार्यादीनां कश्चि-
194 त् गृहमागच्छेत् ततस्सिद्धमन्नं निवेद्य तदुक्तस्यवचनस्य करणं यत्ते ब्रुवते तत्कुर्यादित्यर्थः। तु शब्दो नियमार्थः। तदेव कुर्यान्न (क्वचिदपि) किंचिदपि स्वतंत्रेण भवितव्यम्। इति। वचनक्रियेत्यु-

194 कर्त्वाद्यदि ते न किंचिद्वदन्ति तदानीं स्वतंत्रेण-
भवितव्यमिति ।

सू. ऋत्विगाचार्यश्वशुरपितृव्यमातुलानां
उपस्थाने मधुपर्कः

ऋत्विगादीनां तु गृहागमने सति मधुपर्केण
पूजा कर्तव्या, प्रथमं उपस्थानग्रहणाद्द्विती-
यादौ रथ्यादौ मधुपर्को देयः। [मधुपर्क- नार्वाक्
विधिश्च गृह्ये द्रष्टव्यः ॥]

सू. संवत्सरे पुनः (इदं सूत्रं सभाष्यं नास्ति॥)

195 सू. यज्ञविवाहयोरर्वाक् ॥.
अर्वागपि संवत्सराद्यंते विवाहे चागतानां
मधुपर्को देयः। यज्ञे ऋत्विजां श्रुतित एव
मधुपर्कदानस्य सिद्धत्वात् श्वशुराद्यर्थोऽयं
भः ॥

सू. राज्ञश्च श्रोत्रियस्य ॥
राज्ञश्चोपस्थाने मधुपर्को देयः। श्रोत्रियश्चेत्
पृथग्ग्रहणादर्वागपि संवत्सरात् । चका-

145 शाद्वस्य युगलं च।

सू- अश्रोत्रियस्यासनोदके॥

यदि राजा अश्रोत्रियो भवेत् तस्यासनो-

दकमात्रेण पूजा कर्तव्या॥

सू- श्रोत्रियस्य तु पाद्यमर्घ्यमन्न-

विशेषांश्च प्रकारयेत्॥

ब्राह्मणस्य श्रोत्रियस्य। कुत एतत्? पुनः श्रो-

146 त्रियग्रहणात्। वैश्यार्थं इति चेत् न "वैश्यो

मधुपर्केण न मान्यः तस्मात्तं भोजयेदेव"

इति स्मृत्यंतरदर्शनात्। तु शब्दो विशेषार्थः।

स यदि वृत्तसंपन्नो भवति तस्योपस्थाने

पादप्रक्षालनार्थं पूजार्थं चोदकं देयम्।

पाद्यमर्घ्यमिति विसमासकरणात् मधुपर्क-

श्च अन्नविशेषाः मुद्गौदनादिभिन्नाः। च-

कारात् दंशादि विशेषांश्च। प्रोपसर्गात् कुत

घ्राणकुलम्। तथा च श्रुतिः:— "ब्राह्मणाय

196 अभ्यागताय सर्पिष्मदन्नं पचति' इति ॥.

असामर्थ्ये तु सति —

197 सू. नित्यं वा संस्कारविशिष्टम् ॥

यदेवास्य गृहे नित्यमन्नं तदेव उपदंशबाहुल्ये-
न विशिष्टं साधारणात् ॥

सू- मध्यतोऽन्नदानमवैद्ये साधुवृत्ते ॥

यस्त्वश्रोत्रियो ब्राह्मणः साधुवृत्तो भवति, वृत्त-
वान् भवति तस्मिन्नुपस्थिते मध्यमेन सत्का-
रेणान्वितं अन्नं देयम्। अन्नग्रहणं निय-
-मार्थं अन्नमेव देयं न पाद्यादीनीति।
अश्रोत्रियत्वादेव श्रद्धावियोगो मा-
भूदित्येवमर्थं दानग्रहणम् ॥

सू- विपरीते तु तृणोदकभूमि ॥

तु शब्दादुभय विपरीते। ततश्च यदि-
198 विद्वानसाधुवृत्तो भवति तस्यापि
"नित्यं वा संस्कारविशिष्टमित्येवं द्रष्टव्यम्"।

198 विपरीते तु तृणोदकभूमिमागमेव देयम् ॥

सू. स्वागतमंततः ॥

स्वागतं सूनृतां वाचं उच्चारयेत् इत्यर्थः । अंततः
आपदि तृणोदकादीनामसंभवे सति सूनृतां-
वाचमुच्चारयेदित्यर्थः ॥

सू. पूजानत्याशश्च ॥

सूनृतवचनादुत्तरकालं पूजा कर्तव्या । अनव-
ज्ञाकरणमेव पूजा । ततश्चावज्ञानकर्तव्येत्यर्थः ।
अनत्याशश्च ग्रासमात्रमप्यभोजयित्वा स्वयं-
न भोक्तव्यमित्यर्थः ।

सू. शय्यासनस्थानावसथानुव्रज्योपासनानि -
सदृक्छ्रेयसोः समानि ॥

199 आत्मनातुल्यस्याधिकस्य चातिथेः शय्या-
दीन्यात्मना तुल्यानि कर्तव्यानि । शय्या -
खट्वादि । आसनं फलकादि । आवसथं
अपवरकादि । अनुव्रज्याऽनुगमनम् ।

199 उपासनं नमस्कारादि। अनुव्रज्योपासनयोः
आत्मतुल्यत्वासंभवात् आत्मनः तुल्यस्य
चाधिकस्य च अनुव्रज्योपासनं च कर्तव्य
मित्येवमर्थ उपदेशः। शय्यासनादेः
आत्मनः साम्येन कर्तव्यार्थः। आत्मन इव
साम्यं न परस्परयोः। उत्तमस्याधिकसंभावनी-
यत्वार्थम्। तथा च वक्ष्यति समासमाभ्यां विषमसमे पूजा-
तः। अनर्चितं च इति। ततश्च सदृक्श्रेय-
सोरात्मापेक्षया तुल्यानि न परस्परापेक्षया अतु-
200 ल्यानीति द्रष्टव्यम्॥

सू- अल्पशोऽपि हीने॥

ईषद्धीनेऽपि समानि कर्तव्यानि॥

सू- अतिथिलक्षणमाह—

सू- ~~असमा~~ असमानग्रामोऽतिथि-
रैकरात्रिको अधिवृक्षसूर्यो-
पस्थायी॥

200 अन्यग्रामजः ऽकरात्रवसनशीलः मध्या-
न्हादूर्ध्वम्(दुर्ध्वम्)पस्थितः अतिथिरवगंतव्यः। एवं
रूपाय नियमेन दातव्यानि। अदानेच प्रत्य-
वायः। विसमासादेकलक्षणहीनोऽपि न-
भवति। अधिवृक्षसूर्यशब्देन सायंका-
ल उच्यते। तथाच वसिष्ठः — सायमा-
गतमतिथिं ना(प्रराध्यात्) वरूध्यात् इति ॥
किं पुनः अतिथिः वक्तव्यः इत्यत आह —
201 सू. कुशलानामयारोग्याणामनुप्रश्नोऽ-॥
(न्त्यं शूद्रस्य ॥)
आनुपूर्व्येण अतिथिः प्रष्टव्यः। कुशलं ब्राह्मणस्य,
अनामयं क्षत्रियस्य,॥

सू. अन्त्यं शूद्रस्य ॥.

आरोग्यं शूद्रस्यैव। ततश्च वैश्यस्य स्मृत्यन्त-
रोक्तं द्रष्टव्यम्। यथाह मनुः —
"ब्राह्मणं कुशलं पृच्छेत् क्षत्रबंधुमनामयम्।

२०१ वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च" ॥

इति ॥

सू० ब्राह्मणस्याननतिथिरब्राह्मणोऽयज्ञे-
संवृतश्चेत् ॥

ब्राह्मणस्य क्षत्रियादिरुक्तलक्षणयोगे सत्यपि
नातिथिः। अतश्च नियमतो न देयम्। अयज्ञे-
२०२ यज्ञादन्यत्र। यज्ञे तु भवत्येव। सचेद्ब्राह्मणः
संवृतः दरिद्रो भवति। यज्ञादन्यात्रापि प्रभूता-
-न्नस्य तु भवत्येव। ब्राह्मणस्येति वचनात्
क्षत्रियादिर्भवत्येव। ब्राह्मणस्याब्राह्मण निषे-
धात् ब्राह्मणस्य ब्राह्मणो भवत्येव ॥

सू० भोजनं तु क्षत्रियस्योर्ध्वं-
ब्राह्मणेभ्यः ॥

तु शब्दः पक्षसूचनार्थः। अतिथिपक्षे तु
भुक्तवत्सु ब्राह्मणेषु क्षत्रियं भोजयेत् ॥

सू० अन्यान् भृत्यैस्सहानृशंस्यार्थमानृशंसार्थम् ॥

202. अन्यान् वैश्यादीन् भृत्यैः दासभृत्यकर्मकरा-
दिभिः सह भोजयेत्। सति विभवे। यद्यपि-
203 अतिथिर्नभवति, तथाप्यानृशंसार्थं अनु-
कंपार्थं, प्रत्याख्याने नृशंसता लोके स्यादि-
ति॥

ओम्

इति मस्करिविरचिते
गौतमभाष्ये
॥पंचमोऽध्यायः॥

---

203 षष्ठोऽध्यायः ॥

औम् ॥ इदानीमतिथि पूजन प्रसङ्गेन अन्ये-

षामप्यन्यं पूजा प्रकारमाह —

सू. पादोपसंग्रहणं समवायेऽन्वहम् ॥

पादयोरुपश्लेषणमुपसंग्रहणम् । उपसर्गद्वय-

प्रयोगात् स्मृत्यन्तरोपदिष्टेन विधिना कर्तव्यम् ।

204 तथाचाह मनुः —

"व्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः" ॥

इत्यादि । समवाये संगमे । अन्वहमिति प्रतिदिनम् ।

कर्तव्यमिति शेषः । वक्ष्यमाणानां संगमे इति

द्रष्टव्यम् ॥

सू. अभिगम्य तु विप्रोष्य ॥

प्रकृष्टदेशान्तर प्रत्यागतेनाभिमुख्येन

तद्गृहं गत्वा कर्तव्यम् । तु शब्द आदरो-

पसंग्रहार्थः । ततश्च न यादृच्छिक

दर्शनमुदीक्षेत ॥

204 केषां पुनः इदं कर्तव्यमित्यत आह —

समब

सू· मातृपितृतद्बन्धूनां पूर्वजानां विद्यागुरूणां तद्गुरूणां च ॥

समब

205 मातापितरौ प्रसिद्धौ । तद्बंधवः मातुलमातामहपितृव्यपितामहादयः । पूर्वजाः आत्मनो भ्रातरः ज्येष्ठाः । विद्यागुरवः अंगादिविद्याध्यापयितारः । पूर्वं वेदाध्यापयितुरुक्तत्वात् । तद्गुरवः तेषां पित्रादीनां ये विद्यागुरवः । चकारात् गुरोः सख्यादीनामपि । एषां समवायेनान्वहमभिगम्य च विप्रोष्य । पूर्वजादीनां विसमासः तच्छ्वशुरादि संग्रहार्थः ॥

सू· सन्निधाने परस्य ॥.

यदैकस्मिन् देशे बहूनां समवायः तदा यः परः प्रधानः तस्य प्रथमं कर्तव्यम् सचोक्त आचार्य श्रेष्ठो गुरूणामित्यादिना ॥

205 सू. स्वनाम प्रोच्चार्याहमयमित्यभिवादो
206 ज्ञसमवाये ॥.

स्वनामपित्रादिकृतम्। तत् प्रकर्षेणोच्चार्य
तदन्तरमहं शब्दं चोक्त्वा, अयमिति प्रत्यक्षो-
पदेशः तदर्थोऽस्मि शब्दः प्रयोक्तव्यः॥
इति शब्दः प्रकारवाची। अंते गुरोः नाम्नः
स्थाने प्रकृतत्वात् भोशब्दश्च देवदत्त-
नामाहमस्मिभो इति प्रयोगः। तस्मिन्नु-
पसंग्रहण वेलायामेवाभिवादः। आभि-
मुख्येन उच्चारणं कर्तव्यमित्यर्थः॥
ज्ञसमवाये प्रत्यभिवादन विधिस
समवाये इत्यर्थः। प्रत्यभिवादन विधिश्च
स्मृत्यंतरे द्रष्टव्यः।

207 यथाह मनुः —
"आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने।
अकारश्चास्य नाम्नोन्ते वाच्यः पूर्वाक्षरः प्लुतः"॥

२०७. इति। तथाच वसिष्ठोपि :—

"आमंत्रिते स्वरोऽन्त्यस्य प्लवते संध्यमक्षरम्।

प्रगृह्यमायुभावश्चेति", आयुष्मान् भव

सौम्य देवदत्त ३ इति। आयुष्मान् भव सौम्य

विष्णो ३ अ। आयुष्मान् भव सौम्य दाशर-

थ ३ अ इत्यादयः प्रयोगाः प्रत्यभिवा

दन विधौ द्रष्टव्याः।

अक्षसमवाये तूपसंग्रहणं न कर्तव्यं,

ऽावमभिवादनं च। किं तत्र कर्तव्यमिति

चेत् अभिवादये इत्येतावदेव कर्तव्यम्।

यथाह पारस्कर:

२०८. अभिवादनमेवं कुर्यात्। तथाचापस्तम्बः

दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभि

वादयीत, उरस्समं राजन्यो मध्यसमं वैश्यो

नीचैश्शूद्रः प्रांजलिः प्रांजलिः प्रवणश्चे

त्यादि॥ ऽावं च व्यस्त पाणिनेत्यादिरूप

संग्रहण विधिः आपस्तम्बोक्तो ऽभिवादन

२०८. विधिरित्यवगंतव्यः॥

सू. स्त्रीपुंसंयोगेऽभिवादनोऽनियममेके॥

जायापतिविषये भार्यया भर्तुरभिवादने कर्तव्ये
प्राप्ते इत्यर्थः। यद्यपि भर्ता प्रत्यभिवादविधि

सू. तथाप्यनियम एक इच्छंति। अहम-
२०९ यमित्येवमादौ विधि नियमो नास्ति। येन-
केनचित्प्रकारेण कर्तव्यमिति। ननु गौतमः।
सत्वहमयमित्येवमादिना नियमेन कर्तव्य
मिति विद्यापेक्षया विकल्पो द्रष्टव्यः॥

सू. नाविप्रोष्यस्त्रीणाममातृपितृव्य
भार्याभगिनीनाम्॥

अविप्रोष्य स्त्रीणामुपसंग्रहणं न कर्तव्यम्
माता प्रसिद्धा। पितृव्यभार्या पितुरनुज
स्य ~~भार्या~~ भार्या, भगिनी सोदरा ज्येष्ठाऽता-
वर्जयित्वा आसामन्वहमुपसंग्रहणं कर्तव्यम्।
तथाच स्मृत्यंतरम्:—

२०९. "उपसंग्रहणं कुर्यात् मातरं भगिनीं तथा।
पितृव्यभार्यां च तथा सोऽन्वहं चाभिगम्य तु" ॥
इति। अन्यासां गुरुस्थानीयानां विप्रोष्य
२१० प्रत्यागतेनाभिवादनमुपसंग्रहणं च कर्त-
व्यम्। तत्राऽत्यंतगुरुस्थानीयानां मातुल-
भार्यादीनां उपसंग्रहणं अन्यासामभिवा-
दनमिति द्रष्टव्यम् ॥

सू- नोपसंग्रहणं भ्रातृभार्याणां-
श्वश्र्वाश्च ॥

प्रोष्य प्रत्यागतेनापि अत्यन्तगुरु
स्थानीयत्व द्वारेण प्राप्तं प्रतिषिध्यते।
ततश्चाभिवादनं सिद्धमपि समासः
सख्युपसंग्रहार्थः। श्वशुर सखि भार्यो
पसंग्रहार्थश्च शब्दः ॥

सू- ऋत्विक्श्वशुरपितृव्यमातुलानां
तु यवीयसां प्रत्युत्थानमनभिवाद्याः ॥

२१० ऋत्विजादीनां आत्मनो हीनवयसां उपस्थि-
२११ तानां प्रत्युत्थानमात्रेण पूजा कर्तव्या। यस्माद-
नभिवाद्याः अतो नोपसंग्राह्याः। अपितु
शब्दः विशेषवाची। समानवयसश्च ना-
भिवाद्याः। प्रत्युत्थेयाः तथाऽयमपि ऋत्वि-
गादिभ्योऽन्यः विशेषतो यवीयांस इति॥

सू॰ तथाऽन्यः पूर्वः पौरो शीतिकावरः
शूद्रोऽप्यपत्यसमेन॥

यथैवेते नाभिवाद्याः प्रत्युत्थेयाः तथाय-
मपि ऋत्विगादिभ्योऽन्यः पूर्वो वयसा
पौरः समानस्थानवासी अशीतिकावरः
वृद्धमशीतिवर्षस्थ इत्यर्थः। ततश्च
ततः प्रभृत्येव द्रष्टव्यः। शूद्रोपि क्षत्रि-
य वैश्यावपि। अपिशब्दात् अपत्य
२१२ समेन ब्राह्मणेन क्षत्रियेण वा वैश्येन वा
शूद्रेण वा असमानजातीयोपि अन्य-

२१२ शब्दे सत्यपत्यसम शब्दस्समान जातीय-
विषयश्चावेति कस्यचिदाशंकास्यादिति ॥

सू. अवरोऽप्यार्यश्शूद्रेण ॥

अवरोऽप्यत्यन्त(निकृष्टोऽपि) निकृष्टवयस्कोऽपि
आर्यो द्विजातिः शूद्रेण प्रत्युत्थेयः । शूद्र-
ग्रहणं वैश्यादीनामप्युपलक्षणार्थम् ।
ततश्च शूद्रेण ब्राह्मण क्षत्रियवैश्याः प्रत्यु
त्थेयाः, वैश्येन ब्राह्मण क्षत्रियौ, क्षत्रि-
येन ब्राह्मण इति द्रष्टव्यम् । नमस्कार-
समुच्चयार्थोऽपिशब्दः ॥

सू. नामचास्यवर्जयेत् ॥

अस्य ग्रहणं वीप्सार्थम् । अस्यास्येत्युत्तम-
२१३ स्योत्तमस्य निकृष्टो निकृष्टो नाम नोच्चारयेत् ।
निरूपपदमिति शेषः । च शब्दात् परिहसनं च ।
ततश्चोत्तमोत्तमो निकृष्टस्य नाम कामं गृह्णी-
यात् ॥

213 सू. राजन्यश्चाजपः प्रेष्यः॥

राजन्यश्च नाम वर्जयेत् प्रेष्यः प्रेषणकरणः ब्राह्मणः। निकृष्टत्वात् तस्य प्रतिषेधः। स चेदजपः अश्रोत्रियः इति यावत्। चकाराद् वैश्यस्यापि। शूद्रस्य तु न दोषः॥

सू. भो भवन्निति वयस्यस्समानेऽहनि जातः॥

भो भवन्नित्येवमभिधातव्यः। भोभवच्छब्दौ च कार्यापेक्षया प्रयोक्तव्यौ। ऽनावत्येव पूजा। यो वयस्यः सखा तस्य लक्षणं

214 समानेऽहनि जात इति। अहश्शब्दोऽत्र संवत्सरपर्यायः, "अहस्संवत्सरमहर्जलम्" इति नैरवण्टुके संवत्सरपर्याय श्रवणात्। (च)

ततश्च समाने संवत्सरे जातः। लोकेऽपि तु संवत्सरजातेषु समानवयस्कत्वं प्रसिद्धम्। ततश्चोर्ध्वं संवत्सराद् वृद्धो भवति॥

सू. दशवर्षवृद्धः पौरः॥

२१४ भो भवन्निति वर्तते। भो भवन्निति वयस्यवद-
भिभाष्य इत्यर्थः। दशवर्ष वृद्धोपि पौरः
समानस्थानवासी ॥

सू- पञ्चभिः कलाभरः ॥

समानस्थानवास्यपि यो गांधर्व चित्र पत्रच्छेदा-
दिभिः, कलाविद्यादिभिः जीवति स पंचभि-
२१५ वर्षैः वृद्धोपि वयस्यवदभिभाष्य इत्यर्थः॥

सू- श्रोत्रिय चारणस्त्रिभिः ॥

श्रोत्रियो मंत्र ब्राह्मणाध्यायी। चारणः समान (सह)-
चरणः। केचिन्नृत्तादि शीलं वर्णयंति। तद-
युक्तम्। कलाभर शब्देनैव गतार्थत्वात्॥

(सू-राजन्य वैश्य कर्म )

सू. राजन्यवैश्यकर्म विद्याहीनः॥

राजन्यकर्मणा वैश्यकर्मणा वा य उप-
जीवति स उत्कृष्ट कर्म(षि) रतस्य
तत्कर्मोपरमणात्त्यागत्यंत वृद्धोपि

क्रोऽवि

215 वयस्यवन्मान्यः। यश्च विद्याहीनः वि-
द्योत्कृष्टस्य ॥

सू० दीक्षितश्च विक्रयात् ॥ (प्राक्क्रयात्)

(यो) वयस्यत्वयुक्तोऽपि सोमविक्रयात्प्रागेव
वयस्यः। ततः परं मान्य एव इत्येवमर्थ उपदेशः।

216 चकारादुत्तमाश्रमस्थोऽपि त्रिवृत्प्राशना-
त्प्रागेवेति सामर्थ्याद्द्रष्टव्यम्। तथा चा-
हो शनाः — ; येन त्रिवृत्प्राशितं स सर्वे-
षां गुरुर्भवति इति ॥

सू॰ वित्तबंधुकर्मजातिविद्यावयांसि-
मान्यानि ॥

वित्तादीनां साक्षान्मान्यत्वासंभवात् तद्वन्तो
मान्या इति द्रष्टव्यम्। वित्तवानाढ्यः। बंधु-
मान् विशिष्टसोदर्यादिबहुलः। कर्मवान्
यथोक्तकारी। जातिमानभिजनयुक्तः।
विद्यावानधीतवेदः। वयोमान् प्रकृष्टव-

216 याः ॥

सू. परबलीयाँसि ॥

यद्यत्परं तत्तत् पूर्वस्मात् गुरुतरं विज्ञेयम् । ततश्च वित्तवताँच बंधुमान्मा-

217 न्यः । उभाभ्यामपि कर्मवान्मान्यः इत्येवमादि योज्यम् । मानमभिवादनादि ॥

सू. श्रुतं तु सर्वेभ्यो गरीयः ॥

श्रुतं वेदार्थपरिज्ञानम् । ननु च पूर्वसूत्रऽवैतदन्त उपदेष्टव्यम् । ततश्च परबलीयस्त्वादेवैतत्सिध्यति । ततः पृथगुपदेशः अनर्थक इति । उच्यते । विशेषार्थोऽस्य पृथगारंभः । विशिष्टं हि श्रुतमत्राभिप्रेतम् । तच्च वेदार्थपरिज्ञान सहितं । पूर्वं वेदमात्रपाठऽव । तद्विशेषाभिधानार्थैव तु शब्दोपि । ततश्चायं सर्वेऽपि मान्यः ॥

कुतः —:

217 सू. तन्मूलत्वाद्धर्मस्य ॥

218 यच्छ्रुतवानाचरति तस्यापि धर्ममूलत्वात्पूर्व-
मेव प्रतिपादितं "तद्विदां च स्मृतिशीले" इति।
तथाह मनुः—:
"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनां आत्मनः तुष्टिरेव च" ॥
इति। अथवा वेदार्थपरिज्ञानपूर्वकत्वात्स्मृतेः।
यथाह मनुः—:
"श्रुतिं पश्यंति मुनयः स्मरन्ति तु तथा स्मृतिम्" ॥
इति ॥

सू. श्रुतेश्च ॥

स एव गरीयान्। श्रुतिरपि मनुनोक्तं शैशव-
ब्राह्मणं द्रष्टव्यम्।
अध्यापयामास पितॄन् शिशुरांगिरसः कविः।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥
219 इत्यादि श्रुत्युदाहरणोपादानं श्रुतस्याध्यय-

२१९. न प्रकर्षे सति बलीयस्त्वज्ञापनार्थम् ॥

सू- चक्रिदशमीस्थानुग्राह्यवधूस्नातक-
राजभ्यः पथो दानम् ॥

चक्र्यादीनां चक्र्यादीनां तद्गुणैरन्यैः पथो
दानेनोपकर्तव्यम्। चक्रं शकटं तत् स्यः चक्री।
दशमीस्थः दशम्यां (अवस्थायां) दशायां वर्त-
मानः अत्यन्तवृद्ध इत्यर्थः। अनुग्राह्यो
रोगार्तः। वधूगर्भिणीत्येवमादिः। स्नात-
को विद्याव्रतस्नातकः। राजाऽभिषिक्तः॥

राजस्नातकयोः (ब्राह्मणयोः) समागमे —

सू- राज्ञा तु श्रोत्रियाय श्रोत्रियाय ॥

तु शब्दः विशेषणार्थः। यदि राजाऽल्प
तरस्स्यात् श्रोत्रियस्त्वधिकारसंपन्नः
प्रकृत एव स्नातकः, ततः तस्मै राज्ञा
२२० पन्था देयः। एवं च अन्यैः राज्ञ एव
देयः। पूर्वेषामपि यथानुग्राह्यं परस्पर

205

सन्निपाते द्रष्टव्यम् ॥ ओम् इति

मस्करीये

गौतमभाष्ये

षष्ठोऽध्यायः ॥

Copied by.

Compared by.

1. T. A. K. Venkatachariar
16-3-55

2. Saranatha Chariyar
(V. G. Saranatha Chariyar)

२२० अथ गौतमधर्मसूत्रमस्करिभाष्ये

सप्तमोऽध्यायः॥

ओम्। 'श्रुतन्तु सर्वेभ्यो गरीयः' इति
विद्याप्राधान्यमुक्तम्। तदधिगमश्च
ब्राह्मणादेव कर्तव्यः। तस्यैव प्रवचना-
धिकारात्। यदा प्रवचनसमर्थब्राह्मणा-
भावः तदा कथमित्यत आह—

२२१ सू. आपत्कल्पो ब्राह्मणस्याब्राह्मणा-
द्विद्योपयोगः॥

आपत्कल्प इति आध्यायपरिसमाप्तेरधि-
क्रियते। आपत्प्रवचनसमर्थब्राह्मणाभावः
तत्र यः कल्पो विधिः सः आपत्कल्पः।
आपद्यपि क्षत्रियवैश्ययोः विद्याधिग-
मप्रापणार्थं ब्राह्मणग्रहणम्। ब्राह्मणाः
क्षत्रियाः वैश्याः इतरेषामध्ययनाधिकारा-
भावात्। तत्रापि प्रथमं क्षत्रियात् ततो वै-

२२१ ष्यादिति द्रष्टव्यम्, "तदलाभे वैश्यवृत्तिः" इति दर्शनात्। विद्यास्थानानि चतुर्दश॥
तथा स्मृत्यंतरम् —
"अंगानि वेदाः चत्वारः मीमांसा न्यायविस्तरः।
२२२ पुराणं धर्मशास्त्रं च विद्यास्त्वेताश्चतुर्दश"॥
इति। उपयोगः स्वीकरणं युजेः संबंधवचनत्वात्। अनेनान्यथानुपपत्त्या क्षत्रियवैश्ययोरध्यापनमनुमीयते। तदप्यदृष्टार्थमेव— "षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः"॥ इति। ब्राह्मणस्यैव दृष्टार्थत्वात् नेतरयोरिति मनुना प्रतिषिद्धत्वात्। अब्राह्मणादध्ययनमिति वक्तव्ये विद्योपयोगइत्यारंभः, आपद्यब्राह्मणादध्ययनमेव कर्तव्यमिति नियमार्थः। ततश्च ब्रह्महत्यादौ सर्वस्वदानचोदनायां प्रतिग्रहसमर्थब्राह्मणाभावेपि क्षत्रियादेर्न दातव्यम्॥

223 इदानीमध्ययनद्वारेण समस्त शुश्रूषाप्राप्ता
वाह —

सू· अनुगमनं शुश्रूषा ॥

गच्छतः पृष्ठतोऽनुगमनमेव शुश्रूषा, नान्य-
दभिवादनादि कार्यम् । अध्ययनकालाच्चान्य-
दैतदुच्यते, तत्रार्थप्राप्तत्वात् ॥

सू· समाप्ते ब्राह्मणो गुरुः ॥

समाप्ते तदध्ययने अनुगमनमात्रमपि न
कर्तव्यम् । ब्राह्मणस्यैव तेनाध्यापकेन
कर्तव्यम् । "अनुगमनं शुश्रूषाऽऽसमाप्तेः"
इति वक्तव्ये ब्राह्मणो गुरुरिति वचनात् ॥

इदानीमन्योऽप्याप कल्प उच्यते —

सूत्र· याजनाध्यापनप्रतिग्रहाः सर्वेषाम् ॥

224 सर्वग्रहणेनाप्रशस्ताः त्रयोऽपि वर्णाः गृह्यन्-
ते प्रशस्तानामनापदि विधानात्, शूद्रस्य
'वृत्तिक्षेमान्तरेण शूद्रात्' इत्यारंभात् ।

२२४. पंचम्यन्तः सर्वशब्दः प्राप्नोतीति चेत् —
सकाशादित्यध्याहारान्न दोषः।
सर्वेषामिति बहुवचनं अनुलोमोपसंग्रहणार्थम्।
ब्राह्मणस्यैतदुच्यते। अधिकारात्, तदला-
भे क्षत्रवृत्तिः इति च लिंगात्। ततश्चा-
स्यामवस्थायां गर्हितयाजनादिभिः न दोषः॥
शास्त्रचोदनासामर्थ्यात्॥ तथा च मनुः —
"नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात्।
२२५ दोषो भवति विप्राणां ज्वलनाम्बुसमाहिते"॥
(मनु) स्वनयं
सर्वतः प्रतिगृह्णीयात् ब्राह्मणस्त्वनलं गतः॥
इति इत्यादि। तथा च श्रुतिः — 'तस्माद्यया-
कयाच विधया बह्वन्नं प्राप्नुयात् इति॥

सू - पूर्वः पूर्वो गुरुः॥

प्राणां याजनादीनां यो यः पूर्वनिर्दिष्टः स उत्तरस्मा-
दुत्तरस्मात् गुरुः इति विज्ञेयः। ततश्चोत्तरेणो-
त्तरेण जीवनासंभवे पूर्वेण पूर्वेण जीवेदिति

२२५ क्रमप्रतिपादनार्थम् वचनम्। ततः क्रमलंघने प्रायश्चित्तं द्रष्टव्यम्। पूर्वपूर्वो सदिति वक्तव्ये गुरुग्रहणात्॥

२२६. सू. तदलाभे क्षत्रवृत्तिः॥

स्यादिति शेषः। सर्वप्रकारायाः ब्राह्मणवृत्तेरलाभे क्षत्रवृत्तिरिति सेवौदिनोपजीवनं रक्षणादिना वा। तद्ग्रहणं अत्यन्तनिर्गुणाऽपि ब्राह्मणवृत्तिरेव वरमिति ज्ञापनार्थम्। तथाच मनुः— :

"श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। परधर्मेण जीवन् हि सद्यः पतति जातितः"॥

इति। (य) तद्वा क्षत्रवृत्तिरित्युक्ते अभाववैकल्पिकेनैव वा शब्देन ब्राह्मणवृत्त्यभावे क्षत्रवृत्तिर्वेति लभ्यमानेऽलाभग्रहणं क्षत्रवृत्त्याजीवतो यदा ब्राह्मवृत्त्यैव जीवनं संभवति, तदा क्षत्रवृत्ति-

२२७ मुत्सृज्य ब्राह्मणवृत्तिरेवाश्रयितव्येति।

227 तथाच नारदः—

"आपदं ब्राह्मणः तीर्त्वा क्षत्रवृत्त्या भृते जने।
उत्सृजेत्क्षत्रवृत्तिं तां कृत्वा पावनमात्मनः॥"

सू. तदलाभे वैश्यवृत्तिः॥

अलाभग्रहणं वृत्तिसंकरो माभूदिति। एवं च संकरे प्रायश्चित्तं द्रष्टव्यम्। तद्ग्रहणमुक्तव्याख्यानम्। अक्रतुविधानाभावादेवोत्तमवृत्त्याश्रयणप्रसंगो नास्ति। यथाह वसिष्ठः—
"नतु कदाचिज्ज्यायसीम्" इति॥

सू. तस्यापण्यम्॥

तस्य ग्रहणं ब्राह्मणस्यैव न क्षत्रियस्य वै-
228 श्यवृत्तिस्थितस्येति। एवं च वैश्यस्य अर्थसिद्धं विक्रेयत्वं प्रतिषिद्धं त्यक्त्वा दत्वा प्रतिषिद्धस्याप्रतिषिद्धस्य चादानम्। तदभावादपण्यमविक्रेयम्। किं तदपण्यमित्यत आह—

सू. गंधरसकृतान्नतिलशाणक्षौमाजिनानि॥

२२८ गंधमनुलेपनं, रसस्तैलादि, कृतान्नं मोदकादि, तिलाः प्रसिद्धाः, शाणं शाणविकारः क्षुमा अतसी तद्विकारः क्षौमं, विकारप्रतिषेधात् प्रकृतेरपि प्रतिषेधः। अजिनं, चर्म ॥

सू. रक्तनिर्णिक्ते वाससी ॥

रक्तं लाक्षादि विकृतं, निर्णिक्तं प्रक्षालितम्॥

सू- क्षीरं सविकारम् ॥

क्षीरं पयः विकारैः सह ~~दध्या दधि~~ दध्यादिभिः। सह विकारग्रहणात् तिला-

२२९ दि विकाराणामप्रतिषेधो विज्ञायते। अथवा-यत्र केवलस्य क्षीरस्यैव ~~निर्दे~~ निर्देशः तत्र सविकारस्यापि ग्रहणमित्येवमर्थं विकारग्रहणम्। तत्र यः पूर्वः पक्षः तस्मिन् शाणक्षौमयोः विकारनिर्देशः प्रकृति प्रतिषेधार्थ इति द्रष्टव्यम् ॥. वक्तव्यः।

229 सू॰ मूलफलपुष्पौषधमधुमांसतृणोदका-

पथ्यानि ॥

मूलं हरिद्रादि, फलं क्रमुकादि (फलम्) पुष्पं-
दमनकादि, औषधं यष्टिमधुकादि। रस-
ग्रहणेनैव मधुनः प्रतिषेधे सिद्धे "सर्वथा-
तु वृत्तिरशक्तौ" इत्यत्रापि पक्षे प्रतिषेधा
र्थं पुनर्वचनम्। मांसोदके तृणानि प्रसि-

230 द्धानि। अपथ्यं विषम् ॥

सू॰ पशवश्चाहिंसासंयोगे ॥

पशवः गवादयः हिंसासंयोगेन विक्रेयाः
इति सिद्धे उपसर्गारंभात् यजमानहस्तेपि न वि-
क्रेयाः। तत्र हिंसायां दोषाभावात् हिंसायो-
गो नास्तीति चेत् - सत्यं स तु यजमानस्यै-
व नेतरस्येति। च शब्दान्मयूरादीनि च॥
सू॰ पुरुषवशाकुमारी वेहतश्च नित्यम् ॥
पुरुषो मनुष्यः तद्ग्रहणे स्त्रियः अपि,-

230 जातिवचनात्। तथा च श्रुतिः "पुरुषशिर-
उपदधाति न स्त्रियाः" इति। वशा वन्ध्या
गौः। कुमारी गौरेव। मनुष्यकुमार्योः स्त्रीत्वात्
231 पुरुषग्रहणेनैव सिद्धत्वात्। वेहद् गर्भघाति-
नी, सापि गौरेव, पूर्वोक्तादेव न्यायात् हिंसा-
संयोगाच्च शब्दः काकवन्ध्याद्युपसंग्रह-
णार्थः। नित्यं हिंसासंयोगात् अन्यत्रापी-
ति केचित्। तदयुक्तम्, हिंसासंयोगे पशु-
त्वादेव सिद्धे पुनरारंभसामर्थ्यादेवान्यत्रा-
पि लब्धुं शक्यत इति। अन्ये नित्यं शब्देन
द्रव्यं विशेषयन्ति नित्यमेवंरूपा इति।
तदप्ययुक्तम्। पुरुषादयः कदाचिदप्यने-
वंरूपा न भवेयुरिति। ततश्च नित्यशब्दो-
ऽन्येषां तिलादीनामनित्यत्वसूचनार्थः।
तत्रश्च स्वयं कृष्योत्पादितानां तिलादीनां विक्रे-
232 यत्वं अन्यथोत्पादितानां तिलादीनां अपि अविक्रेयत्वं इति-

2.32 · द्रव्यम्। तथा च वसिष्ठः — "कामं वा
स्वयं कृष्योत्पाद्य तिलानपि विक्रीणीरन्" किं पुनर-
न्यानीति तत्रार्थः॥

सू· भूमिव्रीहियवाजाव्यश्वर्षभधेन्वनडुहश्चैके॥
"भूमिः गृहं क्षयं वेश्म गृहं भूमिर्निकेतनम्" इत्या-
दि नैघण्टुके गृहपर्यायश्रवणात्। व्रीहिः प्रसि-
द्धः, यवश्च, तद्ग्रहणं धान्योपलक्षणम्। अजः
छागः। अविः प्रसिद्धः। अश्वो हयः। ऋष-
भः पुंगवः। धेनुः दोग्ध्री गौः। अनडुत् शकट
वहनसमर्थो बलीवर्दः। एते न विक्रेयाः हिंसासं-
2.33 योगादन्यत्रापीत्येके आचार्याः न तु गौतमः।
उष्ट्रोपसंग्रहणार्थश्चकारः। यथा ह्योशनाः —
'उष्ट्रर्षभहया अविक्रेयाः' इति। नित्यत्वानुकर्षणा-
र्थ इत्येके॥

सू· निमयस्तु॥.
कर्तव्य इति शेषः। निमयो द्रव्याणां परि-

233 वर्तनं, तु शब्दः विशेष वाची, समतो ही-
नतो वा निमयः कर्तव्यः इति। तथाच वसिष्ठः -
समतो हीनतो वा निमातव्य इति ॥

सू॰ रसानां रसैः ॥

निमये कर्तव्ये रसाः तैलादयः रसैर्गुडादि-
भिरेव च निमयः कर्तव्य इति नियमार्थं सू-
त्रारंभः ॥

सू- पशूनांच ॥

(चकारः)
तृतीयान्त पशुशब्दप्रापणार्थश्च शब्दः।
234 पशूनां पशुभिरिति। प्रतिषिद्ध पशुविषयं द्रष्ट-
व्यम्। अप्रतिषिद्धानांतु विक्रय स्य स्वतः प्रतिषेधा-
भावादेव नियमसिद्धेः ॥

सू- न लवण कृतान्नयोः॥

न लवणं रसान्तरेण निमातव्यम्। रसानां
रसैः इति निमयः प्राप्तः प्रतिषिध्यते। कृतान्नं
(अन्यांतरेण)
येन केनचिदपि अन्यथा प्राप्त्यभावात् (सू॰

234 सू॰ तिलानांच ॥

निमय प्रतिषेधानुकर्षणार्थश्चकारः। येन तिला-
नां येन केनचिदपि निमयो नास्तीत्यर्थः।
आपदि धान्येन समेन निमयाऽभ्यनुज्ञानार्थं प्रथमग्रहणम्। तथाह (मनुः) यवसिष्ठः
'तिलाः धान्येन तत्समाः' इति॥

इदानीं कृतान्नस्य प्रतिप्रसवार्थमाह—

235 सू॰ समेनामेनतु पक्वस्य संप्रत्यर्थे ॥

समेन तुल्येनामेन सह पक्वस्य सह निमयो
भवति। संप्रत्यर्थे यदि तस्मिन्नेव काले कृता-
न्नमुपभुज्यते। तु शब्दः आमविशेषवाची, ततश्च
तण्डुलेनेति द्रष्टव्यम्। केचित्तेनैव प्रकारेण
निमयः कर्तव्यः नान्येनेति नियमार्थं तु
शब्दमाहुः। तदयुक्तम् सूत्रारंभसामर्थ्या-
देव नियमसिद्धेः। यदि येन केनचिन्नियमो निमयो
भवेत्तदानीं "निमयश्चेति" सामान्यविहि-

235 तेनैव सिद्धत्वादनारंभः प्राप्नोतीति। ततश्च
236 रसादीनि यानि द्रव्याणि तानि द्रव्यविशेषैरेव
निमातव्यानि। शेषाणां तु येन केनचिदिति द्रष्टव्यम्।
तंडुलैः प्रस्थादि परिमितैः सह तन्मात्रैरेव—
पक्वस्यान्नस्य निमयः कर्तव्यः इत्यर्थः। 'पक्व-
गंधरस कृतान्न' इत्यत्र कृतान्न शब्दः तंडुलेष्व-
पि वर्तत इति ज्ञापयति। अन्यथा विक्रय-
प्रतिषेधाभावान्नियमारंभो न प्राप्नोतीति। (मया)
यस्मात् प्रतिषिद्धानामेव नियमारंभ इति॥ (निमय)
सू· सर्वथानुवृत्तिरशक्तावशौद्रेण॥
प्रतिषिद्ध विक्रय निमय जात्यंतरवृत्ति समु-
च्चयैरपि जीवेत्। अशक्तावत्यन्तापदि
अशौद्रेण तत्रापि शूद्रवृत्तिमुञ्छोञ्छाशनं
शिल्पवृत्तिं वर्जयेत्। आपद्विहितस्य किंचि-
237 त्त्वापस्मृत्यर्थः तु शब्दः। उदाहृतं च
स्मृत्यंतरम्— कृत्वा पावनमात्मनः इति॥

237 सू. तदप्येके प्राणसंशये ॥
तदपि शौद्रकर्म मरणसंशये प्राप्तेऽके
इच्छन्ति । प्राणानामवश्यरक्षणीयत्वात् ।
तथा च व्यासः —
"धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः ।
तान्निघ्नता किं न हतं रक्षता किं न रक्षितम्" ॥
इति । प्राणग्रहणेन च तदधीनवृत्तीनां पुत्र-
दारादीनामपि ग्रहणम् । "प्राणा ह्येते बहिश्च-
राः" इति दर्शनात् । एके ग्रहणाच्च गौतमः ।
अस्यामवस्थायां गर्हितत्वादिति । इह च
238 प्राणसंशयग्रहणात् विज्ञायते अन्याप्या-
पदस्तीति । ततश्च यस्यामवस्थायां पूर्वः
कल्प उपदिष्टः सा च नित्यानां कर्मणामनुष्ठा
[न सामर्थ्ये]
? ना सामर्थ्यलक्षणा विज्ञेया । यथाह मनुः —
"देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ।
[पञ्चानां]
न निर्वपति पश्चानां उच्छ्वसन्न स जीवति" ॥

२३८ इति ।

सू· तद्वर्णसंकराभक्ष्यनियमस्तु ॥

तद्ग्रहणेन शूद्र उच्यते। सङ्करः सहासना- (योग्य)
दिः। अभक्ष्यं तदुच्छिष्टादि। तद्भोज्यं वा
लशुनादि, तयोर्नियमो वर्जनम्। तु शब्दो
विशेषवाची-अस्यामवस्थायां विशेषेण
ब्राह्मणस्येति ॥

सू· प्राणसंशये ब्राह्मणोऽपि शस्त्र-
माददीत ॥

२३९ प्राणग्रहणेन पुत्रदारहिरण्यादेरपि ग्रहणम्,
'प्राणा ह्येते बहिश्चराः' इति दर्शनात्। अपि
शब्दाद्वैश्य शूद्रावपि। क्षत्रियस्यार्थसिद्ध-
त्वाद्रक्षणार्थे प्रवृत्तेः। यद्वा क्षत्रियस्यापि॥

सू· राजन्यो वैश्यकर्म वैश्यकर्म ॥

क्षत्रियः स्वकर्मणा जीवितुमशक्तस्सन् वैश्य-
वृत्तिमातिष्ठेत। तस्यापण्य प्रतिषेधो नास्ति-

२३९ त्युक्तम् । यथा ब्राह्मणस्य क्षत्रियवृत्तिः ।
एवं क्षत्रियस्यापि वैश्यवृत्तिः तथा वैश्यस्यापि
शूद्रवृत्तिः । यथा ब्राह्मणस्य वैश्यवृत्तिः एवं
क्षत्रियस्यापि शूद्रवृत्तिरित्येवं कल्पना न
२४० भवतीति ज्ञापनार्थः सूत्रारंभः । कुतः
यदि ब्राह्मणवदितरेषामभीष्टं स्यात् तदा सर्वेष्वनन्त-
रैकान्तरां वृत्तिमातिष्ठेयुरिति अवक्ष्यत । तदनु-
क्ता "राजन्यो वैश्यकर्मे"त्यारंभात् क्षत्रियस्यै-
वापदि विहिता वृत्तिः न वैश्यशूद्रयोः, ~~क्ष~~
क्षत्रियस्यापि न शूद्रवृत्तिरिति ज्ञापयति इति ।
ततश्च क्षत्रियो वैश्यवृत्तिमातिष्ठेदापदि ।
तथा च मनुः —:

जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः ॥

इति ॥ ओम् इति

मस्करीये गौतमभाष्ये

सप्तमोऽध्यायः ॥

241 अथमस्करीये गौतमभाष्ये

॥ अष्टमोऽध्यायप्रारंभः॥

अथ यद्यापद्विहिते कर्मणि कश्चिद्दोषाप-
रिज्ञानात् लोभाद्वा, प्रसज्येत ततोऽसौ केन
निवार्यः? राजब्राह्मणाभ्यामुपदेशदण्डा
भ्याम्। यतस्तावेव (वं) ?

सू. द्वौ लोके धृतव्रतौ राजाब्राह्मणश्च बहुश्रुतः॥

द्वाविति प्रकर्षवाची न संख्यानिर्देशः द्विवचन
निर्देशादेव द्वित्वसिद्धेः। अस्ति चातिशयार्थः
संख्यानिर्देशः, यथा— "अस्मिन् ग्रामे
द्वावेव ब्राह्मणौ" विति। तत्र गम्यते अन्येपि
ब्राह्मणाः सन्ति, द्वावेवानुष्ठानपरौ इति।
अत्रापि राजब्राह्मणयोः अतिशयेन धृत-
व्रतत्वार्थं, नान्येषां प्रतिषेधार्थम्। लोक-
242. ग्रहणं वीप्सार्थम्। लोके (लोके) संघाते, लो-
के राष्ट्रे इत्यर्थः। अन्यथा सर्वकर्मणां

२४२ लोकाधिकरणत्वा॑दनर्थकमेवैतत्स्यादिति एवंच यथा प्रतिराज्यं राज्ञा भवितव्यं तथा बहुश्रुतेनापि भवितव्यमिति गम्यते। धृतव्रतौ व्रतानां कर्मणां लोकाधिकरणत्वादनर्थं धारयितारौ। राजा, क्षत्रियः, सच अभिषेकगुणयुक्तः 'सं मूर्धाभिषिक्तो राजाभवति' इति शङ्खवचनात्। ब्राह्मणश्च बहुश्रुतः। सत्यपि ब्राह्मणस्य प्राधान्ये राज्ञः पूर्वनिर्देशः बहुश्रुतस्य ब्राह्मण विशेषणार्थम्। राज्ञोपि बहुश्रुतत्वानुकर्षणार्थश्चकारः। ततश्च राज्ञो बहुश्रु

२४३ तत्वं ब्राह्मणस्य विशेषेणेति द्रष्टव्यम्। बहुश्रुतः बहुनेन श्रुतमिति राजब्राह्मणौ बहुश्रुतौ चेति वक्तव्येपि समासनिर्देशो राज्ञोऽत्यतिशयेन (शौर्यादि) शास्त्रादिगुणयोगार्थः। ततश्च तौ धृतव्रतौ स्यातामिति शेषः॥

यतः ———

२४३. सू. तयोः चतुर्विधस्य मनुष्यजातस्यान्त-
स्संज्ञानांच चलपतनसर्पणानामायत्तं
जीवनम् ॥

तयोः समुदितयोः समाननिर्देशात्। चतुर्विधस्य
मनुष्यजातस्य अंतस्संज्ञानां चलनपतनसर्पणानां
मायत्तजीवनः चातुर्वर्ण्यस्येत्यर्थः। अंतस्संज्ञा
अनुलोमा प्रतिलोमाः। चकाराद्देवाः "इतः प्रदानं
देवा उपजीवंति" इति श्रुतेः। चलनाः स्थावराः
वृक्षादयः। पतनाः पक्षिणः, सर्पणाः (कीटा-
२४४ दयः) सर्पादयः, ~~एषा~~ दामायत्तमध्यीनं जीवनं
प्राणधारणम्। कथं ब्राह्मणोपदेशादनुगृह्य-
माणा वर्णाश्रमिणो दृष्टाऽदृष्टार्थक्रियानुष्ठानान्
वृष्ट्यादिनिमित्तद्वारेण लोकोपकारे वर्तत इति ताव-
द्ब्राह्मणायत्तम्। तथाच मनुः ———
"अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः"॥ इति

244 राजा च परिपन्थिनि गृहद्वारेण हिंसानुग्रहद्वारेण

च साक्षाज्जीवनहेतुरिति ॥

न च तयोः जीवनमात्रमेवायत्तं किन्तु —

सू॰ प्रसूतिरक्षणमसंकरो धर्मः ॥

प्रसूतिः अभिवृद्धिः, सा च तदायत्ता, राजब्राह्मण

245 दण्डधारणोपदेशाभ्यां यथोक्तकारित्वात् वृष्ट्यादि

द्वारेण चोराद्यनुपद्रवाच्च भवतीति। चोरज्वराद्यादि

दि निग्रहाद्रक्षणं च, दण्डधारणप्रायश्चित्तोपदेशाभ्यां

संकराभावश्च यमनियमोपदेशात्। विहिताकरणे

प्रतिषिद्धसेवने च दण्डधारणाद्धर्मोऽपि तदायत्त

एव ॥

इदानीं कियता पुनः श्रुतेन बहुश्रुतो भवतीत्यत

आह —

सू॰ स एष बहुश्रुतो भवति ॥

स एष इति परोक्षप्रत्यक्षोपदेशः। "श्रुतं तु सर्वेभ्यो

गरीयः" इति इत्यत्रापि एवंरूपस्य ग्रहणमिति।

२४५ बहुश्रुतो भवति संपद्यत इत्यर्थः। भवतिग्रहणंच

यद्यप्येषां लोकादीनामीषद्विज्ञानं भवति, किंचिदन्य-

२४६ दपि श्रुतं, तथापि भवत्येवेत्येवमर्थं अन्यथा "सदाव

बहुश्रुत" इत्यनेनैव सिद्धत्वात्॥.

सू· लोकवेदवेदांगवित्॥

लोकग्रहणेन लोकव्यवहाराः ग्राममर्यादादय

उच्यंते। वेदशब्देन उपवेदाः, आयुर्वेद, धनुर्वेदाद्य

उच्यंते। द्वितीयवेदशब्देन चत्वारो वेदाः उच्यंते।

अंगशब्देन व्याकरणशिक्षाछंदोविचिति कल्पसू-

त्र ज्योतिषनिरुक्तान्यु(पलभ्यंते) च्यंते। विच्छ-

ब्दः प्रत्येकमभिसंबध्यते। वेदविदित्यनेनै-

व वेदपाठोपि द्रष्टव्यः। स्मृत्यंतरेऽनधीतवेदस्या-

२४६ न्यविद्या प्रतिषेधात्। यथाह मनुः——

"योऽनधीत्यद्विजो वेदमन्यत्र कुरुते श्रमम्।

सजीवन्नेव शूद्रत्वमाशुगच्छति सान्वयः॥ इति

सू· वाकोवाक्येतिहासपुराणकुशलः॥

247. वाको वाक्यमुक्ति प्रत्युक्तिरूपं तर्कशास्त्रमित्यर्थः।

तथाच मनुः—

"यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः"॥

इति। इतिहासो भारतरामायणादि। पुराणं ब्रह्माण्डा-

दि। एतेषु कुशलः निपुणः अर्थेष्वेव न पूर्वेष्वि-

व ग्रन्थार्थयोः, क्रियापदान्तरारंभात्। एवं

न केवलं वेद एव पठितव्यः। अपितु अंगा-

248. नि। तथाच स्मृत्यंतरं—"सांगो वेदो-

ऽध्येतव्यः" इति॥

सू. तदपेक्षः तद्वृत्तिः॥

तदपेक्षो वेदप्रसिध्दार्थानुवचनशीलः,

तद्वृत्तिः तदभिहितकर्मानुष्ठानपरः॥

सू. चत्वारिंशता संस्कारैरसंस्कृतः॥

तैश्च वक्ष्यमाणाः गर्भाधानादयः, तैश्चोपेतः। वक्ष्य

माणत्वादेव सिध्दे संख्यानिर्देशः समुच्चयार्थो मा-

(भूदिति) मा वा बहुवचनस्य प्रयोगे त्रिभिः

248 कृतार्थयतीति । "यस्य तु खलु संस्काराणामेकदेशोऽपि"
इति, अत्रापिशब्दात्समुच्चयोपि गम्यत इति चेन्न
एकदेशशब्दस्य संस्कारावयववाचित्वेनापि
249 कृतार्थत्व प्रसंगात् । अत इह समुच्चयाभिधानात्
तत्रैकदेशग्रहणेन कतिपय संस्कारसिद्धिः ॥

किञ्च —

सू. त्रिषु कर्मस्वभिरतः ॥

तानि च अध्ययनदानेज्यालक्षणानि द्विजातीनामध्ययनमित्यत्रोक्तानि । तेष्वभिरतः सततानुष्ठानशीलः । तद्वृत्तिरित्यनेनैवानुष्ठाने सिद्धे विशेषार्थ आरंभः । विशेषश्चातिशयेन सेवनं अदृष्टार्थत्व ज्ञापनं वा ॥

सू. षट्सु वा ॥.

याजनाध्यापनप्रतिग्रहैः सह षट् भवंति । एषाम प्यदृष्टार्थत्वज्ञापनार्थः पुनशरंभः ॥

250 सू. सामयाचारिकेष्वभिविनीतः ॥

२५० सामयिकाः स्मार्तोउपनिबन्धाः। आचारिकाः
शिष्टाचरिताः पथार्थाः अनुपनिबद्धाः। तेषु
उभयविधेषु कर्मस्वभिविनीतः ज्ञात्वा अनुष्ठान
रतः॥

एवंरूपो ब्राह्मणः —

सू. षड्भिः परिहार्यो राज्ञा अवध्यश्चा
बन्ध्यश्चादण्ड्यश्चाबहिष्कार्यश्चापरि
वाद्यश्चापरिहार्यश्चेति॥

अबुद्धिपूर्वे सत्यप्यपराधे बंधादियो-
ग्येबुद्धिपूर्वकस्य प्रसंगाभावात्त इति-
त्वात् षड्भिः वर्जनीयः। षड्ग्रहणात्
अपराधसमुच्चयेपि पुनः पुनः वधः ता-
डनं इतरस्य प्रसंगाभावात्। बंधो निग-
लादियोगः। दण्डो धनापहरणम्। बहिष्करणं
२५१ ग्रामादिभ्यो निरसनम्। परीवादो दोषसंकीर्तनम्।
परिहारः त्यागः। अनुमंता प्रयोजयितापि न स्या

२५। दित्येवमर्थश्चकारः। इतिकरणं प्रकारवाची।

१ अतश्चासंभाषणादि नकर्तव्यम्॥

यत आह
चत्वारिंशत्संस्कारैरित्युक्तं, के पुनस्त इति ~~तानाह~~—

सू॰ गर्भाधानपुंसवनसीमन्तोन्नयन
जातकर्मनामकरणान्नप्राशनचौलो
पनयनम्॥

गर्भाधानादयः प्रतिगृह्यं समाम्नाताः। इहाभि-
धानं तु संस्कारत्वज्ञापनार्थम्। मनुनापि चैषां-
संस्कारत्वमुक्तम्——"निषेकादि श्मशानांतो"
इत्यादि। गर्भाधानं ऋतावेवमेव "संवेश-
ने हुत्वा" इत्यादि प्रतिगृह्यं द्रष्टव्यम्। पुंस
२५२ वनं तृतीये मासि चोद्यते(प्रथमे गर्भे ना-
न्यत्र।) प्रथमगर्भादन्यत्र तु तस्य तु व्यक्ते गर्भे
प्रतिगर्भं केचिदिच्छंति। केचदेकमेव। तथा-
सीमन्तोन्नयनमपि। चतुर्थे षष्ठेऽष्टमे वा
छेद्या
चोद्यते। जातकर्मापि स्तनप्राशनान्नाभिवर्धनाद्वा-

252 प्राक् द्रष्टव्यम् । नामकरणं दशमे द्वादशे वाऽहनि पुण्ये-
नक्षत्रेवा । अन्नप्राशनं षष्ठेमासे संवत्सरे वा । यथाह-
शङ्खः :- "संवत्सरेऽन्नप्राशनं षष्ठेवा" इति । चौलं
संवत्सरे सार्धे तृतीयेवा । उपनयनमुक्तम् । उपनिष्क्रमणस्य
अन्नप्राशनएवान्तर्भूतत्वान्नोक्तम् । यदुक्तं मनुना-
253 "मासे चतुर्थेकर्तव्यः शिशोः निष्क्रमणं गृहात्" ॥
इति ॥ किंच --
(सू॰ ~~स्नानंसहधर्मचारिणीसंयोगः पंचानां~~
~~यज्ञानामनुष्ठानं देवपितृमनुष्यभूत ब्रह्मणामेतेषांच~~॥)
सू॰ चत्वारिवेदव्रतानि ॥
ब्राह्मणग्रहणार्थत्वात्पृथगुपदेशः । प्रतिवेदं चत्वा-
रि चत्वारि गृहीतव्यानीत्येवमर्थं वेदग्रहणम् ॥
किंच
सू॰ स्नानंसहधर्मचारिणीसंयोगः पंचानां
यज्ञानामनुष्ठानंदेवपितृमनुष्यभूतब्रह्मणामेतेषांच॥
स्नानं समावृत्तिः । सहधर्मचारिणीसंयोगो
विवाहः । विसमासो नावश्यमनंतरमेव विवा-

253 ह इति ज्ञापनार्थः। विवाह इति वक्तव्ये सहधर्मचारि
णीग्रहणं दारपरिग्रहस्य कर्मार्थत्वज्ञापनार्थम्।
254 एवं चाकृतदारस्य, विधुरस्य च पंचयज्ञाद्यभावेऽपि न
दोषः। पंचानां यज्ञानां अनुष्ठानं देवयज्ञादीनां
करणम्। अनुष्ठानाभिसंबंधार्थः षष्ठ्या निर्देशः।
अनुष्ठानग्रहणं च नाग्निष्टोमादिवत् कदाचिदेव।
किंतु अहरहः इत्येवमर्थम्। यद्यपि देवयज्ञा-
दय एव पंचमहायज्ञाः तथापि देवादीनामु-
पादानं पंच संस्कारत्वज्ञापनार्थम्। अन्य-
था पंचयज्ञानुष्ठानमेक एव संस्कार इत्याशं
का स्यादिति। देवयज्ञादयो व्याख्याताः। एते-
षामिति उक्ताः पंचयज्ञाः उच्यंते आत्मगुण-
समुच्चयार्थश्चकारः। ततश्च पञ्चयज्ञा अपि
255 आत्मगुणसहिता एव पुरुषार्थप्रापकाः न पृथक्कृ-
ताः इति सिद्धं भवति। एतेषामिति वक्ष्यमाणाना
मपि उपलक्षणं, अनेनोक्ताः पंच(महा)यज्ञा एव आत्म

255 गुणसहिताः। कुतः यदि पंच(महा)यज्ञानामेव आत्म-
गुणसहितत्वमिष्यते, तदानीं पंच(महा)यज्ञानां सगुणा
नां अनुष्ठानमित्यवक्ष्यत्। ततश्च वक्ष्यमाणा अपि
आत्मगुणसहिता एव ब्रह्मसायुज्यप्रापकाः इति
द्रष्टव्यम्॥

सू॰ अष्टकापार्वणश्राद्धं श्रावण्याग्रहाय-
णीचैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः॥

"ऊर्ध्वमाग्रहायण्यास्त्रयोऽपरपक्षाः तेषामेकैक-
256 स्मिन्नेकैकाष्टका भवतीति या उच्यन्ते ता अष्टकाः।
पार्वणश्राद्धं पर्वणि भवन्मासश्राद्धं उच्य
ते। श्रावणीशब्देन श्रावणपौर्णमासीयु
क्तत्वादुपाकरणमुच्यते। आग्रहायणीशब्दे-
न आग्रहायणमुच्यते। चैत्रीशब्देन शूल
गवः। आश्वयुजीति इन्द्रध्वजहोमः। सप्त
ग्रहणमेकैकस्य संस्कारत्वगणनार्थम्।
पाकग्रहणं स्थालीपाकसंबंधार्थम्।

यज्ञग्रहणं अग्निसंबंधार्थम्।

256 संस्था सम्यक् स्थिता गृह्यऽवोक्ताः इत्यर्थः॥

सू. अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्र-
यणं चातुर्मास्यानि निरूढपशुबंधः
257 सौत्रामणीति सप्तहविर्यज्ञसंस्थाः॥

श्रुतिप्रसिद्धकर्मानुवादः संस्कारार्थः। अत्र ग्रयणशब्देन आग्रयणेष्टिरुच्यते। इतरस्य पूर्वमुक्तत्वात्। अग्न्याधेयमित्याधानमुच्यते। अग्निहोत्रंनाम हविर्यज्ञः श्रुतौ प्रसिद्धः। दर्श-पूर्णमासौ संस्कारमध्ये(ऽक्त)ऽव। इतरे प्रसिद्धाः। सप्तग्रहणमुक्तप्रयोजनम्। शेषस्याप्युक्तमेव॥

सू. अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यष्षोड-
शी वाजपेयोऽतिरात्रोऽप्तोर्याम इति
सप्त सोमयज्ञसंस्थाः॥

उक्तेनैव न्यायेन सूत्रंव्याख्येयम्। पाकयज्ञादीनां विसमासो भिन्नफलत्वज्ञापनार्थः॥

सू. इत्येते चत्वारिंशत्संस्काराः॥

258 इत्येन इत्युक्तोपसंहारः। चत्वारिंशदिति नियमा-
र्थः, एतावन्त एव संस्कारा इति। ततश्च समस्त-
स्मार्तश्रौतकर्मसंपदुपेतो भवति ॥.

सू. अथाष्टावात्मगुणाः॥

वक्ष्यंत इति शेषः। अथ शब्दोऽनन्तरवाची,
संस्कारानन्तरं आत्मगुणाः वक्ष्यंत इत्यर्थः।
सर्व एवैते गर्भाधानादिभिः सह समुच्चीयन्ते,
~~नमु~~ ननु यथालाभमित्येवमर्थमष्टौग्रहणमिति
केचित्। तदयुक्तम् "यस्य तु खलु संस्कारा-
णामेकदेशोऽप्यष्टावात्मगुणाः" इत्यत्राष्टौ
259 ग्रहणस्यानर्थक्य प्रसंगात्। ततश्च संज्ञार्थं
वचनं, यत्र यत्राष्टावात्मगुणा इति उच्यंते तत्रतत
दयादीनामेव ग्रहणं यथास्यादिति। समुचिता-
नामेव प्रवेशो यथास्यात् इत्येवमर्थं गुरुसंज्ञा-
करणम्॥

सू. दया सर्वभूतेषु क्षांतिरना~~सासी~~सूया।

259 शौचमनायासो ऽ मंगलमकार्पण्यमस्पृहेति॥

दया शिव हितचिंतनम। तथा पुराण उक्तम ——

"आत्मवत्सर्वभूतेषु यश्शिवाय हिताय च।

वर्तते सततं हृष्टः कृत्स्ना ह्येषा दया स्मृता"॥

इति। सर्वमहणात्स्थावरेष्वपि। क्षांतिः बाह्या 27 आध्यात्मिक द्वंद्व द्वंद्व सहिष्णुता

न्तर द्वंद्व सहिष्णुता। यथाह व्यासः ——

260 आक्रुष्टोभिहतोवापि नक्रोशेन्नैव ताडयेत्।

अदुष्टो वाङ्मनःकायैस्सा तितिक्षा क्षमा स्मृता॥

इति। अनसूया गुणवतामुपरि प्रद्वेषाभावः।

तथाह ——

यो धर्ममर्थं कामं वा लभते मोक्षमेव वा।

न द्विष्यात्तं सदा प्राज्ञः अनसूयेति सा स्मृता॥

इति। शौचं द्रव्यादि शौचम। यथाऽऽह व्यासः —

द्रव्य शौचं मनश्शौचं वाक्शौचं कायिकं तथा।

शौचं चतुर्विधं प्रोक्तं ऋषिभिः तत्वदर्शिभिः॥

इति। अनायास आत्मपीडानारंभः। यदाह—

260. यदारंभे भवेत्पीडा नित्यमत्यन्तमात्मनः ।
तद्वर्जयेद्धर्म्यमपि सो अनायासः प्रकीर्तितः (स्स उच्यते) ॥
261. मंगलं प्रशस्ताचरणं अप्रशस्तविवर्जनं च । यथाह—
प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् ।
एतद्धि मंगलं प्रोक्तं ऋषिभिः तत्त्वदर्शिभिः ॥
इति । अकार्पण्यं आपद्यप्यदीनता संविभागरुचित्वं च । यथाह——
~~(विवर्जयेदसंतोषं विषयेषु सदा नरः ।)~~
आपद्यपि च कष्टायां भवेद्दीनो न कस्यचित् ।
संविभागरुचिश्च स्यात् अकार्पण्यं तदुच्यते ॥
इति । अस्पृहाविषयसंतोषः परद्रव्यानभिलाषश्च । यथाह——
विवर्जयेत् असंतोषं विषयेषु सदा नरः ।
परद्रव्याभिलाषं च तदस्पृहमिति स्मृतम् ॥
(साऽस्पृहा कथ्यते बुधैः ॥) इति ॥ इतिकरणं: समाप्त्यर्थः । एतावान् पुरुषस्य संस्कारः

262. कर्तव्यः इत्यर्थः। असमासः फल पृथक्त्व-
ज्ञापनार्थः। यथाह —:

क्षमावान् जयते भूमिं दयावान् सुखमेधते।
अनसूयुः लभेत्स्वर्गं शौचेनाध्यात्ममेव च ॥
मंगलेन तु संपूज्येह लोके परत्र च।
अनायासात् सुखैस्साम्यं कार्पण्यात्प्रकृतौ लयम् ॥
इति।
अस्पृहो लभते नित्यं आनन्त्यं सुखमेव च।
सर्वैस्तु ब्रह्मणः स्थानं संस्कारैश्च तथैव च॥
इति। एवं च सर्वालाभे यथालाभपरिग्रहोपि
कर्तव्यः॥ पृथग्भूतानामपि फलश्रवणात्॥
सू॰ यस्यैते चत्वारिंशत्संस्काराः न
चाष्टावात्मगुणाः न स ब्रह्मणः
सायुज्यं सालोक्यं च गच्छति ॥
263 यस्य तु पुरुषस्य। एत इति संस्कारपरामर्शः
गुणानां गौरवार्थम्। चत्वारिंशदिति संहि-

263 तानामप्यसामर्थ्यज्ञापनार्थम्। नचाष्टावात्म-
गुणाः। चकारात्समस्ताव्यस्ताश्च। एतदपि-
गुणस्तुतिः। न स ब्रह्मणः सायुज्यं सालोक्यं
च गच्छति। ब्रह्मानाम देवताविशेषः। सायुज्यं
ऐकात्म्यं, सालोक्यं समानस्थानवासित्वम्।
निन्दा(त्र)वा (गुण) स्तुत्यर्थैव। प्राधान्यात्
सायुज्यस्यैव पूर्वमुपदेशः॥

सू॰ यस्य तु खलु संस्काराणामेकदेशोऽप्य-
ष्टावात्मगुणाः अथ स ब्रह्मणः
सायुज्यं सालोक्यं च गच्छति गच्छति॥

तु शब्दः विशेषवाची, एकदेशस्य ग्रहणे
सोपनयनस्यैव ग्रहणमिति। खल्वित्यवधारणे,
सएव गच्छतीति। अपि शब्दात्समस्ताऽपि।
अथ शब्द आनन्तर्येणैव गच्छतीति। एकदेश-
योगात्सालोक्यं, समस्तयोगात्सायुज्यमिति
इयमपि गुण स्तुतिः॥ ओम्॥

२६४ इति मस्करीये गौतमभाष्ये ॥.

## अष्टमोऽध्यायः ॥

—

## अथ नवमोऽध्यायः ॥.

ओम् ॥. राजब्राह्मणयोः अतिशयेन व्रतपरत्वमुक्तम्। सांप्रतं व्रतस्वरूपकथनार्थं तदवधिकालावधारणार्थं चाह —

सू. स विधिपूर्वं स्नात्वा भार्यामधिगम्य-
यथोक्तान् गृहस्थधर्मान् प्रयुञ्जानः
इमानि व्रतान्यनुकर्षेत् स्नातकः ॥

स इति राजब्राह्मणयोः प्रत्येकं परामर्शः। विधिपूर्वमिति विद्यया व्रतेनोभयेन वा, पूर्वग्रहणात्, अन्यथा विधिवदित्येव
२६५ वक्तव्यम्। स्नात्वेति भार्याधिगमवचनादा-
क्षिप्तमप्युच्यते। गृहस्थाश्रमाभ्युपगम एव स्नानं नान्याश्रमप्रतिपत्ताविति ज्ञापनार्थम्।

२६८ भार्यामधिगम्य दारपरिग्रहं कृत्वा। तत्र स्नाना-
नन्तरं भार्याधिगमः कर्तव्यः। क्त्वा प्रत्यय
निर्देशात्, अनाश्रमित्वावस्थानस्यायुक्तत्वात्,
इति केचिद् व्याचक्षते। तदयुक्तमानन्तर्यासंभवा
त्, पराधीनत्वात्कन्यालाभस्य, स्मृत्यंतरेच विवा-
हकालनियमात्। यथाहोशनाः —
"त्रिंशद्वर्षो वहेत्कन्यामिति"। तत्राप्यानन्तर्येसति-
स्नानकालविधानादेव सिद्धत्वादेतन्न वक्तव्यम्।
२८६ समाचाराच्च, नहि कश्चित्स्नानानन्तरं विवा-
हमकृत्वा प्रायश्चित्तं कुर्वन्नुपलभ्यते, शिष्टै-
र्वा निन्द्यत इति। उदगयनापूर्यमाणपक्ष इति
पुण्याह प्रतीक्षणोपदेशाच्च। मानवे — "सांत
निकं यक्ष्यमाणं" इति अकृतविवाहस्यावस्था
नोपदेशात्। अत्रापि "गुर्वर्थ निवेशौषधा
र्थवृत्ति क्षीणं" इत्यत्रोक्तत्वात्।
क्त्वा प्रत्ययस्तु पूर्वकालतामात्र एव व्यावर्त्य

266 ऽस्मर्यते नानन्तर्ये। आनन्तर्येण संकीर्तनमकृत-
कृतस्नानस्य गार्हस्थ्य प्रतिषेधार्थं, स्नात्वैव-
विवाहः कर्तव्यः इति।

यत्तूक्तमनाश्रमिणोऽवस्थानमयुक्तमिति,
तत्रोच्यते — नैवायमनाश्रमी — कथं? समाप्त-
267 ब्रह्मचर्यो गुर्वनुज्ञया स्नातो यावता कालेन यत्नं-
कृत्वा भार्यां अधिगच्छति,* तावन्तं कालं अयं-
स्नातक व्रताधिकृतोऽविप्लुत ब्रह्मचर्यो गृहस्था-
न्तर्भूत एवेति। अतएव (तदर्थमेव) "गृहस्थः
सदृशीं भार्यां विन्देते"त्यत्र (अकृत विवाहेऽपि)
गृहस्थ शब्दः प्रयुक्तः।

न चानियत कालमेवावस्थानं, स्मृत्यंतरे* आयु-
र्विभागेनाश्रम प्रतिपत्ति विधानात्। यथाह मनुः —
"चतुर्थमायुषो भागम्" इत्यादि यथोदाहृतौ
शनसवचनाच्च, "पूर्णचत्वारिंशद्वर्षो गृही
भवेत् इति व्याघ्रवचनाच्च, "स्नातकोऽब्द-

267 आयुस्तिष्ठेदिति" कण्ववचनाच्च। तत्र दुर्विज्ञेयत्वा-
268 युर्भागस्य शतवर्षचतुर्भागो गृह्यते। सोऽप्येक
वेदाध्यायिनः। ~~चतुश्चत्वारिंशद्~~ यदुक्तं "त्रिंशद्वर्षैः"
(इति) तदपि वेदद्वयाध्यायिनः। यदुक्तं "चत्वारिंशद्वर्षं"
(इति) तद्वेदत्रयाध्यायिनः। यद्यसौ प्रागेव परि-
समाप्तविद्यः, अपरिसमाप्तविद्यश्चेद्यावता
कालेन परिसमाप्य स्नातो भवेत्, तस्माद्-
ध्वं वर्षत्रयमकृतदारस्तिष्ठेदित्येवं नियतकालमेव
अवस्थानम्। तस्मादेवं गृहस्थान्तर्भूत एवेति।
ततश्च "अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः"
इति दक्षवचनस्य विधुरविषयत्वं द्रष्टव्यम्।
तत्र दिनमेकमपि सति संभव इति शेषः, पराधीन
त्वात्कन्यालाभस्य। अथवा अनाश्रमी न तिष्ठेत
269 दिनमेकमपि यत्नमकृत्वेति शेषः। तत्र पूर्वस्मिन्
पक्षे संभवे सत्यकुर्वतो दोषः, असंभवे न दोषः।
उत्तरस्मिन् पक्षे यत्नमकुर्वतो दोषः।

269. यथोक्तान् गृहस्थधर्मान् प्रयुञ्जानः (इमानि
व्रतान्यनुकर्षेत्) तत्रैवोक्तत्वादेव सिद्धे इहोपदेशो
गृहस्थः सदृशीभिर्युक्तानामपि स्नातकव्रतानामा-
वार्यम्। ततः तदतिक्रमेऽपि स्मृत्यंतरोक्तं स्ना-
तकव्रतलोपप्रायश्चित्तं द्रष्टव्यम्। यथाह मनुः—
"स्नातकव्रतलोपे तु प्रायश्चित्तमभोजनम्" इति। अनु-
क्ता अपि गृहस्थधर्माः सन्तीति कस्यचिदाशंका
स्यादिति तन्निवृत्त्यर्थं यथोक्तग्रहणम्। तत्रोक्त-
270 ग्रहणेनैव सिद्धे ये ब्रह्मचारिधर्माः "उत्तरेषां
चैतदविरोधीत्यनेनाधिक्रियंते तेषामपि
ग्रहणार्थं यथाग्रहणं नु तदतिक्रमेऽपि स्नात-
कव्रतलोपप्रायश्चित्तं यथा स्यादिति।

ननु च भार्यामधिगम्य यथोक्तान् धर्मान्
प्रयुंजान इति न वक्तव्यम्, भार्याधिगमोत्तरकालं
गृहस्थधर्मैरेवाधिकृतत्वादिति। उच्यते —
गृहस्थस्नातकयोः (धर्मयोः) पृथक्त्वज्ञापना

२७० धर्मः (गृहस्थग्रहणम्) उक्ताश्च गृहस्थधर्माः
वक्ष्यमाणाः तैः सहिताः स्नातकधर्माः इति
पृथक्त्वज्ञापनार्थं च राजब्राह्मणयोरेव नियमे-
न स्नातकव्रतानुष्ठानं, तदतिक्रमे प्रायश्चि-
२७१ त्तं च, इतरेषां तदनुष्ठानेऽभ्युदयः, अकरणे-
(प्रत्यवाय) प्रायश्चित्ताभावश्चेत्येव मर्थम्। तथा च
स्मृत्यन्तरम्—

स्नातकव्रतलोपे तु प्रायश्चित्तं विधीयते।
राजब्राह्मणयोरेव नेतरेषां कथञ्चन" ॥ इति
अत्रापि "द्वौ लोके धृतव्रतौ" इति विशेषेण व्रत
साधारणोक्तेरेतदेवतात्पर्यम्।

इमानि वक्ष्यमाणानि व्रतान्यनुकर्ष-
न् स्नातको यावज्जीवं कुर्यात्। अवश्यं कर्त-
व्यानि न फलार्थानीत्येवमर्थं व्रतग्रहणम्।
तावं च स्नातकः शश्वत् ब्रह्मलोकान्न च्यवते
इति फलोपदेशो" ज्योतिष्टोमेन स्वर्गकामो यजेत-

271. त्यत्र फलोपदेशवद् द्रष्टव्यम् । वक्ष्यमाणान्येव
272 व्रतानि न व्रतान्तराणीत्येव(माशंकानिवृत्त्यर्थम
र्थं इमानीत्यस्योपादानम् । व्रतत्वेनानुष्ठाने
सिद्धेऽनुकर्षेदिति यावज्जीवार्थम् । स्नातक
इत्यस्यैवोपादानं संज्ञार्थं— यो वक्ष्यमाण
व्रतान्यनुतिष्ठेतासौ गृहस्थः स्नातक इत्युच्यत इति।
अन्यथा सः विधिपूर्वं स्नात्वा इत्यनेनैव सिद्धत्वात्
(नवक्तव्यम्) ॥

कानि पुनः तानि व्रतानीत्यत आह —

सू. नित्यं शुचिः सुगंधः स्नानशीलः ॥

स्यादिति शेषः । नित्यं शुचिः आचमनादिना ।
नित्यग्रहणादातुरावस्थायां अपि सुगंधैरम-
लकादिभिः स्नातुं शीलो यस्यासौ सुगन्ध-
स्नानशीलः । "स्नानदन्तधावनेति" ब्रह्मचारि-
प्रकरणे प्रतिषिद्धस्य प्रतिप्रसवः । शीलग्रहणा
273 दसंभवे केवलस्नानेनापि न दोषः । स्नात-

२७३. कस्य, विसमासः यानि नित्यं धार्यमाणानि तेषा-
मप्युपसंग्रहार्थम्। यथाह वसिष्ठः —
" स्नातकानान्तु नित्यानि अंतर्वासस्तथोत्तरम्।
यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुः"॥
सुगंधस्नान शील इति सुशब्दोपादानात् स्नानो-
तर कालमपि अनुलेपनं कर्तव्यम्॥

सू· सतिविभवे न जीर्णमलवद्वासा-
स्स्यात्॥

सत्यन्य संभवे जीर्णं मलवच्च वासो न धारयेत्॥

सू॰ न रक्तमुल्बणं अन्य धृतं वासो-
बिभृयात्॥.

रक्तं कुसुम्भादिना, उल्बणं उद्धताद्यमरक्तं अपि·
२७४ अन्यधृतं गुरुरवर्जं उच्छिष्टाभ्यनुज्ञानात्।
पृथगारंभसामर्थ्यात् औपपद्यापि न धारयेत्।
प्रत्येकं वर्जनार्थो विसमासः॥

सू॰ न स्रगुपानहौ॥

२७४. पूर्वोक्तविशेषणविशिष्टौ सशलाका उपानहौ लाक्षादिना रक्तौ न तु काषायेण । सूत्रद्वयारंभः यथासंख्यनिवृत्यर्थः ॥.

सू. निर्णिक्तमशक्तौ ॥

अन्यासंभवेतु वासःप्रभृति कृतशौचं धारयेत् । अशक्तिरन्यासंभव इति ॥.

सू. न रूढश्मश्रुरकस्मात् ॥.

श्मश्रुग्रहणं नखादीनामप्युपलक्षणम् । रूढग्रहणान्नवपनं, किन्तु समलेन कल्पनामात्रम् । तथाच मनुः — "कॢप्तकेशनख

२७५ श्मश्रुः" इति । तत्र केशकल्पनात्तु मलापकर्षणं कृत्वा श्लक्ष्णतापादनम् । यथाहोशनाः — "केशानि निर्मलानि श्लक्ष्णान्यतान्नसुगंधीनि स्नातको धारयेत्" इति ॥.

सू. नाग्निमपश्च युगपद्धारयेत् ॥

युगपदेककाले, अपामुत्तरस्वत्रादि संबंधा-

२७५ र्थः विसमासः। अन्यसमुच्चयार्थश्चकारः।

यथाह व्याघ्रः—

न धारयेदपश्याग्निं अपश्यान्नं तथैव च।

युगपत् स्नातको नित्यं तद्भार्यांश्च तथैव च॥

इति॥.

सू. नांजलिना पिबेत्॥

अपः प्रकृतत्वात्। द्विहस्तसंयोगोऽ

२७६ जलिः। ततश्चैकहस्तेनाप्रतिषेधः। अस

अविशेषान्न किंचित्पिबेदिति केचित्।

तेषां पूर्वसूत्रे विसमासप्रयोजनं मृग्यम्॥

सू. न तिष्ठन्॥

तिष्ठंश्च न पिबेत्। तिष्ठंश्चेति प्रतिषेधे-

सिद्धे पुनः प्रतिषेधग्रहणं क्षीरादीना-

मुपसंग्रहार्थम्॥.

सू. उद्धृतोदकेनाचामेत्॥.

उद्धृतमुदकं येनेत्युद्धृतोदकशब्देन

(पृ.५८)

276 कमण्डलुरुच्यते । तेनाचामेत् ॥

सू· न शूद्राशुच्येकपाण्यावर्जितेन ॥

(न) शूद्रजात्या शुचिनापि अशुचिना अशूद्र
जात्यापि ऽ एकहस्तेन शुचिना अशूद्रजात्याऽ-
277 पि नाचामेत् । अनेनाप्राप्त-प्रतिषेधेन पूर्वसू-
त्रस्य नियमाभावं ज्ञापयति । ततश्च विकल्पो-
द्रष्टव्यः । कमण्डलुना, अशूद्रेणोभयहस्ता-
वर्जितेन वाचामेत् इति । एवं च कमण्ड-
लुनैवाचमनस्य नियमाभावात् तत्कारण-
(ज्ञापयति)
स्याप्यनित्यत्वं द्रष्टव्यम् । आचमनार्थत्वाद्धा-
रणस्येति ॥

सू· न वाय्वग्निविप्रादित्यापो देवता गाश्च
प्रति पश्यन्वा मूत्रपुरीषामेध्यानि व्युदस्येत् ॥

वाय्वाद्यभिमुखोऽन्यमुखोऽपि चैतानवलोकय-
न् मूत्रपुरीषादीन् न विसर्जयेत् । देवताशब्देन -
तत्प्रतिकृतय आलेख्यादिरूपाः उच्यन्ते ।

२७२, २७४ देवताग्रहणेन वाय्वादीनामपि सिद्धेः तेषामु-
पादानं नाधिक्योपसंग्रहार्थम्। ततश्च चंद्रग्रह-
नक्षत्र तारकादि दर्शनेन दोषः। च शब्दात्
स्मरन्नपि चैतान्न कुर्यात्। मूत्रपुरीषयोरमेध्य
त्वात् अमेध्यस्य पुनर्ग्रहणं मेध्यविशेषार्थम्।
ततश्च शुक्लनिरसनाद्यपि नकर्तव्यं इति द्रष्टव्यम्।
सू. नैता देवताः प्रति पादौ प्रसारयेत्॥
पुनः देवताग्रहणं गोब्राह्मणयोरपि देवतात्वा
र्थम्। पादाविति द्विवचनं नविवक्षितम्।
(एकमपि न प्रसारयेत् किं पुनः द्वौ॥)
सू. न पर्णलोष्टाश्मभिः मूत्रपुरीषा-
पकर्षणं कुर्यात्॥.
२७५ लोष्ट शब्देन मृद्गृह्यते। ततश्चान्यैरप
कर्षणं कुर्यात्॥ इतरत्प्रसिद्धम्।
सू. न भस्मकेशतुषकपालामेध्यान्य-
धितिष्ठेत्॥

२७९. भस्मादीनि नाक्रामेत्। केशो मनुष्याणाम्।
कपालानि भिन्नभाण्डावयवानि। अमेध्यानि
मूत्रादीनि ॥

सू. न म्लेच्छाशुच्यधार्मिकैस्सह संभाषेत॥
म्लेच्छाः पारसीकादयः। अशुचयः उपायोअ-
पि। अधार्मिकाः पतितादयः। तैस्सह मंत्रयेदि-
ति। तृतीयानिर्देशादेव सहभावे सिद्धे अतिश-
यार्थं सहशब्दस्योपादानम् ॥ सतस्थानेन
सहैककार्यतां गत्वा न संभाषेत। मार्गप्रश्नादौ
तु न दोषः ॥

२८० सू. संभाष्य पुण्यकृतो मनसा ध्यायेत्॥
यदि त्वज्ञानात्कार्यवशाद्वा संभाषेत ततः
पुण्यकृतः सुकृतकारिणः, बहुवचनप्रयोगा
त् बहून्, मनसा चिन्तयेत्। मनोग्रहणं अ-
अवयनिरूपणेन स्मरणार्थम् ॥

सू. ब्राह्मणेन वा सह संभाषेत ॥

२८० पुण्यकृत्स्वेव ब्राह्मणः। सद्ग्रहणात् ब्राह्मणोऽपि यदि भाषेत। आनन्तरानुष्ठानार्थं अप्रकरणे प्रायश्चित्ताभिधानं लाघवार्थं वा॥

सू. अधेनुं धेनुभव्येति ब्रूयात्॥.

अधेनुः वंध्या गौः, तां धेनुभव्येत्येवमभिदध्यात्।
२८१ इतिकरणं प्रकारावबोधार्थं, माभूदन्ये-ष्वपि एवं रूपाणां तद्वत्संशब्दनमिति। एतदेव प्रयोजनमितिकरणानां वक्ष्यमाणानामपि॥

(~~सू. कपालं भगालमिति॥~~).

सू. अभद्रं भद्रमिति॥.

अभद्रं अभजनीयं अश्लीलत्वादमङ्गलत्वाद्वा। तद्भद्रमित्येवमभिदध्यात्। यथा दुर्भगं सुभगमिति॥

सू. कपालं भगालमिति॥.

कपालं भिन्नभाण्डावयवं भगालमिति ब्रूयात्॥

सू. मणिधनुरितीन्द्रधनुः॥

२८१. इन्द्रधनुः मणिधनुरितिब्रूयात् । वचनप्रामाण्या
देवैषामभिधानम् ॥

सू. गां धयन्तीं परस्मै नाचक्षीत ॥

(गां पाययन्तीं परस्मै नाचक्षीत) । परग्रहणादा-
२८२ त्मीयामाचक्षीत ॥ वारयेद्वा ॥

सू॰ न चैनां वारयेत् ॥

ऽनामिति परकीयामेव । चकारात्परिता
पमपि ॥(परिहारमपि)

सू. न मिथुनीभूत्वा शौचं प्रतिविलंबेत ॥

मिथुनीभूत्वा स्त्रियमासेव्य शौचं प्रति न विलंबे
त, सद्य एव शौचं कुर्यादित्यर्थः । वीत्युपसर्गा-
द्यावता कालेन रति न निवर्तयेत् तावन्तं कालं
विलंबेतापि । न मैथुन(शौच) विषय एव शौचाविलंबनम् ।
किंतु मूत्रपुरीषादि विषयेपि न विलंबनं कार्यमित्ये-
वमर्थं प्रतिग्रहणम् । ननुच नित्यं शुचिः स्त्रियमे-
नैव नासिद्धमित्युच्यतेति — उच्यते — अत्र·

282 शौच शब्देन (मला) लेपापकर्षणमात्रमुच्यते, आचमना
283 हौदकासंभवे तल्लेपापकर्षणं येन केन चित् (प्रकारेण)
र्तव्यमित्येवमर्थः सूत्रारंभ इति। एवं च नित्यं
शुचिरित्यस्य सति संभवे नित्यं शुचिः स्यात्
इत्येषोऽर्थो लभ्यते। तत्रासंभवात् अशुचेः
सतो न दोषः॥

सू॰ न च तस्मिन् शयने स्वाध्याय
मधीयीत॥

यस्मिन् शयने मैथुनमाचरितं तस्मिन् शयने नाधीयीत। स्वाध्यायग्रहणात् वेदः। च शब्दात् पूज्यांश्च तत्र नोपवेशयेत्॥

सू॰ न चापररात्रिमधीत्य पुनः प्रतिसंविशेत्॥

पश्चिमे रात्रिभागेऽधीत्य पुनर्न स्वप्स्यात् (स्वप्यात्)
पुनर्ग्रहणात् पूर्वमसुप्तस्या प्रतिषेधः। अपररात्र
284 ग्रहणात् पूर्वरात्रे न दोषः। यथा पूर्वं संविष्टः
तथा पुनर्न संविशेत्, न तु विश्रमार्थमपीति प्रति

284. ग्रहणम् ॥

सू. नाऽकल्यां नारीमभिरमयेत ॥

अस्वस्थशरीरां अनलंकृतशरीरशीलां वा अकल्या-
तां नारीं स्त्रियं नाभिरमयेत् नोपेयात् । अभी
त्युपगमार्थम् । ततः विनोदार्थायाः क्रीडायाः
(नदोषः) अप्रतिषेधः ॥

सू. न रजस्वलाम् ॥

उदक्यां च नोपेयात् । ननु च उदक्यागमने
त्रिरात्र इति प्रायश्चित्तविधानादेव प्रतिषेधः
सिद्ध्यतीति । उच्यते "त्रिरात्रं रजस्वलाऽशु-
चिर्भवति" इति स्मृत्यंतरदर्शनात् त्रिरात्रांत
285 गमने प्रायश्चित्तमुक्तम् । इह तूर्ध्वमनिवृत्ते
रजसि प्रतिषेधः । अन्ये त्वकालप्रवृत्ते
रजसि रजस्वलामाहुः । तदयुक्तं कालप्रवृत्त
एव रक्ते रजश्शब्दप्रवृत्तेः, तस्यैवाशुचिकरत्वा
च्च । तथा च स्मृत्यंतरम् —

285 अकाले यद्भवेत् स्त्रीणां रक्तमाहुर्मनीषिणः।
काले तु तद्रजः प्रोक्तं तस्मात्तत्रैव साऽशुचिः॥
इति। तथाच भार्गवीयमपि—:
अकाले यद्भवेत् स्त्रीणां शुचि तत्तु विनिर्दिशेत्।
अशुचिं तद्विजानीयात् मासि मासि भवेत्तु यत्॥
इति॥ तथाच वसिष्ठः—
स्त्रियः पवित्रमतुलं नैता दुष्यंति कर्हिचित्।
मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति॥
286 इति॥ तथाच श्रुतिः "सैषाभ्रूणहत्या मासिमास्या
विर्भवति" इति। तस्मात्त्रिरात्रादूर्ध्वं अप्रतिबेधः।
एवंच त्रिरात्रादूर्ध्वमप्यनुपरते रजस्यशुच्येव।
तथाच मनुः—
"रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला"।
इति। तत्र त्रिरात्रादूर्ध्वमपि अनुपरते रजसि
स्पर्शयोग्यैव, रजस्वला चतुर्थेऽहनि स्नायादिति स्पर्शनार्थ-
त्वात्स्नानचोदनायाः। रजस्वलां चेति सिद्धे

286 उत्तरार्थः पृथगारंभः॥

सू॰ न चैनां श्लिष्येत ॥.

एनामिति त्रिरात्राभ्यंतरे रजस्वलोपसंग्रहणार्थम्॥

रजस्वलामिति पृथगारंभस्यापि इदमेव प्रयोजनम्।

287 एवंच त्रिरात्रादूर्ध्वमनुपरतस्यालिंगने न दोषः।

ननुच "पतितचण्डालसूतिकोदक्याशव" इत्यादि

ना स्पर्शनप्रतिषेधादेव आलिंगनस्याप्यर्थतः

प्रतिषेधः सिद्ध्यतीति। अत्रोच्यते आलिंगने

कृते स्नातकव्रतलोपप्रायश्चित्तार्थं आरंभः इति।

चकारः एनांचाकल्यांमिति चेति समुच्चयार्थः॥

सू॰ न कन्याम् ॥.

अकृतविवाहां (नालिंगयेत,) नाश्लिष्येत्। उदकपूर्वं लब्धामपि। कन्यां चेति सिद्धे पृथग्योगकरणं अदुष्टभावालिंगने दोषाभावज्ञापनार्थम्। एवंच दुष्टभावालिंगनमात्रेणापि

कन्याया दूषणं भवति। तथाच सति पैशाचे

288 विवाहे उपनयन (संगमन) शब्देन आलिंगना-
द्येवोच्यत इति युक्तमुक्तम्। अत्र किमयं कन्या-
दूषण प्रायश्चित्तेनाधिक्रियते उत स्नातकव्रत-
लोप प्रायश्चित्तेनेति। उच्यते स्नातक व्रतलोप-
प्रायश्चित्ते नैवाधिकारः, न कन्यागमन प्राय-
श्चित्तेन, स्मृत्यंतरे 'रेतस्सेक' इत्यारंभात्।
यथाह मनुः —
"रेतस्सेकः स्वयोनीषु (योन्यासु) कुमारीष्वंत्यजा-
स्तुच ॥
इति ॥.
सू. अग्निमुखोपधमन विगृह्यवाद
बहिर्गन्धमाल्यधारण पापीयसावले-
खन भार्यासह भोजनांजत्यवेक्षण
कुद्वार प्रवेश पाद पादधावनासंदी-
289 स्थ भोजन नदीबाहुतरण वृक्षविषमा-
रोहणावरोहण प्राण व्यायच्छ-
नानि वर्जयेत् ॥.

२४९. अग्निमुखोपधमनं अग्नेः मुखेनोपधमान-
म्। विगृह्यवादो लौकिको वाक्कलहः।
जल्पस्वरूपस्य च कुत्रापि प्रकरणेऽनभि-
हितत्वात्। बहिर्गन्धमाल्यधारणं कृतरग्न-
वृक्षविषमारोह्य निर्गन्धस्रग्धारणम्।
तथाच स्मृतिः "नागन्धां स्रजं धारयेत्,
अन्यत्र हिरण्यस्रजः" इति। पापीयसाव-
~~[illegible]~~ लेखनमशुचिद्रव्यावयवेन काष्ठा-
दिना शिरःप्रभृति कंडूयनम्। भार्यासहभो-
जनं तया सहैकाधारस्थान्नाभ्यवहारः।
'अर्धो वा एष आत्मनः यत्पत्नी' इत्यर्थवाद
२५० दर्शनात् प्राप्तौ सत्यां प्रतिषेधः। न पुनः
अन्यया सहाभ्यनुज्ञानम्। स्मृत्यंतरे-
स्त्रीशूद्रोच्छिष्टसामान्येन प्रतिषेधात्।
अंजन्त्यवेक्षणं तैलाद्यभ्यंगसाधनद्रव्यसेवा-
यां भार्यावलोकनम्। कुद्वारप्रवेशनं गृहादेरप्र-

२१० सिद्धद्वारप्रवेशनम्। पादं पादे धावनं पादेन पादस्य प्रक्षालनम्। आसंदीस्थ भोजनं पीठिकायवस्थिताभ्नोपयोगः। नदी बाहुतरणं नस्य पारगमनम्। नदी पार्ह्णं तराकाना मप्युपलक्षणम्। वृक्षविषमारोहणं, वृक्षस्यारोहणं, विषमस्य कूपादेः अवतरणम्। प्राणव्यायच्छनं प्राणोपरोधः उल्लंघनादिभिः। एतानि वर्जयेत्॥

सू॰ न संदिग्धां नावमधिरोहेत्॥

२११ संदिग्धामतिभारदोषोपहतत्वात् तत्पारगमने तां नारोहेत्। अधिशब्दात् नाक्रामेदपि निष्प्रयोजनत्वात्॥

कतिपयधर्मान् शरीररक्षणहेतूनुक्त्वा अथेदानीं संक्षिप्याह (सर्वतश्च) ——

सू॰ सर्वतश्चात्मानं गोपायेत्॥

सर्वापायेभ्यः शरीरं रक्षेत्। यथा—"नैकः प्रपद्येताध्वानं नारी सहायः" इत्यादि॥

प्रति लिपि 262

२११ सर्वग्रहणात् सेवनेनापि। ऽपवशाकवात् ग्रह-
शान्त्यादिभिरपि। आत्म शब्देन शरीरमुच्यते।
तद्रक्षणमपि यथा तन्न विनश्यति तथा कर्तव्य
मित्यर्थः। यद्यपि कालऽएव विनाशकः तथापि
दुर्विज्ञेयत्वादायुषः पौरुषहीनो न भवेदित्यभि
प्रायः। तथा च ज्योतिश्शास्त्रं ——
"आयुर्ज्ञानं वयोज्ञानं गर्भिणीनां च लक्षणम्।
२१२ ऋषयश्चापि मुह्यंते किं पुनः मांसचक्षुषः॥
इति। केचिदन्यथा व्याचक्षते —— सर्वोपायैः
परमात्मानं गोपायेत्, विजानीयात्, अनेकार्थ-
त्वाद्धातूनाम्। तथाच श्रुतिः 'आत्मा ज्ञातव्यो
मंतव्यो निदिध्यासितव्यः' इति। अन्येत्वा-
त्मशब्देन परमात्मक्षेत्रज्ञजीवात्मभूतात्मानः
चत्वार उच्यंत इत्याहुः। यथाह मनुः ——
"योऽस्यात्मानः कारयिता तं क्षेत्रज्ञं प्रचक्षते।
यः करोति हि कर्माणि स भूतात्मोच्यते बुधैः॥"

292. जीवसंज्ञोऽन्तरात्मान्यः सहजः सर्वदेहिनाम् ।
येन वेदयते सर्वं सुखं दुःखं च जन्मसु ॥
प्रशासितारं सर्वेषां अणीयांसमणोरपि ।
293 रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम् ॥"
इति ॥.

सू. न प्रावृत्य शिरोऽहनि पर्यटेत् ॥.

प्रावृत्य वस्त्रादिना शिरः पिधाय दिवा समन्ता चंक्रमणं न कुर्यात् । अल्पावकाशे गच्छेदपि, परिशब्दप्रयोगात् । तत्र शिरोवेदनाऽऽतपत्राणार्थं न दोषः । सर्वत एवात्मानं गोपायेदित्युक्तत्वात् ॥

सू. प्रावृत्य तु रात्रौ ॥

उपर्थलब्धस्यापि नियमार्थ आरंभः । अल्पावकाशमपि प्रावृत्यैव गच्छेदिति ॥

सू. मूत्रोच्चारे च ॥.

कुर्यादिति शेषः । चकारात्प्रावृत्यैव ॥

२९३ तेन-

सू. दिवा कुर्यादुदङ्मुखः ॥

दिवा चेदुदङ्मुखः कुर्यात् । न वाय्वग्नि विप्रादि

२९४ त्यापो देवता गाश्चेत्यादिना आदित्याभिमुख्यनि-

वारणात् अस्य क्वचिदनित्यत्वं दर्शयति । यद्ययं

नियमः तदानीमादित्याभिमुखतायाः प्राप्त्यभा-

वादिति । तथाच स्मृत्यंतरम् ——

(वा रात्रौ वदति वा दिजः)

"छायायामंधकारे च प्राणबाधभयेषु च ।

यथा सुखमुखः कुर्यात् इति धर्मो व्यवस्थितः ॥"

इति । अयादि(त्वत्यादि)त्याभिमुखता वर्जनीयेत्य

भिप्रायेण 'न वाय्वग्नी'त्यादि सूत्रमारब्धमिति

द्रष्टव्यम् ॥

सू. संध्ययोश्च ॥

उदङ्मुखत्वानुकर्षणार्थश्चकारः ॥

सू. रात्रौ तु दक्षिणामुखः ॥

तुशब्दः अपि शब्दस्यार्थे । सोपि कुर्यादिति

(२८६)

२९४ क्रियानुकर्षणार्थः ॥

सू. न भूमावनन्तर्धाय ॥

२९५ अयज्ञियैः तृणैः। तथाच स्मृत्यंतरम्—
"भूमिमयज्ञियैः तृणैः अन्तर्धाय (आच्छाद्य)
मूत्रपुरीषे कुर्यादिति। भूमिग्रहणान्मंचादौ न
दोषः ॥

सू. न तिष्ठन् ॥

स्थितश्च मूत्रपुरीषोत्सर्गं न कुर्यात् ॥

सू. नाराच्चावसथात् ॥

गृहसमीपे न कुर्यात्। च (कारा) च्छब्दा देवा
लय सभादि समीपे च ॥

सू. न भस्म करीष कृष्टच्छाया पथिकाम्येषु ॥

गृहादि विप्रकृष्टेष्वपि भस्मादिषु न कुर्यात्।
छाया उपजीव्यच्छाया। करीषं गोमयम्।
काम्यं कमनीय प्रदेशम्। आपणादि।
काम्येष्विति बहुवचनं स्मृत्यंतरोक्तोपसंग्र-

295 हणार्थम् । यथाह वसिष्ठः —— "न नद्यां

296 मेहनं कुर्यात् न पथि न च भस्मनि न गोमये

न कृष्टे नोप्ते न शाद्वलोपजीव्य छायास्थितिः।

(छायासु इति) ॥.

सू. पालाशमासनं पादुके दन्तधावनमिति

च वर्जयेत् ॥

पालाशमासनादि न कुर्यात् । इतिकरणादन्य

दप्येवं रूपं रथादि, असमासाच्छयनं च ।

च शब्दाद्दर्व्यादि गृहोपकरणं च । तथाच-

स्मृत्यंतरम् —

"आसनं शयनं यानं गृहोपकरणानि च ।

वर्जयेत् पादुकां चैव पालाशं दन्तधावनम्" ॥

सू. सोपानत्कश्चासनाशनाभिवादन नमस्कारान्

वर्जयेत् ।

उपानत्यादौ भोजनासनाभिवादन देवताप्रणामान्

297 वर्जयेत् । च शब्दात् पादुकास्थश्च ॥

२९१. सू. न पूर्वाह्णमध्यंदिनापराह्णानफलान्कुर्याद्य-
था शक्ति धर्मार्थकामेभ्यः॥

पूर्वाह्णाद्यहर्विभागान् यथासामर्थ्यं धर्मादिभिः
(यथासंख्यं नावरुन्ध्यात्।) यथासंख्येनावरु-
न्ध्यात्। कुर्याच्चतुर्थ्येति वक्तव्ये यथाग्रहणं
समुच्चयेनाप्यासेवनप्रापणार्थम्। चतुर्थी-
निर्देशाच्च धर्मादिभिरिति द्रष्टव्यम्। तत्र पूर्वाह्णे
यथासंभवं जपादि कुर्यात्, मध्याह्ने अर्थाहर-
णोपायम्, अपराह्णे गन्धमाल्यादिसेवनमि-
ति द्रष्टव्यम्॥

सू. तेषु तु धर्मोत्तरः स्यात्॥

तेषु (धर्मार्थकामेषु) धर्मप्रधानः स्यात्।
२९८ इतरयोरासेवनासंभवेपि नियमेन धर्मः
कर्तव्य इत्यर्थः इत्यभिप्रायः। त्रीनपि
धर्मानुबंधिनः कुर्यादिति तुशब्दः॥

सू. न शिश्नोदरपाणिपादवाक्चक्षुश्रोत्र-

२५८ —लानि कुर्यात् ॥

(चापल शब्दः प्रत्येकमभिसंबध्यते) शिश्नचापलं अकाले मैथुनेच्छा। उदरचापलं, अनेकरसाभिलाषः। पाणिचापलं, शिल्पकर्मशिक्षाभिलाषः। पादचापलं, वृथाटनम्। वाक्चापलं, अपृष्टेनान्यायपृष्टेन वा धर्मादि कथनम्।

तथाच मनुः

"नापृष्टः कस्यचित् ब्रूयात् नचान्यायेन पृच्छतः।"

इति। चक्षुश्चापलं (अनवधिर्दर्शनेच्छा) वीच्यादिदर्शनेच्छा। ननुच वाग्बाहूदर संयतः इत्यनेन किंचित्पुनरुक्तमिति। नैतदेवं, तत्र वाक्संयतत्वेनानिबद्धप्रलापोपरतत्वं उक्तम्, बाहुसंयतत्वेन लोष्ठमर्दनादि-

२५९ उदरसंयतत्वेन हितमितभुक्त्वमिति ॥

सू. छेदनभेदनविलिखनविमर्दनावस्फोटनानि नाकस्मात् कुर्यात् ॥.

२९९ छेदनं तृणादीनां, भेदनं घटादेः। विलिखनं, नखादिभिः कुड्य भूम्यादीनां, विमर्दनं लोष्ठादीनां संघर्षणम्। अवस्फोटनं अंगुल्यादि संधिसंशब्दनम्। एतानि विना विशेषेन निमित्तेन न कुर्यात्। ब्रह्मचारि प्रकरणे बाहुसंयतत्वेन सिद्धे छेदनादीनां कारणे सति अभ्यनुज्ञानार्थः आरंभः॥

सू. नोपरि वत्सतंत्रीं गच्छेत्॥

यया रज्वा वत्सो बध्यते सा वत्सतंत्री। नामु-
300 लंघ्योपरि न गच्छेत्। वत्स शब्द गोजात्युपलक्षणम्॥

सू. न कुलं कुलस्स्यात्॥.

गृहाद्गृहं न गच्छेदित्यर्थः। अथवा विना कारणेन गृहात् गृहं न गच्छेत्। कुलमेव वा कुलं यस्यासौ कुलंकुलः। सत्यपि धर्माधिकारे पितृकुलएव न तिष्ठेदित्यर्थः॥

300 सू॰ नायज्ञमवृतोगच्छेत ॥

अनुपामंत्रितो यज्ञं नापेयात् ॥

सू॰ दर्शनाय तु कामम् ॥

काममिति नावश्यम्। एवमपि गच्छतो नाव
वमवश्यं भावीति। तुशब्दः नियमार्थः, दर्शना
र्थमेव न तु भोजनार्थमपीति ॥

सू॰ न भक्षानुत्संगे भक्षयेत् ॥

भक्षाः पृथुकादयः। येषामुत्संगे भक्षणं प्रसक्तं
301 तानुत्संगोपरि कृत्वा न भक्षयेत् ॥

सू॰ न रात्रौ प्रेष्याहृतम् ॥

रात्रौ प्रेष्येण शूद्रादिना आनीतं यत्किंचित्
न भक्षयेत्। कुत एतत्? भक्षानिति प्रकृते
एकवचननिर्देशात्। रात्रिग्रहणात् दिवा-
आनीतस्याप्रतिषेधः ॥

सू॰ उद्धृतस्नेहविलयनपिण्याकमथित-
प्रभृतीनि चात्तवीर्याणि नाश्नीयात् ॥

301 उद्धृतस्नेहं आत्तागमण्डं यद्वच्यादि।
विलयनं घ्रातनिष्यंदनम् (घृतनिष्पन्नम्)
पिण्याकं आन्नरसं, इतरस्य दोषाभावात्।
तथाच गृह्यस्मृतिः — "दधिनिर्मथ्यानात्-
नवनीतमश्नीयात्" इति। प्रभृतिग्रहणात् कीला-
ट कूचिकादीनि। रात्र्यनुकर्षणार्थश्चकारः।
एतानि रात्रौ नाश्नीयादिति। अथवा —
302 उद्धृतस्नेह इति प्रत्येकमभिसंबध्यते। उद्धृत-
स्नेहं यद्विलयनं, यच्च पिण्याकं यानि च
मथित प्रभृतीनि। प्रभृतिग्रहणेन दधिक्षीरे
उच्येते। तयोः उद्धृतस्नेहत्वमात्तमंडत्वम्। उद्धृ-
तस्नेहानि नाश्नीयादिति सिद्धे विलयनादीनां
मुपादानं अन्येषामाम्रफलादीनां उद्धृतस्नेहानां अभ्यनु-
ज्ञानार्थम्। एतानि रात्रौ नाश्नीयात्, दिवा-
न दोषः। आत्तवीर्याणि, वीर्यशब्देन सार-
मुच्यते। तदात्तं यस्मिन् तदात्त वीर्यमुच्य

302 ते कदली फलत्वगादि । पृथगारंभाद्विवापि ।
ननु च अभक्ष्यभक्षणप्रकरण एवेदं वक्तव्यमि-
ति । उच्यते ऽनत्ययतिक्रमे स्नातकव्रतलोप
303 प्रायश्चित्तमेव स्यात्, नाभक्ष्यभक्षणप्रायश्चित्तमि
ति अत्रोपादानमिति । अप्रेष्याहृतान्यपि
नाश्नीयाद्रात्राविति विलयनादीनां पृथगारं
भः ॥
सू: सायं प्रातस्त्वन्नमभिपूजितमनिंदन्भुंजीत ॥
अंतराभोजनप्रतिषेधार्थोऽयमारंभः । अर्थप्राप्त
त्वात् । तथा च मनुः —
“सायं प्रातर्द्विजातीनां अशनं श्रुतिचोदितम् ।
नान्तरा भोजनं कुर्यात् अग्निहोत्रसमो विधिः”॥
इति । तु शब्दो विशेषवाची । अन्नविशेषस्यैव
प्रतिषेधः न मोदकादीनामपीति । अभिपूजितं
पूजनम्, नमस्कारः । अभिशब्दप्रयोगात् तत्
समंत्रकं दर्शयति । तथा च वसिष्ठः — “रोचत-

303 304 इति सायं प्रातरशनान्यभिपूजयेत्' इति। अनिन्दन्

कदन्नत्वादिदोषेणाकुत्सयन् भुञ्जीत ॥

सू. न कदाचिद्रात्रौ नग्नः स्वपेत् ॥

कदाचिन्निमित्तेष्वपि। रात्रावेवेति नियमार्थं

रात्रिग्रहणं, यदि दिवापीष्यते तदानीं न कदा

चिन्नग्नः स्वपेदित्युक्ते सर्वं सिध्यतीति। त-

तश्च दिवा न दोषः। किंच अनेनैतदपि ज्ञापयति।

दिवास्वप्नप्रतिषेधोऽस्य नास्तीति। अन्यथा

तदानीमपि न कदाचिन्नग्नः स्वपेदित्यु-

क्ते दिवास्वप्नप्रतिषेधादेवार्थतो (दिवा) लभ्यमानत्वा

त्पारिशेष्यात् रात्रावेव भवतीति रात्रि-

ग्रहणमनर्थकं स्यात् इति ॥

सू. स्नायाद्वा ॥

पृथगारंभाद्दिवापि। वा शब्दाज्जलावत

रणमपि। तथा च स्मृत्यंतरम् —

305 "नग्नो जलं नावतरेत्" इति ॥

305 इदानीमानन्त्यादाचारस्याशेषतो वक्तुमशक्य-
(त्वात्) मिति संक्षिप्याह—

सू॰ यत्त्वात्मवंतो वृद्धाः सम्यग्विनीता दम्भ-
लोभमोहवियुक्ताः वेदविद आचक्षते तत्समाचरेत्॥

च शब्दः तु शब्दस्यार्थे वर्तते, सोपि विशेषवाची, अदृ-
ष्टमुद्दिश्येति। आत्मवंतो ज्ञानकर्मसमुच्चयनिष्ठाः
इत्यर्थः। वृद्धाः वेदावस्थिततत्त्वज्ञानाः। सम्यग्
विनीताः गुरुभिः सुशिक्षिताचाराः। दम्भो लो-
करंजनार्थं धर्मानुसेवनम्। लोभोऽन्यायेन
306 परद्रव्यादित्सा। मोहो लोकविरुद्धज्ञानं, एतैः
वियुक्ता अभ्यासाः। वेदविदः, विदि लाभे
अधीतसकलवेदाः। यदअद्रष्टार्थमुद्दिश्याचक्ष-
ते, त्वं मम गोभ्यो यवसं देहीत्यादि। दृष्टा-
र्थं त्वं मम गोभ्यो यवसं दत्वा आढकं गृहाणेत्यादि।
तत्सकलं अमायया, यत्तदोर्नित्यसंबंधइति
यच्छब्दोपादानादिति (देव) सिद्धे पुनस्तच्छब्देन

306 परामर्शात् । (तदा) आचरेत् कुर्यात् प्रसन्नो भूत्वा, समु-
पसर्गप्रयोगात् । सर्वगुणयोगा (भावे) संभवे द्विगुण-
त्रिगुणयोगेपि कर्तव्यमित्येवमर्थो विसमासः ।
एकस्य नियोगकरणादेव कृतार्थो नस्यात् ।
307 किंतु बहूनां नियोगकरणादेवेति बहुवचनप्रयोगः ।
एवं विद्वो यदि स्वयमेव नियुङ्क्ते तदेव कर्तव्यम्,
न पुरुषांतर नियोगात्, वदंतीति वक्तव्ये अचक्षत
इति गुरुसूत्रकरणात् । आमरणात् तत् पुनः पुनः
कर्तव्यम्, तत्कर्तव्यमिति वक्तव्ये आचरेदित्या-
रंभात् । संभूय वा, पृथग्वा, एकविषये, नानावि-
षये वा यो नियोगः कृतः (कर्तव्यः) कृत्स्नो
ऽसौ कर्तव्य एव, आत्मवतां वृद्धानां सम्य-
ग्विनीतानां दम्भलोभमोहवियुक्तानां वेदविदां
वचनं कर्तव्यमिति वक्तव्ये एवमभिधानात् ॥
308 सू० योगक्षेमार्थी ईश्वरमधिगच्छेत् ॥
अलब्धलाभो योगः, लब्धस्य परिपालनं (रक्षणं) क्षेमः ।

३०८ अर्थ शब्दः प्रयोजन वाची, योगक्षेम प्रयोजनमि-
ति। ईश्वर शब्देन राजोच्यते तं गच्छेन्न कापि णे
न अधि शब्द प्रयोगात्॥

सू॰ नान्यमन्यत्र देवगुरुधार्मिकेभ्यः॥

अन्यः उभयकरणासमर्थः। अनेनाप्राप्त प्रतिषेध-
न राज्ञोऽन्योऽपि यः उभयकरणसमर्थः सोप्य-
धिगंतव्य इति ज्ञापयति। अन्यत्र वर्जयित्वा, देवता-
प्रतिमा गुरुः पित्रादिः धार्मिको ज्ञानकर्मसमुच्चयानुष्ठा-
३०९ नशीलः, तेषामभिगमनस्यादृष्टार्थत्वात्॥

सू॰ प्रभूतैधोदकयवसकुशमाल्योपनिष्क्र-
मणमार्यजनभूयिष्ठमनलसमृद्धं
धार्मिकाधिष्ठितं निकेतनमावसितुं यतेत॥

बहुकाष्ठोदक तृणदर्भ पुष्परम्य निर्गमभूमिं,
ब्राह्मणादि वर्णत्रय बहुलं, अनुष्ठानशील संकीर्णं
न्यायवृत्त राजपरिगृहीतं च स्थानमाश्रयितुं, प्र-
यतेत, प्रकर्षेण यत्नं कुर्यात्। समुच्चया

३०९ लामे यथालाभगुणयोगे वसेदिति असमासः।
एवं विधमेव धर्माय रतये च भवतीति॥

सू- प्रशस्तमांगल्यदेवायतनचतुष्पथादीन्
प्रदक्षिणमावर्तेत ॥

३१० प्रशस्तं गोब्राह्मण प्रज्ञात वनस्पत्यादि। मंगल्यं
दधिघृतपूर्णकुम्भादि। देवायतनं देवतास्थानं, चतु-
ष्पथं प्रसिद्धम्, एतेषां प्रदक्षिणं यायात्, नाप-
सव्यम्, येथैतानि गच्छतः प्रदक्षिणेनातिक्रा-
मति तथा कर्तव्यात्। नपुनः एकैकस्य भ्रमणं,
कुर्यादिति वक्तव्ये आवर्तेते त्यारंभात्॥

सू- मनसा वा तत्समग्राचारमनुपालयेदापत्कल्पः॥

मनसा वा यदित्वरितत्वात्प्रदक्षिणं करोति, ततो
मनोध्याननमात्रेणैव संपादयेदित्येके वर्णयंति।
तदयुक्तं मनसावाऽनुपालयेदिति एतावतैव लभ्य
लभ्यमानत्वात्। तस्मान्मनसावा— तच्च

310 311 शब्दोपादानाय च शब्दोऽध्याहर्तव्यः। "यत्र नित्यं-
श्रुतिः इत्याद्युक्तं" ~~[illegible]~~ तत्सम-
ग्रं समस्तं (शब्दस्यो) [अस्यो] पादानं अनन्तरस्यैव माभूदि-
ति। आचारग्रहणं गृहस्थधर्मस्यापि ग्रहणं माभू-
दिति — अनुपालयेत् चिन्तयेदित्यर्थः।

आपत्कल्पः, आपद्विधिः। आपत्त्वरित-
त्वात् (तत्कार्यासंभवः) तत्करणासंभवः। अ-
भाव वैकल्पिकार्थेन वा शब्देनास्यार्थस्य लब्धभा-
नला[भावा]दापत्कल्पग्रहणं अनर्थकमिति चेत् — न,
आपद्विहितकर्मानुष्ठानादकरणे दोषाभावमात्रं भव-
ति, नाभ्युदयोऽपीत्येवमर्थमापत्कल्पग्रहणमिति।
[सत्यधर्मः ?]
अध्यायान्ते वक्तव्ये अत्रोपादानं "सत्यधर्मा-
र्यवृत्तः' इत्यादि वक्ष्यमाणवर्जनार्थम् ॥

312 सू॰ सत्यधर्मार्यवृत्तः॥
स्यादिति शेषः। सत्यधर्मश्चासावार्य ~~वृत्तश्चेति~~ वृत्तश्चे-
ति, सत्यधर्मार्यवृत्तः। सत्यधर्मः सत्यसंधः।

३१२ यद्वदति संकल्पयति वा तदेव करोतीत्यर्थः।
येन वृत्तेनार्याणां साधूनां प्रियो भवति प्रियभाष-
णादिना तदस्य वृत्तमित्यार्यवृत्तः॥
सू. शिष्टाध्यापकः शौचशिष्टः श्रुतिनिरतः
[स्यात्॥
(सता)
शिष्टाध्यापकः सुतरामध्यापयिता न त्वयोग्या-
नाम्। जलादिभिः शौचशिष्टः तत्परः। नित्यं
शुचिः 'न मिथुनीभूत्वा शौचं प्रति विलंबेतेति
सिद्धे 'मनसा वै'त्याद्यापत्कल्पानुप्रवेशो माभूदि-
३१३ ति शौचस्य पुनरुपदेशः। श्रुतिनिरतो वेदाभ्यासरतः।
श्रुतिग्रहणं मन्वादिनिवृत्त्यर्थम्॥
सू. नित्यमहिंस्रो मृदुर्दृढकारी दमदानशीलः॥
नित्यग्रहणान्निमित्तेपि सति अहिंस्रः प्राणिपीडा-
वर्जनशीलः। मृदुः (अपराधेषु) परवधेषु
प्रत्यापत्तिशीलः। दृढकारी आरब्धस्य
समापयिता, आलोचितकार्यारंभको वा।

313 दमशील: इन्द्रियाणां विषयातिप्रसक्तौ निवारयिता।
दानशील: अल्पादपि द्रव्यात् संविभागरुचि:।
सर्वासंभवे यथालाभानुष्ठानेपि कृतार्थत्वज्ञापना-
र्थो विसमास:॥
सू. एवमाचारो मातापितरौ पूर्वापरान् संबन्धान् -
314. कुरितेभ्यो मोक्षयिष्यन् स्नातक: शश्वत्
ब्रह्मलोकान्नच्यवते नच्यवते॥
एवमाचार: एवंकर्मा स्नातक: इति व्यवहि-
तेनास्य संबंध: । प्रकृतस्यापि पुनर्वचनं
स्नातकव्रतानां एतत्फलमिति ज्ञापनार्थम्। माता-
पितरौ पितराविल्येकशेष: (पिता मात्रा)
प्राप्नोतीति चेन्न द्वयोरस्य पित्रोर्जन्यमान-
त्वात् - आचार्य उत्पादकश्चेति। पूर्वसंबं -
धा पितामहादय:। अपरसंबंधा: मातामहा-
दय:; एतान् पापेभ्यो मोचयितुमिच्छन् मोक्ष-
यितैतान्, स्वयमपि ब्रह्मलोकान्नापैति।

314 आचारग्रहणं अशेषस्नातकधर्मफलार्थं,
माक्षून्नित्यं शुचिरि~~त्येतावद्~~ त्यादेरेवेति।
शश्वद्ग्रहणं अपेक्षितानित्यत्वनिवृत्यर्थम्।
315 द्विरुक्तिः अध्यायपरिसमाप्तिज्ञापनार्था॥

ओम् इति मस्करीये
गौतमभाष्ये
॥ नवमोऽध्यायः समाप्तः॥
प्रथमः प्रश्नः समाप्तः॥

॥ दशमोऽध्यायः ॥

ओम् ॥ द्वितीयप्रश्नः प्रारभ्यते ॥ ओम्

315 सू० द्विजादीनामध्ययनमिज्यादानम् ॥

अध्ययनं वेदस्य ग्रहणधारणजपाभ्यासादिरूपम्। इज्या, यागः, देवपितृपूजा। दानं यथाशक्त्यर्थिजनस्य द्रव्यसंविभागः। असमासः समुच्चयार्थः, द्विजादीनां यथासंख्यं मा भूदिति। अधिकग्रहणादेवैतल्लभ्यत इति चेत् एकैकस्य
316 एकैकधर्मप्राधान्यज्ञापनार्थं इत्यदोषः। तद्यथा— ब्राह्मणस्याध्ययनं प्रधानम्। यथाह मनुः—

"जप्येनैव तु संसिध्येत् ब्राह्मणो नात्र संशयः"। इत्यादि। क्षत्रियस्येज्या, तथा चाह— "यजेत राजा क्रतुभिः" इति। वैश्यस्य दानं, तथा चाह— "दद्याच्च सर्वभूतेभ्योऽन्नमेव प्रयत्नतः"॥ इति। पूर्वस्य पूर्वस्य वा बलीयस्त्वज्ञापनार्थो विसमासः।

316\. यथा ऽऽहोशना:——

"दानाच्छतगुणो याग: यागाच्छतगुणो जप:"॥ इति

तथाच मनुरपि यागाज्जपस्य प्राधान्यं दर्शयति।

"ये पाकयज्ञा: चत्वार: विधियज्ञसमन्विता:।

सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम्"॥

इति।

317 अत्र अत्र द्विजातीनामध्ययनमित्युपनयनोत्तर-

कालमेव दानस्य विधानात् अनुपनीतेन यत्कृतं

दानं तस्यासिद्धत्वं द्रष्टव्यम्॥

सू. ब्राह्मणस्याधिका: प्रवचनयाजन-

प्रतिग्रहा:॥

ब्राह्मणग्रहणं द्विजातीनामधिकाराद्धाधिक्यं पूर्वेषु

सत्सु भवति इति। ननु च वैश्यस्याधिकमिति

राज्ञोऽधिकमिति वक्ष्यति (वक्ष्यति) ततश्च ब्राह्म-

णस्यैवेतद् भवतीति ब्राह्मणग्रहणं न कर्तव्यम्।

उच्यते, पूर्ववन्नैते आश्रमधर्मा:, किन्तु वर्णधर्मा-

317 इति ज्ञापनार्थम् । ततश्चानुपनीतस्यापि प्रतिग्रहाधि-
318 कारोऽस्ति । याजनाध्यापने त्वस्य संभवान्नस्तः ।
ब्राह्मणस्य प्रवचनयाजनप्रतिग्रहाश्चेति वक्तव्ये
अधिकग्रहणमेते वृत्त्यर्था अपि भवन्तीति ज्ञापना-
र्थम् पूर्व(सूत्र)वद्विसमासो न कृतः समुच्चयेनाप्ये-
षामनुष्ठानार्थं, ऽकार्यत्वाद्विकल्पो माभूदिति ।
प्रवचनमनुवचनम् । शेषं निगदार्थम् ॥

सू. पूर्वेषु नियमस्तु ॥.

पूर्वेष्वध्ययनादिष्ववश्यकर्तव्यता ततश्चाक्रि-
यायां दोषः क्रियायामभ्युदयः, प्रवचनादिष्व
नियमः, ततश्च क्रियायामभ्युदयः अक्रियायां
प्रत्यवायाभावश्च । तु शब्दो विशेषवाची, क्ष-
319 त्रियवैश्ययोरप्येतेषु नियमः, ब्राह्मणस्य विशे-
षत इति । अत एवैवं सूत्रं न कृतम् — द्विजा
तीनां अध्ययनमिज्या दानं नियमत इति, उत्तरे
ष्वपि नियमाधिकारः प्रसज्येतेति ॥

(स)

319. सू॰ आचार्यज्ञातिप्रियगुरुधनविद्यानियमेषु ब्राह्मणः संप्रदानमन्यत्र यथोक्तात् ॥

आचार्यः उक्तलक्षणः। ज्ञातिः मातृपितृसंबंधः। प्रियः सखा। गुरुः पिता, ज्येष्ठः ऋत्विगित्यादिः। धननिमयो धनपरिवर्तनम्। विद्यानिमयो विद्यान्तरेण परिवर्तः (नम्)। ब्राह्मणग्रहणं वेदार्थम्। ततश्चाङ्गादावनियमः। संप्रदानमध्यापनम्। कर्तव्यमिति शेषः। अन्यत्र यथोक्तात् 'अनुज्ञात उपविशेत्' इत्यादिकायाः शुश्रूषायाः। अन्यत्रोक्तादिति वक्तव्ये यथा ग्रहणं

320 येन विधिना अध्ययनमुक्तं तस्यैवायमपवादः। न पुनः "शिष्टाध्यापकः" इत्यस्यापि। ततश्च धनविद्यानिमयेनापि अयोग्याय न देयम् ॥

सू॰ कृषिवाणिज्ये चास्वयं कृते ॥

कृषिवाणिज्ये प्रतिषिद्धे, ते अन्येन कारिते ब्राह्मणस्याधिके। च शब्दात्पाशुपाल्यं चा—

320 स्वयं कृतमेव ॥.

सू॰ कुसीदं च ॥.

कुसीदमुपचयार्थो धन प्रयोगः, तद् धनस्य कृतमेव, च शब्द प्रयोगात्। पृथग्ग्रहणं चास्य स्वयं कृतस्याभ्यनुज्ञानार्थम्। कदाचित्। तथा च "कुसीदवृद्धिर्धर्म्या" इति वक्ष्यति ॥

सू॰ राज्ञोऽधिकं रक्षणं सर्वभूतानाम् ॥.

321 राज्ञः क्षत्रियस्याभिषेकवतः रक्षणं पालनं सर्वभूतानां सर्व प्राणिनाम्। सर्व शब्द प्रयोगात् स्थावराणां च वेतन द्वारेण वृत्यर्थमपि भवतीति अधिकग्रहणात्। तत्पुनः कथं कर्तव्यमित्यत आह—

सू॰ न्याय्य दण्डत्वम् ॥

लोकाविरुद्ध दण्ड धारित्वं, न पुनरैश्वर्याभिमानात् स्वेच्छया दण्ड पातनम्। वक्ष्यति च— "दण्डो दमनादित्याहुः तेनादान्तान् दमयेत्" इति। अदान्तनिग्रहेण इतरेषां रक्षणं सिद्ध्यतीति ॥

३२१ किञ्च —:

सू· बिभृयाद्ब्राह्मणान् श्रोत्रियान् ॥

ब्राह्मणान् गुण संपन्नान् श्रोत्रियान् सामर्थ्या-
द्विषय वासिनः। भरणं अन्नादिदानेन ॥

सू· निरुत्साहांश्चाब्राह्मणान् ॥

३२२ निरुत्साहत्वं आजीवनार्थं कर्मानुष्ठानासामर्थ्यम्।
अब्राह्मणाः क्षत्रियादयः। इह वा ऽब्राह्मणग्रहणा-
त् पूर्वसूत्रेण लब्धेपि ब्राह्मणे ~~ग्रहणात्~~ ब्राह्मण-
ग्रहणं क्रियते, कथं नामाश्रोत्रियाणमपि ब्राह्मणा-
नां जीवनासमर्थानां भरणं स्यादिति। च शब्दा
द्दीनानाथांश्च ॥

सू· अकृतांश्चोपकुर्वाणांश्च ॥

अकृताः प्रव्राजिताः अब्राह्मणाः एव ब्राह्म-
वा धिकारात्। ब्राह्मणप्रव्राजितानान्तु प्रतिग्रहाधि
कारादेव नोक्तम्। तांश्च साधनादि दानेन
बिभृयात्। च शब्दात् व्याधिजराद्युप

हतांश्च। उपकुर्वाणो: लोकोपकारिणो वैद्यादय:।
आत्मीयपरिवारका इति केचित्। तदयुक्तम्।
323 अर्थसिद्धत्वात्तेषाम्। चकारात् कालज्ञान॥

सू० योगश्च विजये॥

विजये कर्तव्ये योग: कर्तव्य:। अलब्धलाभो-
योग:। वाल्लभ्यादिना यै: आटविकादिभि:
करणसूत्रं तद्यत्नतो स्वीयादित्यर्थ:। चका-
राल्लब्धपरिरक्षणं च। चौराद्यो यथा न हरंति
तथा कर्तव्यमित्यर्थ:। एवं च पूर्वं योगक्षेमं
कृत्वा तत: पश्चादरिजये यत्न: कर्तव्य इति
द्रष्टव्यम्॥

सू० भये विशेषेण॥

भयमन्याभिभव:। तस्मिन् विशेषेण अत्यंतं
यत्नतो योगक्षेमौ कर्तव्यौ॥

सू० चर्या च रथधनुर्भ्याम्॥

वाहने
चर्या राष्ट्रस्य सर्वतोऽटनं, रथग्रहणं हस्त्यश्वा

३२३ दीनामप्युपलक्षणम् । धनुर्ग्रहणं खड्गादीनां,
चकाराद्येकस्मिन् अवस्थानं च । पर्यवस्थानयोः
(व्यवस्था)
कार्यवशाद्द्रष्टव्यम् ।

सू॰ संग्रामे संस्थानमनिवृत्तिश्च ॥

३२४ संग्रामे युद्धे सम्यङ्निर्भयस्यावस्थानं, अनिवृ-
त्तिश्च तत्रैव प्राणपरित्यागः । चकारा(द्युद्धं च)
त्संधिश्च । विसमात् गुप्ताश्रयत्वं च ॥

इदानीं नित्यमहिंस्र इत्यस्यापवादमाह —

सू॰ न दोषो हिंसायामाहवे ॥

आहवो युद्धं, प्रकृतस्यापि पुनर्वचनं विशे-
षार्थम् — यस्मिन्नन्योन्यमाहूय
पुरुषाः प्रवर्तन्ते तत्रैव न दोषः । नान्यावस्था-
यामिति ॥

सू॰ अन्यत्र व्यश्वसारथ्यायुधकृतांजलि-
प्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारू-
ढदूतगोब्राह्मणवादिभ्यः ॥

324 ऽएवं विधं हिंसतो ऽदोषः। विशकदः त्रिभिः सं-
बध्यते — व्यश्वः, विसारथिः, विरथः,।
325 अ(ना)युधः। कृतांजलिः बद्धांजलिः। प्रकीर्ण-
केशो मुक्तकेशः। पराङ्मुखो अन्यमुखः। उपवि-
ष्टः आसीनः। स्थलारूढः पर्वतारूढः। वृक्षा-
रूढः प्रसिद्धः। दूतोऽहं ब्राह्मणोऽहमिति यो
वदति, यश्च गोवच्छकं करोति, ऽतेभ्यो ऽन्य-
त्र न दोषः॥

क्षत्रियस्याभिषेकगुणयुक्तस्य धर्मः उक्तः इदानी-मितरस्याह —

सू. क्षत्रियश्चेदन्यस्तमुपजीवेत्तद्वृत्त्या॥

अन्यो जातिमात्रसंबंधः तं राजानमुपजीवेत् तद्वृत्त्या "चर्याच रथधनुर्भ्याम्" इत्यादिकया॥

सू. जेतालभेत सांग्रामिकं वित्तम्॥

यदि राज्ञा नियुक्तः परं निर्जित्य धनमासादयति

325 तत्सांग्रामिकं धनं लभेत ॥

अस्यापवादमाह —

सू॰ वाहनन्तु राज्ञः ॥

326 वाहनं हस्त्यादि, तुशब्दः विशेषवाची । अन्य दपि महार्घं यद्रत्नादि तदपि राज्ञऽव, विशेषतो वाहनमिति, ततश्च वाहनविषये स्वल्पमपि द्रष्टव्यम् ॥

सू॰ उद्धारश्चापृथग्जये ॥

अपृथक् जयः सराजको जयः तत्रोद्धारो - राज्ञः सारद्रव्यम् । वाहनसमुच्चयार्थश्चकारः ॥

सू॰ अन्यत्तु यथार्हं भाजयेद्राजा ॥

शौर्याद्यपेक्षया ~~चौर्येभ्यो~~ (यौधेभ्यः) दद्यात् (योधेभ्यः) । राजग्रहणमेवं कुर्वन् अनुरागाद्राजार्थं पद्यत इति । स्वयमेव विभाजनार्थं वा, न परैः इति ॥

अधुना रक्षणनिमित्तमस्य वृत्तिः इत्यत आह —

सू॰ राज्ञे बलिदानं कर्षकैर्दशममष्टमं षष्ठं वा ॥

326 नियुक्तायञ्च देयमिति राजग्रहणम्। प्रतिसंवत्सरं
327 देयमिति बलिग्रहणम्। दानं कर्तव्यमिति शेषः।
कर्षकैः यावन्तः कृषिजीविनः, न तु वैश्यै-
रेव। दशमं वाऽष्टमं वा षष्ठं वा, अधममध्य-
मोत्तम भूभागक्रमेण व्यवस्थित विकल्पः
द्रष्टव्यः॥

सू० पशुहिरण्ययोरप्येके पंचाशद्भागः॥
(पशूनां ५०)
पशुपालने नोपजीवतां हिरण्यं वार्धुषिकस
काशात् (पशूनां पंचाशद्भागं गृह्णीयात्).
"समार्घं धनमुद्धृत्य महार्घं यः प्रयच्छति।
(सर्वकर्मसु)
स वै वार्धुषिको नाम ब्रह्मवादिषु गर्हितः"॥
प्राप्त्यभावादेव
इति वार्धुषिकस्य प्रतिषेधादेवास्याभावः
प्राप्नोतीति चेत् — नैष दोषः "कामं वा परि
लुप्तकृत्याय पापीयसे दद्याताम्" इति वसि-
ष्ठेन प्रकारान्तरेणाभ्यनुज्ञानात्। एके ग्रह-
णान्न तु गौतमः, तत्र येषामप्रतिप्रसवः तेषु.

327 328 न गृह्णीयात्। येषां प्रतिषेधाभावादेव वार्धुषि-
कस्य प्रतिषेधः तेषु गृह्णीयादित्येवं द्रष्टव्यम्॥

सू० विंशतिभागश्शुल्कः पण्ये॥

पण्यं पणनीयं, यद्वणिग्भिः विक्रीयते हिंग्वादि,
तेषु विंशतिभागं गृह्णीयात्। शुल्कग्रहणं संज्ञा-
र्थं, ततश्च "प्रातिभाव्य वणिक्शुल्कं" इत्या-
दौ व्यवहारसिद्धिः॥

सू० मूलफलपुष्पौषधमधुमांसतृणेन्धनानां-
[षाष्ठ्यः॥ षाष्ठ्यम्॥

मूलं हरिद्रादि फलम्, मरीचादि,
पुष्पं कुसुंभादि, औषधं अभयादि, तृणं य-
(त्किंचित्) कटादि) दीयते)। शेषाः प्रसि-
द्धाः॥

कस्मात्पुनः एतद्राज्ञे देयमित्यत आह —

सू० तद्रक्षणधर्मित्वात्॥

तेषां करदायिनां रक्षणं तद्रक्षणं, सएव धर्मः

३२८ तद्रक्षण धर्मः। सोऽस्यविद्यत इति तद्रक्षणधर्मी,
३२९ तस्य भावः तद्रक्षण धर्मित्वं, तस्मात् तद्रक्षण-
धर्मित्वात्, तच्छीलत्वादित्यर्थः। वचनगम्येऽ
र्थे हेतुवचनं देशकालापेक्षया उक्तपरिमाणादप्यल्प
तरभागग्रहणार्थम्। इतरथा सर्वमेव राजा रक्षतीति
साधारणोऽयं हेतुः स्यादिति। तथाचाह शनाः-
'देशकाल लाभानुरूपतः करान् प्रकल्पयेत्'
इति ॥.

सू. तेषु तु नित्ययुक्तः स्यात् ॥.

तेषु तु कल्याद्यादानेषु तु सर्वदा सत्यपि का-
र्यव्ययो तत्परोभवेत्। तु शब्दो विशेषवाची।
अन्येष्वपि द्रव्योपार्जनोपायेषु धर्मादनपेतेषु
तत्परोभवेत् अत्र विशेषतइति ॥

सू. अधिकेन वृत्तिः ॥.

३३० स्यादिति शेषः। कुटुंब पोषणादधिकं यत्कोश-
रूपेणानुप्रविष्टं तस्मिन् कोशे वृत्तिः नस्यात्,

330 कुटुंबपोषणादन्यत्रापदि, तस्मिन्नगृह्णीया
दित्यर्थः। तथाच व्याघ्रः——
"कुटुंबपोषणं कुर्यात् नित्यं कोशं च वर्धयेत्।
अन्यत्रापदि तत्कोशं न गृह्णीयात् कदाचन"॥
इति। केचिद् व्याचक्षते —— अधिकेन रक्षण
द्वाराधिगतेन जीवनं स्यादिति। तत्र 'राज्ञोऽधिकं'
इत्यनेन पुनरुक्तिप्रसंगो भवति उत नास्ती
ति निरूपणीयम् (विचारणीयम्)
~~सू० शिल्पिनो मास्येकं मास्येक~~
सू० शिल्पिनो मासि मास्येकैकं कर्म कुर्युः॥
शिल्पिनो लोहकारादयः मासि मासि ऽएकैकं
331 अहरात्मानुरूपं राज्ञः कर्म कुर्युः। तदेव
तेषां शुल्कं नान्यत् किंचित् इति॥
सू० ऽतेनात्मोपजीविनो व्याख्याताः॥
आत्मोपजीविनो नटनर्तककथकादयः, तेऽप्येकमहो
राज्ञः कर्म कुर्युरिति, शिल्प्यात्मोपजीविन

२३। इति वक्तव्ये पृथक् ग्रहणं आत्मोपजीविनामल्यो-
पकारित्वादनित्यत्वार्थम्। आत्मोपजीविनश्चैत्ये
वमभिधानमपि न कृतम्, स्मृत्यंतरे शिल्पिनो
यथदुक्तं तस्यसर्वस्यानुप्रवेशार्थम्, यथाऽऽ
होशनाः—"शिल्पिनो मासि मासि कर्मैकं (प्रो-
क्तम्)" तदभावे कार्षापणं वा दद्यात्। इति॥

सू. नौचक्रीवन्तश्च॥

चक्री शकटः, नौ चक्रीभ्यां य उपजीवंति।
(अन्य)
बहुवचनात् नापितादयः। चकारात् व्याध
332 मृगघातकादयः। पूर्ववदनित्यत्वं माभूदिति
पृथग्ग्रहणम्॥

सू॰ भक्तं तेभ्यो दद्यात्॥

तेभ्यः शिल्पिप्रभृतिभ्यः भक्तं भोजनम्। न·
नशुल्कं दद्यात्॥ तेभ्यो ग्रहणं अनन्तराणा
मेव माभूदिति॥

सू· पण्यं वणिग्भिरर्घापचयेन देयम्॥

332. मासि मासि एकैक मिति अनुवर्तते । शुल्कादधि-
कमितिकर्तव्यं अर्घापचयं अर्घार्घावरमू-
ल्यम् । तथाच बृहस्पति: ———
"शुल्कं दद्यात् ततोमासं एकैकं पण्यमेवच ।
अर्घार्घावरमूल्येन वणिजस्ते प्रथक्प्रथक्" ॥
इति ॥.
सू॰ प्रनष्टस्वामिकमधिगम्य राज्ञेप्रब्रूयु: ॥
प्रनष्टं स्वामिसकाशादपगतं अस्वामिकं
अविज्ञायमानस्वामिकं ——— ज्ञायमान
स्वामिकंतु स्वामिनएव कथयेत् । अधि
गम्य लब्ध्वा राज्ञे नामात्यादिभ्य:, प्र
333 ब्रूयु:, प्रशब्दादमायया, कथयेयु: ।
इदमस्मिन् देशे एवंरूपं साधितमिदमन्विष्य-
तां कस्यैतदिति ॥ बहुवचन प्रयोगात् सा-
मंतादिभिरपि वक्तव्यमेवेति ॥
एवं कथितम ———

333 सू॰ विख्याप्य संवत्सरं राज्ञा रक्ष्यम् ॥
विख्याप्य पटहेनावघुष्य अमुकजातीयं वस्त्वा-
साधितं, यस्यैतत् स्वयमुपतिष्ठतामिति। संवत्स-
रं निरुपद्रवं रक्ष्यं पालनीयम्। प्राक् संवत्सरात्
यदि स्वाम्यागच्छति ततः तस्मै देयम्। रक्षण-
स्य तदर्थत्वात् अधिकारलब्धस्यापि राजशब्द-
स्योपन्यासः तद्रक्षणेऽत्यन्तास्था नियोक्तव्या
इति। तथा चाहोशना — "विद्याभिजन-
युक्तान् पूर्वदृष्टप्रमाणान् वृद्धान्निधिपा-
लने नियुञ्ज्यात् इति ॥

334. सू॰ ऊर्ध्वमधिगन्तुः चतुर्थं राज्ञः शेषः ॥
संवत्सरात्परतः येनाख्यातं तस्मै चतुर्थांशः
राज्ञः शेषः। आख्यातुः चतुर्थं दत्वा शेषं स्वयं
गृह्णीयात् उत नियुक्ताय देयमिति संदेहः स्यादिति।
तन्निराकरणार्थं शेषो राज्ञ इत्युक्तम् ॥
(दक्ष)
अथ योऽर्वाक् संवत्सरान्ममेति ब्रूयात् सः

334 स्वामी कथमवगम्यते इत्यत आह

सू० स्वामीरिक्थक्रयसंविभागपरिग्रहाधिगमेषु ॥

एतेषु कारणेषु प्रतिपादितेषु जायमानेषु सः
स्वामी भवति । रिक्थं पितुः सकाशात् प्राप्तं
क्रयो मूल्येन विक्रीतं, संविभाग उत्सर्गं यद्वा-
यादिस्वरूपेण प्राप्तं, परिग्रहः स्त्रीधनम् ।
नान्यपूर्वकस्य स्वीकरणं, यथा नद्यादिषु
335 वृक्षादिरित्येके तत्राधिगमेन पुनरुक्तत्व-
मस्ति उत नास्तीति विचारणीयम् । अधिग
म आकारादिभ्यो लब्धं रत्नादि ॥

एतानि तावत् सर्ववर्णानां साधारणानि ॥

सू० ब्राह्मणस्याधिकं लब्धम् ॥

प्रतिग्रहोपात्तम् । ~~[illegible]~~ धर्म्यत्वात्
एतदुक्तं भवति ~~[illegible]~~ याजनाध्यापनोपात्तम-
पि द्रष्टव्यमिति ॥

सू० क्षत्रियस्यविजितम् ॥

335 विजितं, (विगृह्य) यच्च स्वेन। निर्जितम्। तत्
क्षत्रियस्याधिकम्।

सू. निर्विष्टं वैश्यशूद्रयोः॥

निर्विष्टं कर्मणोपात्तं, वैश्यस्य कृष्यादिना शूद्रस्य सेवादिना (शुश्रूषादिना), अधिकमिति वर्तते॥

प्रनष्टाधिगताद्धधिगन्तुश्चतुर्थमुक्तं तद्विशिनष्टि-

सू. निध्यधिगमो राजधनम्॥

निधेः पूर्वनिहितस्याधिगमो लाभः सः राज्ञ एव, न ततोऽधिगन्तुश्चतुर्थं, एवं च निधेरन्यद्द्रव्यं तस्यैव चतुर्थांश इति द्रष्टव्यम्। ननु च
336 निधेः यदन्यद्द्रव्यं तस्य राज्ञे कथनाप्राप्तिः अधिमस्य साधारणत्वेनोक्तत्वात्, येन पूर्वं अधिगम्यते तेनैव तस्य गृह्यमाणत्वात् इति। अत्रोच्यते — यस्मिन्नतुद्धृतचिह्नानि दृश्यंते तद्राज्ञे कथयेत्, इतरत्स्वयं गृह्णीयात्

336 इति। दावेत्य अनुभूतचिह्नानि ~~मिष~~ मुषित्वा
गृह्णतो दोषः यथाह लोकाक्षिः—"अनुभू-
तचिह्नानि मुषित्वा गृह्णतः पूर्वसाहसं दण्डः
तद्द्रव्याद्द्विगुणं च राजा हरेद्" इति असति धन-
ग्रहणे निध्यधिगमो राज्ञ इत्युक्ते अराज्ञः इवि·
प्रतिषेधोप्याशंक्येत ॥·
सू॰ न ब्राह्मणस्याभिरूपस्य॥
अभिरूपः षट्कर्मनिरतः। तथा च वसिष्ठः
"ब्राह्मणश्चेदधिगच्छेत षट्सु कर्मसु वर्तमानो
न· राजा हरेत्" इति तस्य कर्मसा(व्य)धनत्वात् ॥
337 सू॰ अब्राह्मणोप्याख्याता षष्ठं लभेते
[त्येके ॥.
अब्राह्मणः क्षत्रियादिः आख्याता पूर्वं ज्ञापयि
ता षष्ठं लभते इत्येके मन्यन्ते। न्यायत्र क्लेश
फलं (न्तु) हि तदिति एक इति वचनान्न तु गौतमः॥
यस्मादपरिमितसारत्वान्निधीनां। अतः यत्किंचि

337 दस्य देयं ननु षष्ठऽवांशः इति। अपिशब्दा
त् काम्रुणोप्यनसिर्ल्पे इति॥

सू॰ रक्ष्यं बालधनमाव्यवहारप्रापणात् –
समावृत्ते र्वा॥

बालः अप्राप्तषोडशवर्षः, तद् ग्रहणं अन्येषा
मपि रक्षणसमर्थानामप्युपलक्षणम्। तद्धनं
बंधुभ्यो रक्षेत्। अन्येभ्यस्तु रक्षणं सर्वभूता-
नामित्यनेनैव सिद्धत्वात्। आव्यवहारप्रापणा
त् रक्षणासमर्थ्योपजननात्, आसमावृत्ते र्वा
338 सत्यपि रक्षासामर्थ्ये विकल्पस्तु अध्ययनाद्य
भियोगापेक्षया वर्णनीयः॥

सू॰ चोरहृतमपजित्य यथास्थानं गमयेत्॥
चोरैरपहृतं ततः आच्छिद्य स्वामिनऽव
प्रत्यर्पयेत्। ननु जेता लभेत सांग्रामिकम् इत्य
नेन, आच्छिद्येति वक्तव्ये अपजित्येति वचनं
योऽन्यः अच्छिनत्ति असावप्यमुष्मै दापनीय

338 इति। स्वामिने दद्यादितिवक्तव्ये "यथा स्थानं
गमयेद्" इत्यारंभः स्वाम्यभावेपि तद्भृत्ये-
भ्योपि यथार्हतोऽर्पयेदिति। चोरग्रहणं
बलात्करणादेरप्युपलक्षणम् ॥

सू० कोशाद्वा दद्यात् ॥

अनपजये दुर्गदेशादिषु गतत्वात्। यावन्मा-
त्रमपहृतं तत्स्वधनाद्दद्यात्। कोशाद्वेतिनोक्त
म्। यथास्थानं गमयेत् कोशाद्वा गमयेदिति
माभूदाशंकेति ॥

339 सू० वैश्यस्याधिकं कृषिवणिक्पाशुपाल्य-
कुसीदम् ॥

कृष्यादयः प्रसिद्धाः। कृषिश्च वणिक्चेति
द्वन्द्वैकवद्भावः। वणिगिति वाणिज्यं कर्मोच्य
ते ॥

सू० शूद्रः चतुर्थो वर्णः ॥

दाक जातिः शूद्र इति संज्ञा श्रुतितो ब्रवीति।

339। चतुर्थो वर्ण इति त्रयाणां ब्राह्मणादीनां वर्ण- (प्रतिपत्त्य)
संज्ञाप्रसिद्ध्यर्थम्। अतः चतुर्णामेव वर्णसंज्ञा
मेऽन्तरजानां, तथा च वसिष्ठः — "चत्वारो-
वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राः" इति॥

सू० एकजातिः॥

नास्य द्वितीया जातिर्विद्यते इति "तद्द्वितीयं
जन्म" इति। एवं च अनेनास्य उपनयनप्रति-
षेधः। ततस्तस्यैव प्रतिषेधः। तस्मात्प्राक्
तनानां अप्रतिपन्नमंत्रकाणां यथाकालं
द्रष्टव्यम्। तथा च गृह्यकारवचनम् —
340 "शूद्रस्यापि निषेकपुंसवनसीमन्तोन्नयन-
जातकर्मनामकरणोपनिष्क्रामणान्नप्राशन-
चौलान्यमंत्रकाणि यथाकालमुपदिष्टा-
नि" इति। उपरितनानां तूपनयनमूलबाधे-
न प्रतिषेधः सिद्धः॥

सू० तस्यापि सत्यमक्रोधश्शौचम्॥

340 तस्य शूद्रस्य। अपिशब्दात् उत्कृष्टा अवान्तर-
जाश्च गृह्यन्ते। द्विजातीनां ब्रह्मचारिप्रकरणे,
स्नातकधर्मेचोक्तानामपि वर्णधर्मप्रापणार्थः इहा-
नुवादः। अनुपनीतानामपि प्रवेशो यथा स्या
दिति। सत्यं यथाभूतार्थवादित्वम्। अक्रोधः
(परानभिद्रोहबुद्धिः) क्रोधाद्यभावः। शौचं -
मृदादिभिः उपस्थेन्द्रियसंयमादीनां उपसंग्र-
हार्थो विसमासः। तथाच मनुः——
"अहिंसा सत्यमक्रोधः शौचमिंद्रियसंयमः।
ऽेतत्सामासिकं धर्मं" इत्यादि॥
ऽाव साधारणो धर्मः चातुर्वर्ण्ये प्रकीर्तितः॥
341 इति। तथाच वसिष्ठः— सर्वेषां सत्यमक्रो
धो दानं अहिंसा प्रजननं चेति॥
सू॰ आचमनार्थे पाणिपादप्रक्षालनमेवैके॥
आचमनार्थे स्नानार्थे पाणिपादप्रक्षालनमेवैके
आचार्या इच्छंति। अमंगलं स्नानं कर्तव्यमे-

341. वेति गौतमः। विकल्पश्च सच्छूद्रासच्छूद्रापेक्षया द्रष्टव्यः (वर्णनीयः) तथाचाहोशनाः——
"सच्छूद्रः स्नायादसच्छूद्रः पाणिपादौ प्रक्षालयेदिति"। नित्यस्नानस्यायं, नैमित्तिकस्य तस्य तु पक्षान्तराभावात् स्नानमेव कर्तव्यम्। अथवाऽऽचमनशब्देनाचमनमेवोच्यते तदर्थं पाणिपादप्रक्षालनमेक इच्छंति। न तु गौतमः। पाणिपादप्रक्षालनं कृत्वा सकृत्पानं सकृन्मार्जनं च कर्तव्य-
342 मिति तस्याभिप्रायः। तथाच मनुः——
"स्त्री शूद्रौ तु सकृत्सकृत" इति। विकल्पस्तु पूर्ववद्वर्णनीयः॥

सू. श्राद्धकर्म॥

अथ श्राद्धमित्यादि। समस्तश्राद्धोपसंग्रहार्थं कर्मग्रहणम्। यथाह कण्वः——
"नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमथापरम्।
पार्वणं चेति विज्ञेयं श्राद्धं पञ्चविधं स्मृतम्"॥

342 इति। श्राद्धग्रहणेनैव लभ्यमानत्वात् कर्मग्रहणं
समस्तविध्युपसंग्रहार्थमिति (प्राक्) केचित्,
मा भून्मन्त्रप्रतिषेधात् तत्साध्यविधिप्रतिषे-
धोऽपीति ॥

सू० भृत्यभरणम् ॥

पुत्रदारादिपोषणम्। अर्थप्राप्तमप्येतदुच्य-
ते मा भूदुच्छिष्टाशनविधानादभृत्यत्वमिति ॥

सू० स्वदारे वृत्तिः ॥

उपनयनमूलत्वादुपरितनानां सर्वेषां प्रतिषे-
343 धे प्राप्ते दारपरिग्रहमात्रस्य प्रतिप्रसवः क्रियते।
समानजातीयैरेवास्य भार्या न तु प्रातिलोम्ये-
नेति स्वशब्दस्योपादानम्। ततश्च ब्राह्मणा-
दीनां अपि विजातीयापरिग्रहः सिद्धो भवति।
तथाह मनुः —

शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते।
ते च स्वा चैव राज्ञः स्युः ताश्च स्वा चाग्रजन्मनः ॥

343 इति। स्व दार इति सिद्धे वृत्तिशब्दो पाकानं देव-
रादिनियोग प्रतिषेधार्थम्। स्वदार एव वृत्तिः
न परदार इति। असमासो गुर्वर्थादि दानोप
संग्रहणार्थः। गार्हस्थ्यमेवाश्रमोऽस्य नेतराणी-
ति पृथग्योगकरणम्॥

सू- परिचर्या चोत्तरेषाम्॥

परिचर्या परिचरणं शुश्रूषा उत्तरेषां त्रयाणां
344 वर्णानाम्। च शब्दात् कृष्यादि च। स-
च्छूद्रस्य शुश्रूषा इतरस्य कृष्यादिरिति
केचित्। गौतमस्य तावदयमभिप्रायः।
— यः सच्छूद्रः तस्योभयमप्यविरो
धेन कर्तव्यम्, इतरस्य कृष्याद्येवेति। इतरेषा
मिति सिद्धे उत्तर ग्रहणं यो य उत्तरः तत्र तत्र
फल भूयस्त्व ज्ञापनार्थं, तथाचापस्तंबः। —
पूर्वस्मिन् पूर्वस्मिन् वर्णे निश्श्रेयसं भूयः
इति॥

344 इदानीं यस्य शुश्रूषा सः कथं वर्तेत इत्यत-
आह —

सू॰ तेभ्यो वृत्तिं लिप्सेत ॥

यान् परिचरेत् तेभ्य एव जीवनं लब्धुं
इच्छेत् । एवञ्च वृत्त्यर्थिन एव परिचर्या-
नावश्यं सर्वस्येति सिद्धम् । किं पुनः एभ्यः
प्रार्थयेत तैर्वा किममुष्मै देयं ? इत्याह —

सू॰ जीर्णान्युपानच्छत्रवासःकूर्चादीनि ॥

345 जीर्णानि उपयुक्तानि । आदिशब्दाद् धान्या
न्यल्पसाराणि । यथाह मनुः —
"उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च ।
पुलकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः" ।
पिंछकृतानां
इति । छत्रग्रहणं शिखिपत्रकृतानामप्यु-
पलक्षणम् । अन्यत्प्रसिद्धम् ॥

सू॰ उच्छिष्टाशनं शिल्पवृत्तिश्च ॥

पानीयस्यानियमः । अशनशब्दस्यापाद

345 दानात्। उच्छिष्टं भुक्तशिष्टम्। तदप्यकृ
तदारस्यैव। इतरस्य तु पाकयज्ञाधिकारा-
दप्रवृत्तेः। कृतदातत् समासनिर्देशात्।
ऽवं स्मृत्यंतरशात्। यथाह व्याघ्रः—
उच्छिष्टमन्नं दातव्यं शूद्रायागृहमेधिने।
गृहस्थायतु दातव्यं अनुच्छिष्टं दिने दिने ॥
इति ॥

~~शू०~~ शिल्पवृत्तिश्च तक्षायस्कारकर्मो-
पजीवी, चशब्दात् कारुकर्मापि। विसमा-
सः आपत्कल्पप्रदर्शनार्थः। तथा च मनुः—
346 अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम्।
पुत्रदारात्ययं प्राप्तो जीवेत् कारुककर्मभिः॥
इति। शुश्रूषामशक्नुवन् शिल्पवृत्तिमुपजीवे-
त्। तथापि जीवनासंभवे कारुकवृत्तिरिति
द्रष्टव्यम्। शिल्पकारुककर्मणोश्च भेदो-
लोकादवगन्तव्यः। कारुककर्माणि नापित-

346 रजकचित्रकारादीनि प्रतिलोमकर्मत्वान्निन्दि-
तानि। शिल्पानि तक्षायस्कारादीनि अनु-
लोमकर्मत्वात् कारुकर्मभ्यो विशिष्टानि।
(यं चार्यमाश्रयेत)

सू॰ यं चार्यमाश्रयेत् भर्तव्यः तेन क्षीणोऽपि॥
यं ब्राह्मणं आश्रयेत परिचरेत् तेनासौ पोषणी
यः। चशब्दादनार्यं स्वजातिमपि कर्मान्तरे-
णाकार्याणामेव परिचरणोपदेशात्। यश्चा
श्रयेतेति वक्तव्ये आर्यग्रहणं सजात
तीयेऽपि साधुधर्मो विशेषत्वज्ञापनार्थम्। तेने-
347 ति तस्यावश्यकर्तव्यता सूचनार्थम्। क्षीणो-
ऽपि जराव्याध्युपहतोऽपीत्यर्थः॥

सू॰ तेन चोत्तरः॥
तेन शूद्रेण उत्तरः अयमाश्रयेत। दाविन्च-
वृत्तिक्षीणस्य शूद्राश्रयणमप्यस्तीति ज्ञाप-
यति। आश्रणमप्यात्मसंदर्शनमात्रम्।

347 यथाह जातुकर्णिः—

यो नीचमाश्रयेदार्य आत्मानं दर्शयेत् सदा ।
आत्मानं दासवन्मत्वा चरेन्नीचोपितं प्रति ॥

इति । चशब्दादनाश्रितोप्यवसन्नः । तथाह
जातुकर्णिः—

दरिद्रो ब्राह्मणो दान्तो वेदानां चैव पारगः ।
शूद्रेणापि सदाढ्येन भर्तव्योऽनाश्रितोऽपिसन् ।

इति । तेन चेतर इतिवक्तव्ये उत्तरग्रहणं ब्राह्मण-
एव नियमात् भर्तव्यः इतरेऽनियमत इति ज्ञापना
र्थम् । तथाच जातुकर्णिः—

348 बिभृयात् ब्राह्मणं नित्यं सर्वयत्नेन बुद्धिमान् ।
अन्यांश्चाप्यानृशंस्यार्थं शूद्रोपि द्रव्यवान् सदा ॥

इति ॥

सू० तदर्थोऽस्य निचयःस्यात् ॥

तदर्थः उत्तरपोषणार्थः अस्य शूद्रस्य नि-
चयः संचयः स्यात् भवति । यस्मादि ~~यर्थः~~ ।

348 ध्याहर्तव्यम् । एवंचास्य अन्यार्थो द्रव्यप-
रिग्रहः प्रतिषेधोभवति। हेतुवचनमपि पू-
र्ववद्‌सारद्रव्येण भरणं नभवति, किंतु स्वकु
टुंबाविरोधेन सर्वस्वदानेनेति ॥
सू॰ अनुज्ञातोऽस्यनमस्कारो मंत्रः ॥
अनुज्ञातः श्रुतौ शिष्टै र्वाऽस्य सच्छूद्रस्य नल-
सतः । नमस्कारो नाम मंत्रः। सोऽयं ~~दैवतेभ्यः~~
"देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च।
नमस्वधायै स्वाहायै नित्यमेव नमोनमः॥"
इति अस्य पितृकार्ये विनियोगः। यथा-
349 गृह्यकाराः — "ब्राह्मणानुपवेश्य
दैवतादिकं जपेदिति। मंत्र ग्रहणं नमस्कारमात्र-
मेवास्यानुज्ञातमिति माभूदाशंका इति ॥
सू॰ पाकयज्ञैः स्वयं यजेतेत्येके ॥
पाकयज्ञाः पाकसाध्याः अष्टकादयः तैः-
स्वयं यजेत न परं नियुञ्ज्यात् । एवंचान्य-

349 स्य परनियोगः सिद्धः। एके ग्रहणात् ननु
गौतमः। सोऽयं विकल्पः सच्छूद्रादसच्छूद्र
विषयः॥ न केवलं शूद्र एव एवं कुर्यात्
किंतर्हि

सू॰ सर्वे चोत्तरोत्तरं परिचरेयुः॥।

सर्वे निकृष्टाः उत्तरमुत्तरं वर्णं परिचरेयुः।
शुश्रूषेयुः। ननु च शूद्रस्योक्तत्वात् ब्राह्म-
णस्य चोत्तराभावात् क्षत्रियवैश्यार्थः
आरंभः बहुवचनानुपपत्तिः सर्वइति-
च उच्यते समानजातीयमध्यधिकं हीनः
350 परिचरेदिति बहुवचनम् ।सर्वशब्दा
दनुलोमाअपि अन्यथा वर्णाधिकारो न भवती
ति शूद्रस्यापि स्वजातौ गुणाधिकपरिचरणा
र्थः चशब्दः॥।

सू॰ आर्यानार्ययोः व्यतिक्षेपे कर्मणः
साम्यं साम्यम्॥।

350 आर्यस्योत्कृष्टजातेः अनार्यस्य निकृष्टजातेः
व्यतिक्षेपे व्यतिकरे परस्परव्यत्यासे कर्म
णः आचारस्य साम्यं समत्वं तयोरवगंतव्य
म् । आर्योपि (ब्राह्मणोपि) ब्राह्मणादिः अना
र्य कर्मा न शूद्रेण परिचरणीयः । अनार्योपि
शूद्रो य उक्तकारी स आश्रयणीयः । तथाच-
मनुः —— शूद्रानधिकृत्याह: ——
धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तिमनुष्ठिताः ।
मंत्रवर्जं नदुष्यंति प्रशंसां प्राप्नुवन्ति च ॥
इति । एवंचानेन जातिसाम्यमुक्तम् । किंतु-
351 न जातिबलमाश्रित्य कुत्सितं न कर्तव्यम्
इतरेणापि हीनोऽहमिति मत्वा नाद्रो-
न कर्तव्य इति । व्यत्यये सति विहिताकर-
णे प्रतिषिद्धसेवने च यद्वक्ष्यति प्रायश्चि
त्तं तद्द्रष्टव्यम् ॥

ओम्

351. इति मस्करीये ॥

गौतम भाष्ये ॥

॥ दशमोऽध्यायः ॥

---

अथैकादशोऽध्यायः ॥

ओम्. आर्यानार्ययोः व्यतिक्षेपे निवारयिता राजा इति । अधुना तद्धर्मानाह—

सू० राजा सर्वस्येष्टे ब्राह्मणवर्जम् ॥

राजा सर्व पूर्वमुक्तः स सर्वस्य विषयवासिनः जन-

352 स्य निग्रहानुग्रहाचार भोगनियोगेषु प्रभुः

निग्रहेऽपराधिनां, अनुग्रहे अनुग्राह्याणां,

आचारे मर्यादा (व्य)स्थापने, भोगे करग्रहणे,

नियोगे पुरुषाणां विशिष्टकरणे । अस्यापवादः—

ब्राह्मणवर्जं ब्राह्मणान्मुक्त्वेत्यर्थः । अप-

चारे पि अतः ~~सांत्वमेवैताम्~~ सांत्वपूर्वमे

तान स्वधर्मे स्थापयेत्, न वितरवर्ण-

352 वन्निग्रहणेति द्रष्टव्यम्। आरंभ प्रयोजनं सर्वक्रियासु स्वतंत्रताख्यापनार्थम्। तथाच -

नारदः —

अस्वतंत्राः प्रजाः सर्वाः स्वतंत्रः पृथिवीपतिः।

इति॥ ईक्षित्वेपि सति। साधुकारी स्यात् साधुवादी॥ साधुकारी साधुकारः। शास्त्राभिहित तदविरुद्धाचरण शीलः। साधुवादी व्यवहार दर्शन काले पक्षापाक्षितवादी। यद्यप्यस्य सर्वेक्षित्वमुक्तम् - तथापि शास्त्रोक्त

353 मर्यादांच न लंघयेत्, परस्वापहरण, परदार द्यूतादौ न प्रवर्तयेदित्यर्थः। अतः शास्त्राविरोधिपदार्थविषयऽवास्य स्वतंत्रता नाऽविशेषेणेति॥

किंच

सू॰ त्रय्यामान्वीक्षिक्यां चाभिविनीतः॥

त्रयी, ऋग्यजुस्सामलक्षणा, आन्वीक्षिकी

353 न्याय विद्या, आत्म विद्या वा, अनयोः अभिविनीतः कुशलः। विसमासाद्दण्डनीत्यां च, च शब्दाद्वार्तायां च। तथाच मनुः—

त्रैविद्येभ्यः त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्यां वार्तारंभं च लोकतः॥

इति॥

सू॰ शुचिः जितेन्द्रियो गुणवत्सहायोपायसंपन्नः॥

शुचिः अलुब्धः। जितेंद्रियः मृगयादिव्यसनरहितः, गुणवद्भ्यः विद्या चारित्रा-
354 दिभिः गुणैः युक्तैः सहायैः मंत्रिसामंतदूतादिभिः संपन्नः उपेतः सहितः उपायैः देशकालाद्यवस्थापेक्षया प्रयुक्तैः सामादिभिश्च प्रयुक्तः। गुणवत्सहायोपायवानिति वक्तव्ये संपन्नग्रहणं अनुस्रावमंगलोपसंग्रहणार्थम्॥

सू॰ समः प्रजासु स्यात्॥

354. समः व्यवहारकाले, द्वेष्यप्रिययोः तुल्य-
भावः स्यात् ॥

सू० हितं चासां कुर्वीत ॥

हितं चासां तटाकखनन, सेतुबंधनारामादी-
न प्रतिग्रामं कुर्यादित्यर्थः। चशब्दात् अहिता
नि द्यूतमद्यादीनि निवर्तयेत् इति ॥

सू० तमुपर्यासीनमधस्तादुपासीरन्नन्ये ब्राह्मणेभ्यः॥

तमेवं गुणं राजानं उपरिस्थितं नीचैः समीपवः
355 सेवेरन् क्षत्रियादयः। अब्राह्मणा इति वक्तव्ये
अन्ये ब्राह्मणेभ्य इति गुणवद्ब्राह्मणोपसंग्रहणा
र्थम् ॥ न तु जातिमात्रेभ्यः इति। तमधस्तादुपा
सीरन्निति ~~वक्तव्ये~~ सिद्धे उपरिग्रहणं उत्सवादि
ष्वपि उपरिभावार्थम् ॥

सू० तेप्येनं मन्येरन् ॥

तेपि गुणवंतो ब्राह्मणा अपि एनं अधस्तात्
स्थितं मन्येरन् पूजयेयुः आशीर्वादादिभिः -

355 लोकपालांश इति मत्वा । तथा च मनुः —
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ॥
इत्यादि । अपि शब्दात् नीचैः स्थिता अगुणवन्तो
ब्राह्मणाश्च ॥

सू॰ वर्णानाश्रमांश्च न्यायतोऽभिरक्षेत् ॥
वर्णाः अनुपनीता ब्राह्मणादयः । उत्तरकाल-
माश्रमाः । न्यायतः लोकशास्त्राविरुद्धेन
356 मार्गेण यथा येषां शास्त्रविहितकर्मानुष्ठाना-
नुपद्रवो भवति लोकव्यवस्थाभंगश्च न
भवति तथा रक्षेदित्यर्थः । अभिग्रहणं
आभिमुख्यार्थम् । ततश्च स्वयमेव विचार्य
रक्षेत् । येषां सवर्णत्वमाश्रमत्वं च नास्ति
प्रतिलोमानां, तेषामपि रक्षणार्थो विसमासः
येषां च वर्णत्वं नास्ति आश्रमत्वमेवानुलो-
मानां, तेषामप्युपसंग्रहणार्थमाश्रमग्रह-
(एकजातिरित्येव)
णम् । तेषां तु शूद्रः चतुर्थो वर्णः इत्यत्र

356 वर्णत्व निराकरणात् । प्रतिलोमानु धर्महीन इत्य
त्रोपनयन विधानात् आश्रमत्वमेवेति । इतरथा
वर्णानामेवाश्रमत्व विधानात् आश्रमत्वे सत्यपि
वर्णत्वानवगमाच्च, वर्णग्रहणेनैव लभ्यमान
त्वादिति । चकाराद्देवता प्रतिमायाश्च । तथाच
व्याघ्रः ——
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रानन्तरजांस्तथा ।
देवता प्रतिमांश्चापि रक्षेत् भूपः प्रयत्नतः ॥
357 इति ॥ रक्षणं सर्वभूतानामिति चौरादिभ्यो रक्षण
स्योक्तत्वात् अन्योऽन्यासंकरार्थ इह उपदेशः ॥
सू॰ चलतश्चैतान् स्वधर्मे स्थापयेत् ॥
एतान् उक्तान् यदा अस्याऽलस्यादिना चलं
ति न कुर्वंति तान्निगृह्य स्वधर्ममेव कार-
येदित्यर्थः । चकारात् प्रतिषिद्धसेवने च ॥
कस्मादेवं करोतीत्यत आह ——
सू॰ धर्मस्य ह्यंशभाग्भवतीति विज्ञायते ॥

357 हि शब्दो हेत्वर्थः। यस्मात् रक्षणतः धर्मस्यां
शो भवतीति अरक्षणतो धर्मस्येस्यर्थसिद्धः।
अंशः षड्भागः। तथा च मनुः—
"सर्वतो धर्मषड्भागो राज्ञो भवति रक्षणात्।
अधर्मादपि षड्भागः भवत्यस्य ह्यरक्षतः॥"
358. इति। अमूर्तस्य धर्मस्य विभागासंभवात् यावान्
वर्णाश्रमिणामुत्पद्यते ततः षष्ठांशपरिमाणो
राज्ञोपि विहितकर्मानुष्ठानादुत्पद्यते इति द्रष्ट-
व्यम्। इति करणश्चोपसंहारप्रदर्शनार्थः।
यतः प्रातदेवं अतो रक्षेत्, पालयेत् स्थापये-
च्चेति। विज्ञायत इति श्रुतिसूचनार्थम्। तदपि-
सर्वधर्माणां श्रुतिमूलत्वात् रक्षणगौरवोत्पा
दनार्थम्॥
सू० ब्राह्मणं च पुरो दधीत॥
ब्राह्मणं पुरः अग्रे सर्वकार्येषु कुर्यात्।
च शब्दात्सेनापतिं च कुर्यात्॥

358. सू॰ विद्याभिजनवाग्रूपवयश्शीलसंपन्नम् ॥

विद्याशब्देनाथर्ववेद उच्यते। स ह्येव शांत्यादि-

कर्मस्वसमर्थः इति। अभिजनं चारित्रं तद्वान-

359 अकार्ये न प्रवर्तत इति। वाक्संपन्नः संस्कृत

वक्तृत्वेन ~~वक्तृत्वेन सर्वं रञ्जयतीति~~ सर्वं रंजय-

तीति। रूपसंपन्नः प्रियदर्शनत्वात् श्रद्धेय

वाक्यो भवतीति। वयः संपन्नः नातियुवा

नाति स्थविरः असावपि महाकर्मकरणसम

र्थो भवतीति। शीलसंपन्नः क्षमायुक्तः तस्या-

साध्यं नास्तीति ॥

किंचान्यत् —

सू॰ न्यायवृत्तं तपस्विनम् ॥

न्यायवृत्तं अविरुद्धलोकाचारोपेतः सः कृच्छ्रे-

पि राजानं न परित्यजतीति। तपस्वी क्रतावे

वगमनशीलः इत्यर्थः सोऽभ्यन्तरप्रवेशा

दिषु योग्यो भवतीति। अन्येपि सहायाः एवं

३५९ रूपाः एवं कर्तव्याः इति योगविभागः। विमा-
मासा धर्मशास्त्रकुशलोपसंग्रहार्थः॥
सू० तत्प्रसूतः कर्माणि कुर्वीत ॥
तच्छब्दः सर्वसहायोपसंग्रहार्थः। प्रसूतः अभ्य-
३६० नुज्ञातः तैर्विचार्येत्यर्थः। कर्माणि दृष्टादृष्टा
र्थानि कुर्वीत ॥ कस्मात्
सू० ब्रह्मप्रसूतं हि क्षत्रमृध्यते न व्यथते इति च
विज्ञायते ॥
हि शब्दो यस्मादर्थे, यस्मात् ब्राह्मणानुज्ञया ~~[illegible]~~ क्षत्रियकर्मणि प्रवर्तमानमृध्यते
अवश्यं तत्फलेन युज्यत इत्यर्थः। विधिनैव
(विचार्यैव) कृतत्वात् पात्रदोषाद्यभावान्न व्य-
थते अन्यथा न भवतीत्यर्थः। इति च शब्दौ
श्रुति द्वय सूचनार्थौ। विज्ञायत इति श्रुतिसूचना
र्थम्। विचार्यैव कर्तव्यानीत्येवमर्थं श्रुत्युपन्या
सः॥

360 किंच

सू॰ यानि च दैवोत्पातचिंतकाः प्रब्रूयुस्तान्याद्रियेत॥

दैवचिंतकाः ज्योतिःशास्त्रविदः। उत्पातचिंतकाः शाकुननिमित्तज्ञाः प्रब्रूयुः ~~निश्चये~~ निश्चयेन (त्वे)

361 ब्रूयुः। चशब्दात् गुरवश्च। तानि आद्रियेत श्रद्दधीत तदनुरूपं कुर्यादित्यर्थः॥

तस्मात् यतः

सू॰ तदधीनमपि ह्येके योगक्षेमं प्रतिजानते॥

दैवाधीनं पुरुषकाराधीनं वा कर्मफलप्राप्तिः। दैवशब्देन पूर्वजन्मोपात्तं कर्मोच्यते, पुरुषकारशब्देन एतज्जन्मकृतम्। तथा च कण्वः-

"पूर्वजन्मकृतं कर्म दैवमित्यभिधीयते।
एतज्जन्मकृतं यत्तु पुरुषकारमिहोच्यते"॥

इति। तत्र पुरुषकाराणां पंग्वादीनां निध्यादिलाभदर्शनात्, दैवाधीनमेव फलं न पुरुषकाराधीनमिति मन्यमानाः तदधीनं,

पुरुषकर्म कृतामपि विफलत्व दर्शनात्

361. तच्छब्देन च दैवोत्पातकथितकवचनम्। ते-
362 नैवादृष्टफलविज्ञानात्। तदायत्तं योगक्षेमम्।
अलब्धलाभो योगः लब्धस्य परिरक्षणं क्षेमः।
योगस्तावत्तदधीनः इति। तेन तल्लाभालाभविज्ञाने
सति तदनुरूपं प्रयास्य यत्नस्य करणाकरणाभावात्।
क्षेमं चापि निमित्तेनोपद्रवज्ञानएव शान्त्यादि-
ना तदपनेतुं शक्यत्वात्। प्रतिज्ञायते प्रति-
ज्ञां कुर्वंति।

अन्याभिप्रायसूत्रकोऽभिशङ्कते। अन्ये-
प्येवं ब्रुवते पुरुषकारमंतरेणान्नादिसंबंधस्या
प्यनुपपद्यमानत्वात्, पुरुषकारएव प्रवर्तका
नां कदाचिदेव निष्फलत्वदर्शनात्, सर्वदा व्य-
भिचाराभावाच्च पुरुषकाराधीनमेवमन्यमा-
नाः दैवोत्पातवचनस्य कदाचिद् व्यभि
चारदर्शनात् न तदधीनमिति। एकेग्रहणात्
363 उभयस्मादिति गौतमः। नैकान्तेन दैवस्य प्राप्या-

363 न्यं, न च पुरुषकारस्य। किं तर्हि कदाचिद्दैवं
पुरुषकारमपेक्षते, तथा च पुरुषकारोऽपि दैव-
मपेक्षते। यथा पुरुषकारो दैवमपेक्षते कृष्या-
दौ, दैवं वर्षादिमन्तरेण कृष्यादि पुरुषकारेण।
न फलसिद्धिः। तथाऽश्वादिलाभो दैवं पुरुष-
कारमपेक्षते। तदन्तरेण तत्संबंधानुपपत्तेः।
गौतमस्यायमभिप्रायः — ("दैवेन नाभिचारद्वि-
ष वृद्धियुक्तानि च शालाग्नौ कुर्यात्) ~~दैवे~~-
दैवे दैवोत्पातचिंतकवचनमाद्रियेत, पुरु-
षकारे त्वाप्तवचनमिति॥

सू० शान्तिपुण्याहस्वस्त्ययनायुष्यमंगलसंयुक्ता-
न्यभ्युदयिकानि विद्वेषणसंवननाभिचार-
364 द्विषद्वृद्धियुक्तानि च शालाग्नौ कुर्यात्॥

संयुक्तशब्दः प्रत्येकमभिसंबध्यते। शान्ति-
संयुक्तं देवोत्पातसूचितापाय निवृत्त्यर्थं, य-
त्क्रियते तद् गृहशान्त्यादि। पुण्याहसंयुक्तं

364 दिनदोषनाशनार्थं विवाहादौ यत्क्रियते, तद्दो-
षनाशात् तत्कर्म शुभमेव भवति इति। स्वस्त्यय-
नयुक्तं यात्रादौ यत् क्रियते। तथाह व्यासः—
यात्रायां वामनं देवं नारसिंहं तथा युधि।
यजेत् भयेऽच्युतं देवं त्रयं स्वस्त्ययनं स्मृतम्॥
इति। आयुष्यसंयुक्तमायुष्यवृद्ध्यर्थं यत्क्रियते
मंगलसंयुक्तमर्थाद्याहरणार्थं श्रीहोमादि
एतान्येवाभ्युदयिकानि अभ्युदयहेतुत्वात्।
365 स्वयमेवाभ्युदयहेतुत्वात् एतन्नवक्तव्यमिति
चेत्, तत्कर्तुर्दोषाभावसूचनार्थत्वाददोषः।
एवं चोपरितनानां कर्तुः किंचित्प्रायश्चित्त
मस्तीति ज्ञापयति। तथा च पैठीनसिः—
राज्ञोऽभ्युदयिकं कर्म यस्तु कुर्याद्द्विजोत्तमः।
परपीडाकरं मुक्त्वा न स पापेन लिप्यते॥
परपीडाकरं कृत्वा विप्रोक्ताद्ब्राह्मणनिष्क्रियात्।
राज्ञा चानुमतस्यापि शुद्धिरुक्ता मनीषिभिः॥

365. इति ॥

परपीडाकरत्वादुपरितनानां पृथगुपन्यासः। विद्वेषणसंयुक्तं येनास्य परः प्रकृतीनां विद्विष्टो भवति। संवननं संयुक्तं येनास्य शत्रुः प्रणिपतति। अभिचारणसंयुक्तं येनास्य शत्रुः- म्रियते। विगता ऋद्धिः व्यृद्धिः, द्विषतः व्यृद्धिः द्विषद्व्यृद्धिः तया युक्तं येनास्य-

366. परो विगतैश्वर्यो भवति उच्चाटनादि। उपरि ऋत्विग्ग्रहणात् दानानि पुरोहितः कुर्यात् शालाग्नौ। चशब्दाल्लौकिके च, तत्र पूर्वोक्तानि लौकिकेऽग्नौ। इतराणि शालाग्नाविति द्रष्टव्यम् ॥

सू०. यथोक्तमृत्विजोऽन्यानि ॥.

पुत्रकामेष्ट्यादीन्यन्यानि यथोक्तमृत्विजः कुर्युः। राजा दक्षिणां प्रति लुब्धो माभूत् इति यथोक्तग्रहणम् ॥.

366 सू॰ तस्य च व्यवहारो वेदो धर्मशास्त्राण्यङ्गान्युप-
[वेदाः पुराणम् ॥

व्यवह्रियते अनेनेति व्यवहारः। तस्य प्रजा-
पालनाधिकृतस्य राज्ञो व्यवस्थासाधनान्येतानि।
वेदादीनि प्रसिद्धानि। वेदे "गतो ऋणिव-
सजये धनानां" इत्यादि व्यवहारदर्शनात्,
367 धर्मशास्त्रे वर्णाश्रमादि व्यवस्था प्रतिपादनात्, अङ्गे-
शब्दादि व्यवस्था प्रतिपादनात्, उपवेदे
अस्त्रादि प्रतिपादनात्, पुराणे जगतः स्थि-
ति विज्ञानात्। विसमासः पूर्वस्य पूर्वस्य
बलीयस्त्वज्ञापनार्थः। ततश्चोत्तरोत्तराविरोधे
पूर्वोक्तमेवाचरेत्। व्यवहारतत्त्वदर्शने वेदा-
दयोऽङ्गानि भवन्तीति व्यवहारशब्देनोच्यते।
तान्यालोच्य व्यवहारान् स्थापयेदित्यर्थः॥
किंच

सू॰ देशजातिकुल~~शब्द~~धर्माम्नायैरविरुद्धाः

367 प्रमाणम् ॥.
देशधर्मः कौतुक मंगलादि, जातिधर्मः,
आभीरकादीनां कंतरागाभावादिः। कुलधर्मः
आधान
दक्षिणतश्चूडा वसिष्ठानां इत्यादिः। आम्नायैः वेद
धर्मशास्त्रादिभिः पूर्वोक्तैः। बहुवचन प्रयोगात्,
368 अविरुद्धाः अबाधिताः प्रमाणम्। वक्ष्यमाणा
नां कर्षकादीनामपि (कर्षकादीनामपि) आम्नायाविरुद्ध
त्वज्ञापनार्थः चकारः। देशधर्मादीनपि सम्यक्
ज्ञात्वा आम्नायाविरुद्धान् गृह्णीयात्। विरोधे
त्यक्तव्या इत्येवमर्थमुपदेशः॥

(सू० कर्षकवणिक्पशुपालकुसीदिकारः -
स्वेस्वे वर्गे ॥)

कर्षकाः कृषिजीविनः, वणिजः प्रसिद्धाः,
पशुपालो गोपालः, कुसीदिनो वार्द्धुषिका
दयः। कारवोऽयस्कारादयः। स्ववर्ग इति वक्तव्ये
लिप्सावचनं न केवलं कर्षकादय एव स्ववर्गे प्रमा-

369 णं किं तर्हि ब्राह्मणादयोपीति। तत्रापि स्मृत्यंतरसाम
र्थ्यात् त्र्यवरा एव द्रष्टव्याः। "स्ववर्गे त्र्यवरा एव
धर्मान् प्रब्रूयुः" इति प्रजापति वचनात्। "आम्ना-
यैरविरुद्धाः प्रमाणम्" इत्युक्तत्वात् यदि ते त-
369 दविरुद्धं प्रब्रूयुः तदा सर्वैः ब्राह्मणसकाशं
गन्तव्यं तेषामेव तदविरोधेन वक्तुं सामर्थ्य-
मिति। "तस्य व्यवहार" इत्युक्तत्वात्। तत्राप्यप-
रितोषे राजसकाशं गंतव्यमिति द्रष्टव्यम्।
तत्र तेनाप्याम्नायाद्यविरोधेन वक्तव्यत्वात्
एकस्यैव तदविरोधेन ज्ञानसामर्थ्याभावात्
तदसैः ब्राह्मणैः सह ब्रूयादित्यर्थः। तथा च मनुः
"व्यवहारं दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः"।
इत्यादि॥ इदानीं यदि कर्षकादयो राजानमेव
गच्छेयुः तदा कथं राजा परिच्छिन्द्यात्
स्यात आह—
सू० तेभ्यो यथाऽधिकारं अर्थान् प्रत्यवहृत्य

369 धर्मव्यवस्था ॥.

तेभ्यः यथाधिकारं यो यत्राधिकृतः प्रतिवर्गि-

370 स्थित इत्यर्थः। अर्थानाचारान् प्रत्यवहृत्य स्वयमेव सम्यक् पृथक् विचार्येत्यर्थः। कुतः एतत्? अवगम्येति (अवहृत्य) वक्तव्ये प्रत्यवहृत्येत्यारंभात्। ततो धर्मव्यवस्था कर्तव्या। इति शेषः। तत्र परिच्छेदः कर्तव्य इत्यर्थः। ब्रूयादिति वक्तव्ये व्यवस्थाग्रहणे राज्ञा परिच्छिन्नस्य पुनः निवृत्तिः माभूत् इति। एवं चापरितोषेऽन्यत्र सिद्धस्यापि पुनः करणमस्तीति ज्ञापयति। धर्मबुद्ध्यैव व्यवस्थापयेत् नार्थाशयेति धर्मग्रहणम्॥

सू. न्यायाधिगमे तर्कोऽभ्युपायः॥

न्याययुक्तस्याधिगमेऽवधारणे तर्कः अनुमानमभ्युपायः प्रथमोपाय इत्यर्थः। तथाच मनुः—

"यथा नयत्यसृक्पातैः मृगस्य मृगयुः पदम्।

370 तथानुमानेन नयेत् धर्मस्य नृपतिः पदम्"॥

371 इति॥

सू॰ तेनाभ्यूह्य यथास्थानं गमयेत्॥

तेनानुमानेनाभ्यूह्य यथाह मनुः—

"आकारैरिंगितैर्गत्या चेष्टया भाषितेन च।

नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः"॥

इति॥ यथास्थानं यथातत्त्वं गमयेत् प्रापयेत्॥

सू॰ विप्रतिपत्तौ त्रैविद्यवृद्धेभ्यः प्रत्यवहृत्य

निष्ठां गमयेत्॥

विप्रतिपत्तिः ऽऽकैकस्यैव तर्केणावधारणासाम-

र्थ्यं, अति सौक्ष्म्यात् कार्यस्य उभयथा लिंगदर्श-

नाच्च, तस्यां त्रैविद्यवृद्धाः सकलवेदपारगाः,

तेभ्यः आगमस्यास्येदं लिंगमिति इदानीं लिंगा-

इदं कार्य परिच्छेदकं, पूर्वमस्यैव लिङ्गं

न्तरमिदं किं परिच्छिनत्तीत्येवमादि तैर्विचार्य

तत्त्वं ज्ञात्वा इत्यर्थः। आम्नायाद्यविरोधैर्परि

372 ज्ञानार्थं ये सहाया उक्ताः तऽव आद्यंते—

372. त्रैविद्यवृद्धलक्षणप्रापणार्थम् । तथा च मनुः
"मंत्रज्ञैः मंत्रिभिश्चैव विनीतः प्रविशेत् सभाम्।
इति तत्रैव वक्तव्यं इति चेन्नैष दोषः आम्नाया
विरुद्धविचारणायामेव न केवलं तैर्विचारः
क्रियते . किंतु लिंगसंदेहे ~~वेदविरोधे चासति~~
चेति । एवमर्थः इहोपदेश इति । असति लिं-
गसंदेहे वेदविरोधे चासति राज्ञ एव परि-
च्छेदकत्वं द्रष्टव्यम् । सहायानमुभयार्थत्वा
दिति । लिंगसंदेहे त्रैविद्यवृद्धैरेव प्रापयेत् न तु स्व-
यं, यथास्थानं गमयेत् इति अधिकारानुकर्षणादे
व सिद्धे निष्ठां गमयेदिति आरंभात् ।

किमेवं कुर्वतो भवतीत्यत आह —

सू. तथा ह्यस्य निर्~~देशः~~ श्रेयसं भवती ॥

एवमन्यनिर्णयं कुर्वतो निश्रेयसं उभयलोक-
जयत्वं, अमुत्र कर्मप्राप्त्या, इहापि जनानुरागादि-
ति । इतिशब्दः हेत्वर्थः यस्मादेवमिति ॥

372 ऽवं राज्ञो भवति। त्रैविद्य वृद्धानांतु सहाय-

373 रूपेण स्थितानां किं भवति। तदनुरूपां श्रुतिमुदा

हरति —

सू॰ ब्रह्मक्षत्रेण पृक्तं देवपितृमनुष्यान्
धारयतीति विज्ञायते ॥

ब्रह्मवै त्रैविद्यलक्षणं क्षत्रेणपृक्तं राज्ञा सह-
धर्मविवेचनं कुर्वदित्यर्थः। निरुपद्रवकर्मानुष्ठा-
नेन द्वारेण "इतःप्रदानं देवाः उपजीवंती"त्येवं देव-
पितृन् धारयति। इत्या हुत्यादि द्वारेणान्ननिष्प-
त्या मनुष्यान्। अतो राजसु (इत्येवं देव) प्रश्न
विवेचनं धर्माय इति कर्तव्यम् ॥

अथत्वेवमपि व्यवस्थां कुर्वतः दौरशी-
ल्या न्नावतिष्ठन्ते, ततः —

सू॰ दण्डो दमनादित्याहुः तेनादांतान् —
[दमयेत् ॥

दमयत्यदान्तान् दम्यंते अस्मिन्निति वा दण्डः।

373 यतश्च दमनयोगात् इत्येवं मन्वादयः आहुः

तथात्र मनुः —

"देवदानवगंधर्वा रक्षांसि पतगोरगाः।
तेपि भोगाय कल्पंते दण्डेनैव निपीडिताः"॥

374 इति। अश्वो यो यथा दम्यते वाचा निबंधनया

वा। यथाह मनुः —

"धिग्दण्डं प्रथमं कुर्यात् वाग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डं तु वधदण्डं अतः परम्"॥

इति॥ एवं कुर्याद्दौःशील्याद्विकर्मस्थान॥

एवं कृताः प्रजाः कथं प्रवर्तन्त इत्यत

आह —

सू॰ वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततश्शेषेण विशिष्टदेशजातिकुलरूपायुश्श्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यंते॥

(विशिष्ट शब्दः प्रत्येकमभिसंबध्यते)

374 वर्णाः ब्राह्मणादयः, उपनीता, आश्रमाः ब्रह्मचर्यादयः, स्वकर्मानुष्ठानपराः प्रेत्य परलोके तत्फलमनुभूय उपभुज्य तत्फलोपभोगस्य अवशेषेणेह विशिष्टदेशादि संबंधं जन्म प्रतिपद्यन्ते। विशिष्ट शब्दः प्रत्येकमभिसंबध्यते — विशिष्टदेशः आर्यावर्तादिः। विशिष्ट जातिः

375 ब्राह्मणादिः। विशिष्टकुलं अध्ययनादिसंपन्नं, विशिष्टं रूपंप्रिय दर्शन(मनुभवसिद्धिः) त्वं, विशिष्टमायुः समग्र शतवर्षादि, विशिष्ट प्रश्रुतं वेदार्थ विज्ञान सहितं, विशिष्टं वृत्तं, विशिष्ट चारित्रम्, विशिष्टं वित्तं, गवाश्वादि लक्षणं, विशिष्टसुखं अभिलषित पदार्थस्याविघ्नेनानुभवसिद्धिः, मेघ शब्देनारोग्यमुच्यते, विशिष्टारोग्यमभिलषित भक्षणे प्यरोगोत्पत्तिः। एवं च ध्रुवानित्यकर्मणां च कर्ता तत्फलस्य चोपभोक्ता, शरीरव्यतिरिक्त आत्मा प्रतिपादितो भवति। तथा

375 श्रुतिः— "स एष महानज आत्मा योयं विज्ञा-
नमयः कर्ता भोक्ता स उ क्षेत्रज्ञोऽमृतमयः प्राणे
प्रतिष्ठितः" इति। तथात्र मनुः—
"योह्यात्मनः कारयिता" इत्यादि। तस्य च नित्य-
स्य सतः कर्मक्षयात्तदारब्धस्य शरीरस्या
पिपतने तत्कर्मफलं स्वर्गादि तत्कर्मणैवा
रब्धेन तत्फलोपभोगयोग्येन शरीरेणाहं
कारेन्द्रियशक्तिमनः प्राणसहितेनानुभूयैष
376 धीरादि द्वारेण अन्नमयोभूत्वा रेतोरूपेण परि-
णम्यते। तत्स्थेन वायुना पूर्वं मातुः उदरं प्रविष्टे-
ना ~~वायुना~~ कृष्टस्सन् तच्छोणितसहितः पूर्वानु-
भुक्तशिष्टकर्मानुगृहीतस्य शरीरस्योपादानं जन्मे-
त्याचक्षते। एवं व्यवस्थिते सूत्रार्थे चोद्यते,
आश्रमग्रहणमनर्थकं, वर्णानामेवाश्रमविधा-
नात्, आश्रमत्वेपि च वर्णत्वानु[?]नवगमाच्च।
आश्रमग्रहणे कर्तव्येपि विसमासत्वकारौ अन-

376 र्थकौ तद्द्वयस्याभावात्। स्वग्रहणं चानर्थकं,
अनुष्ठानादेव स्वत्वसिद्धेः। कर्मग्रहणमन-
प्यनर्थकं, कर्मफलमनुभूयेत्यत्र कर्मग्रह-
णेनैवार्थसिद्धत्वात्। निष्ठाग्रहणमप्यनर्थ-
कं, तत्पूर्वेण विना तत्करणासंभवात्। प्रेत्येत्यपि-
न कर्तव्यम्। जन्म प्रतिपद्यंते इत्यनेनैवा-
377 र्थसिद्धत्वात्। फलमनुभूयेति वक्तव्ये कर्मग्रह
णमतिरिच्यते, फलस्य कर्मसाध्यत्वात्। ततः
इत्येतदपि न कर्तव्यं, अधिकारादेव कर्मणः
परामर्शसिद्धेः। शेषानुपपत्तिश्च, कृत्स्नस्य
कर्मणः फलोपभोगेन उपक्षीणत्वात्।
~~भ~~ नहि फलदानाभिमुखीभूतस्य कर्मणः ~~एके~~
ऽकदेशेनावस्थानमुपपद्यते। नहि क्षीरा-
द्येकदेशेन ~~क्षीर~~ दध्यादिकार्यारंभकमिति।
नहि घृतघटादिवद्वासनाशेषः शेषशब्द
वाच्यः। अमूर्तत्वात्कर्मणो वासनाशेषानुप

377 पत्तेः। नचामुत्रानुष्ठितं कर्मेह शेषशब्देनोच्यते,
तत्राधिकाराभावात्, उपयुक्तेतरार्थत्वासंभवा
च्च। नच फलोपभोगविच्छेदस्यैव शेषत्वम
378 ध्यवसितुं युक्तम्। श्रुतहानेः अश्रुतकल्पना
याश्च प्रसंगात्। कर्मणो हि फलं श्रुतं न फल
विच्छेदस्य। नचाक्षीणे कर्मणि उपभोगविच्छेदः
संभवतीति तस्य कर्माश्रितत्वात्। यथा प्रदीपः
तैलाश्रितः तत्क्षयादेव क्षीयते। अपिच तस्येहो-
पहन्तारः शलभादयो विद्यंते नतु कर्मफलस्य।
तस्मान्न फलविच्छेदस्य शेषशब्दवाच्यता। नच-
कर्मफलस्य विभागः कर्तुं शक्नोति — अनेना-
मुत्र सुखमनुभोक्तुं शक्ष्ये, अनेन विशिष्टदेशादि
संबंधं भवामि (लप्स्ये) इति। निष्पन्नत्वात्।
अनिष्पन्नस्य हि विभागः श्रूयते। इदं व्रीहीणां
क्षेत्रं इदं यवानामिति, ~~नतु~~ नतु निष्पन्ना
व्रीहयो यवाः क्रियंते इति। यदि कर्मनिष्ठा-

378 अमुत्र फलोपभोगशेषेणेह जन्म प्रतिपद्यते,
379 एवं मोक्षाभावप्रसंगात् श्रुतिविरोधो भवति।
"ब्रह्मविदाप्नोति परम्" "तमेवं विदित्वामृत्युमत्ये-
ति इत्यादिकायाः। यदि कर्मशेषेण विशिष्ट-
देशादिप्राप्ति लक्षणं जन्म भवति, ततो जगद्वै-
चित्र्यानुपपत्तिप्रसंगो दृश्यतेहि तत् (श्रूयतेऽपतत्)
इति। प्राप्तस्य च कर्मणः फलत्वाभ्युपगमे
पुरुषकारोऽपि निष्फलएव। तस्माच्छेषशब्द-
वाच्याभावात् सूत्रेण समस्तेनापि प्रकारान्तरा
क्रान्तस्यार्थस्यानुपपद्यमानत्वात् असमंजस-
मिदं सूत्रमिति?

अत्र समाधिः —— उभयग्रहणं तावत्
कर्तव्यम्, वर्णानामाश्रमाणां च धर्मभेदात्।
प्रागुपनयनाद्वर्णाः ऊर्ध्वमाश्रमा इति। अस्ति च
अनुपनीतानामपि कैश्चिद्वर्णधर्मैरधिकारः इति।
380 असमस्तो द्वंद्वपरिग्रहार्थः; मा भूत् समाना-

380 विकरण्याशंकेति, द्वंद्व पक्षेतु उभयप्रधानत्वा-
त् उभयोरुपादानं (सिद्धं) भवति । सृष्ट्यंतरोपसं-
ग्रहार्थः च शब्दः, तेषामपि स्वधर्मानुष्ठानादुत्क-
र्षो लभ्यत इति । यथाह मनुः—
"ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः।
स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम्"॥
इति । स्वग्रहणमपि प्राथमिककल्पोपसंग्रहार्थम्।
आपद्विहितस्य प्रायश्चित्तविधानादेव एतत्-
सिध्यतीति चेत्, न वर्णान्तरकर्मानुष्ठानएव
प्रायश्चित्तविधानं न स्वकर्मण एव विगुणस्येति।
तथाचोक्तं नारदेन—
"आपदं ब्राह्मणस्तीर्त्वा क्षत्रवृत्त्या भृते जने"।
इत्यादि । तस्मात् विगुणस्य स्व कर्मणः फलप्रति-
381 षेधार्थं स्वग्रहणम् । एवंच विगुणं यत्कर्म न-
तत्फलसाधनं, प्रायश्चित्तविधानात् नापि दोष-
साधनमिति द्रष्टव्यम् । निष्ठाग्रहणं सातत्यार्थम्।

३८१ यो ह्याशरीरनिपातात् कर्म करोति स प्रधानेन
फलेन संबध्यत इति । प्रेत्यग्रहणं अवश्यं-
भावि फलमिति ज्ञापनार्थम् । तथा दृष्टफलैः
इह सिद्धिः तथा अवश्यं तत्राप्यदृष्टफलैरिति।
न तु कृतं कर्म निष्फलं भवतीति । कर्मग्रहणं
तु केवलं कर्मकृत एवानेन फलेन(संबंधः)
युज्यते न ज्ञानकर्मसमुच्चयकारिणः इति । असौ-
मुक्त एव भवतीति । अनेनैव मोक्षाभावप्रसङ्ग-
चोद्यं परिहृतमिति द्रष्टव्यम् । तत इत्येतदपि-
कर्मनानात्व प्रतिपादनार्थम् । तस्य तस्य कर्मणः
शेषेण(तिरेकेण)। इति । कर्मणां तारतम्यात्
३८२ फलवैचित्र्ये सति जगद्वैचित्र्यमुपपन्नमिति।
तारतम्यं च कर्मणां देशकालद्रव्यश्रद्धापात्रा-
भ्यास विशेषादिति शेषशब्दश्च कर्मसमुदायापे-
क्षया द्रष्टव्यम् । कथं तत् स्वर्गफलं तत्रैव फलं-
ददाति यदैहिकफलं तेन विशिष्टदेशादिसंबं

382 घं जन्म भवतीति। स च तस्य समुदायस्य
शेष इति प्रधानकर्मणो वाग्निभूत होत्रादि दे
रङ्गभूतं यत्क्रियते तच्छेषशब्देनोच्यते।
यथा— "गोदोहनेन पशुकामस्य प्रणयेत्"
"खादिरं वीर्यकामस्य यूपं कुर्यात्" इत्यादि। तत्र-
प्रधानफलममुगोप युज्यते अंगफलंविहेति।
वृक्षवद्वैतद्द्रष्टव्यम्। वृक्षो हि बहुमूलैर्जायते।
383 स यदा हि छिन्नप्रधानभूयिष्ठमूलो भवति, तदा-
ऽल्पनिस्सारमूलत्वात् आरमहमानः पतति
एवं कर्मणोपि प्रधानरूपस्य उभयभोगात्
(उपभोगात्) उपक्षीणे शिष्टरूपं कर्तारं तत्र स्था-
पयितुमशक्नुवन् विशिष्टदेशादि संबंधं फलं-
ददातीति। घृतघटवद्वा द्रष्टव्यम्। यथा-
घृतघट उपयुक्ते स्नेहे वासनाशेषात् अग्निना-
संयुक्तो ज्वलयति, एवं कर्मकृदपि वासनाशे-
षादेव विशिष्टदेशाद्यनुभविष्यतीति। सावय-

383 वत्वाच्च कर्मणो वासनोपपद्यत एवेति। सा-
वयवत्वादपि कार्यत्वात्।

यच्चोक्तं पुरुषकारोऽनर्थक इति, तत्रोच्य-
ते —— पुरुषकारयुक्तस्यैव फलसंबंधः,
तद्विहीनस्याप्यादि संबंधो नास्तीति।
384 तस्मात् फलदानकारणं पूर्वशिष्टसंबंध-
कारणं पुरुषकार इति नानर्थकः पुरुषका-
र इति सर्वमिदं सूत्रमुपपद्यते॥
एवं-
सू. विष्वंचो विपरीता नश्यंति॥
ये पुनः स्वयं न (कर्म) कुर्वन्ति राज्ञा च न-
स्थाप्यंते ते विष्वंचः तिर्यग्गतयो नश्यंति।
विशिष्टदेशादि काल संबंधाभावात्। विपरीताः
स्वकर्मनिष्ठेतराः। एवं च कुर्वता ये स्वकर्म-
निष्ठाः तेषामुत्तमगतित्वं, ये न राज्ञा स्वकर्म-
णि स्थाप्यंते तेषां मध्यमगतित्वं, ये स्वकर्म

384 निष्ठा न भवंति। राज्ञा च न स्थाप्यंते, तेषा-
मधोगतित्वं च दर्शितंभवति। तथोक्तं पुराणे-
शुभैः भवति देवत्वं व्यामिश्रैः जन्म मानुषम्।
अशुभैश्चाप्यधो जन्म कर्मभिः लभते नरः॥
इति॥

385 सू० तानाचार्योपदेशो दण्डश्च पालयते॥
तान् अज्ञान् विहितानुष्ठानेन प्रतिषिद्धसे-
वनेन वा नश्यंतो वर्णाश्रमिणः आचार्यो-
पदेशः रक्षति इति, इतरांस्तु दण्ड इति॥
सू० तस्माद्राजाचार्यावनिंद्यौवनिंद्यौ॥
अतश्च रक्षणहेतुत्वात् कारणेपि सति परु-
षादि न वक्तव्यम् (अतः परुषमप्युपदिश-
न्नाचार्यः, उग्रमपि दण्डं धारयन् राजा च,
अत्यंतोपकारित्वादकुत्सनीयौ॥ ओम्-
इति मस्करीये गौतमभाष्ये
॥ एकादशोऽध्यायः समाप्तः॥

385 अथ द्वादशोऽध्यायः ॥

ओम् ॥ दण्डो दमनादित्याहुः तेनादान्तान्
386 दमयेत् इति सामान्येन विहितम्। तत्र कापराधे कियान्दण्डः इति तद्वक्तव्यमित्यत आह—

सू॰ शूद्रो द्विजातीनतिसंधायाभिहत्य च वाग्दण्डपारुष्यमंगं मोच्यो येनोपहन्यात् ॥

शूद्र उक्तः स द्विजातीननुपनीतान् ब्राह्मणादीनतिसंधाय बुद्धिपूर्वमतिक्रम्य न तु परिहासादिना। अभिहत्य च अभिशब्दः बुद्धिपूर्वज्ञापनार्थः। अभिहत्य ताडयित्वा। क्रमेण वाक्पारुष्य दण्डपारुष्याभ्याम्। तत्र तत्र वाक्पारुष्येणातिसंधाय दण्डपारुष्येणाभिहत्येति क्रमो द्रष्टव्यः। वाक्पारुष्येणातिक्रमणं परुषादिवचनम्। परुषशब्द उग्रपर्यायः। उग्रया वाचातिक्रम्य, उग्रेण दण्डेनाभिहत्येत्य-
387 र्थः। ततश्चोपलादिना न दोषः। अंगं

387 शरीरावयवम् । मोच्यं छेद्यं, येन हस्तादिना-
उपहन्यात् पीडयेत् । एवं च विनापि दण्डे-
न दण्डपारुष्यं भवतीति ज्ञापयति । वा-
क्पारुष्ये वाकछेदनम् । हस्तादिना
दण्डपारुष्ये तदंगच्छेदनमिति द्रष्टव्यम् ।
च शब्दादुभयापराधे उभयं मोच्यम् ॥
सू. आर्यस्त्र्यभिगमने लिंगोद्धारः स्वहरणञ्च॥
आर्याणां ब्राह्मणादीनां अर्यवृत्ता चेत् (स्त्री) । कुत
एतत् ~~स्त्र्यभि~~ स्त्र्यभिगम इति वक्तव्ये आर्य-
स्त्र्यभिगम इति आरंभात् एवं च वैश्यारूपे
ण स्थितायामदण्ड्यः । स्त्रियामेवाभिगमन प्र-
वृत्तेः (सिद्धेः) आर्यागमन इत्येव सिद्धे स्त्रीग्रहणं
388 आर्यपरिगृहीतायां शूद्रायामपि भवतीत्येव
मर्थम् । अभिगमने अभिशब्दः बुद्धिपूर्वार्थः ।
ततश्च स्वप्नादवबुद्धस्य तथैव कृतस्य वा,
लघुतरो दण्डो द्रष्टव्यः । लिंगस्योद्धारणमुत्पाट-

388 नं सर्वस्वहरणं च कर्तव्यम् । कुतऽतत् लिंगो-
द्धारो धनस्य चेति वक्तव्ये स्वहरणं चेत्यभि
धानात् । चकारः समुच्चयार्थः । विकल्पो मा-
भूदिति असमासः । क्षत्रियवैश्यस्त्रीगमने -
यथासंख्येनैकैकं ब्राह्मणस्योभयमिति ॥
सू० गोप्ता चेद्वधोऽधिकः ॥
यदि तासां रक्षिता भवति ततस्तदभिगमने
पूर्वोत्तरमुभयं कृत्वा अधिकग्रहणात्, प्रमा(प)
णं च कर्तव्यम् ॥
389 सू० अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां -
श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे -
शरीरभेदः ॥
पञ्चवर्षादूर्ध्वं ' । अथ शब्दोपादानात्
तथा च स्मृत्यंतरम् —
"वेदं श्रुत्वा तु पश्चाच्च शूद्रश्चे दण्डभाग्भवेत् ।
अप्राप्तपञ्च वर्षो नो दण्डमर्हति कुत्रचित् ॥"

389 इति। ह शब्दो बुद्धिपूर्वकसूचनार्थः। न
गौस्तुरिवेत्येवमर्थमस्य शब्दस्योपादानम्।
वेदं साङ्गम्। कुत एतत् साङ्गो वेदः स्त्री-
शूद्रसकाशे नाध्येतव्यः इति गृह्यस्मृतिवचना-
त्) दर्शनात्। उपशब्देन समीपवाचिना अक्षरश्रव-
णेन दोषइति दर्शयति। ततश्च ध्वनिमात्रश्रवणे
नदोषः अह शब्देन बुद्धिपूर्वत्व दण्डविधा-
नात् प्रमादात् कदाचिदक्षरश्रवणेपि दोषा-
भावो द्रष्टव्यः। त्रपुणा जतुनावेति द्रष्टव्यम्।
तत्ताभ्यामितिच द्रष्टव्यम्। पूरणोपदेशसाम
390 र्थ्यात्। श्रोत्र द्वय परिग्रहार्थः प्रतिशब्दः
उदाहरणे द्विजातिभिः सह जिह्वाच्छेदः कर्तव्यः।
धारणे स्वयमेव उदाहरणे इत्यर्थः। परशुना-
शरीरभेदः कर्तव्यः॥
सू. आसनशयनवाक्पथिषु समप्रेप्सुर्दण्ड्यः॥
आसनादिष्वार्यैस्तुल्यत्वे स्वेच्छया।

390 कामयमानः। आसनादिषु उच्छ्रितादि गुणेषु साम्यं,
वाक्साम्यं, समाकालोच्चारणं, पथि साम्यं पृष्ठतो-
मुक्त्वा सह गमनम्। दण्ड्यः (स्थानाद्यपेक्षया) धा-
रणाद्यपेक्षया (श) गतादर्वाक् द्रष्टव्यम् ॥
सू॰ शतं क्षत्रियो ब्राह्मणाक्रोशे ॥
कृत इति शेषः। आक्रोशो वाक्पारुष्यम्। दण्ड-
पारुष्ये तु द्विगुणं कल्प्यं, स्मृत्यंतर सामर्थ्यात्।
यथाह बृहस्पतिः ——
"वाक्पारुष्ये कृते यस्य यथा दण्डो विधीयते।
तस्यैव द्विगुणं दण्डं प्राणादन्यत्र दण्डयेत्" ॥
इति। तथा चाहोशना —— "अवगूरणे वाक्-
पारुष्यतुल्यं ताडने तद्द्विगुणं शोणितोत्पादने —
391 त्रिगुणम्" इत्यादि। शतं कार्षापणानां क्षत्रियो
दण्ड्यः ब्राह्मणमाक्रुश्य ॥
सू॰ अध्यर्धं वैश्यः ॥
ब्राह्मणाक्रोश इति वर्तते। (ब्राह्मणेन क्षत्रियो आक्रु)

391. अर्धेनाधिकं यच्छतं तद(ध्यर्धं)दण्ड्यः वैश्यः॥

सू॰ ब्राह्मणस्तु क्षत्रिये पंचाशत्॥.

आक्रुष्टइति वर्तते। ब्राह्मणेन क्षत्रियेआक्रुष्टे ब्राह्मणः श्रोत्रियश्चेत् कुतः? तुशब्दोपादानात्, पञ्चाशद्दण्ड्यः। समवर्णे द्वादशं वा कल्प्यम्। अवचनीयेषु द्विगुणं कल्प्यम्॥

तथात्र मनुः—

"समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे॥

वादेष्ववचनीयेषु तदेवद्द्विगुणं भवेत्"॥

इति॥.

सू॰ तदर्धं वैश्ये॥

वैश्ये आक्रुष्टे ब्राह्मणः पञ्चविंशतिः दण्ड्यः॥

392 सू॰ न शूद्रे किञ्चित्॥

शूद्रआक्रुष्टे -किंचित् ब्राह्मणो दण्ड्यः। अथवा वचनादेव तत्सिद्धमिति चेत् न-क्षत्रियवैश्ययोः दण्डप्रापणार्थत्वात्।

392 एवं च तद्विषये दण्डः कल्प्यः। क्षत्रिये-
चतुर्विंशतिपणं, वैश्ये षट्त्रिंशदिति। तथा-
चाहोशनाः —— "शूद्रमाक्रुश्य क्षत्रियश्चतु-
र्विंशति दण्डभाग् वैश्यः षट्त्रिंशदित्यादि॥

सू॰ ब्राह्मणराजन्यवत् क्षत्रियवैश्यौ

ब्राह्मणक्षत्रिययोः परस्पराक्रोशे यदुक्तं तत्
क्षत्रियवैश्ययोरपि द्रष्टव्यम्। क्षत्रिये शतं वैश्ये-
पञ्चाशदिति। एवमन्तरजानामपि द्रष्टव्यम्।
यथाह जमदग्निः —— मातृतुल्यमनुलोमा-
नां पितृतुल्यं प्रतिलोमानां इति॥

साहसदण्डमुक्त्वा स्तेयदण्डमिदानीमाह——

393 सू॰ अष्टापाद्यं स्तेयकिल्बिषं शूद्रस्य॥

स्तेयेन यदुपात्तं तदधर्मकारणत्वात् तद्द्र-
व्यं (तद्द्रव्यं) किल्बिषशब्देनोच्यते। स्तेयं-
किल्बिषं स्तेयदण्डमित्यर्थः। संगृहीतद्रव्य-
स्याष्टगुणो दण्डः इति। तत्र सर्वत्र ब्राह्मण

393 वर्जं द्रष्टव्यम्। तस्य महापातकमध्ये उपदेशात्
दण्डगौरवं भवतीति॥

सू॰ द्विगुणोत्तराणीतरेषां प्रतिवर्णम्॥
इतरेषां वैश्यक्षत्रियब्राह्मणादीनां प्रतिलोमे-
न प्रतिवर्णमित्यारंभात्, द्विगुणोत्तराणि दण्ड-
~~उत्तरोत्तरं~~ उत्तरमुत्तरं द्विगुणम्। वैश्यस्य-
षोडशगुणः क्षत्रियस्य द्वात्रिंशत्, द्वात्रिं-
-शद्गुणः। ब्राह्मणस्य चतुष्षष्टिगुणमिति।
सर्वत्र धनिने धनार्पणं द्रष्टव्यम्, "चोर
394. हृतमपजित्य यथास्थानं गमयेत्" इत्युक्त-
त्वात्॥.

सू॰ विदुषोऽतिक्रमे दण्डभूयस्त्वम्॥
जात्युत्कर्षवत् विज्ञानोत्कर्षादपि दण्डभूयस्त्वं
द्रष्टव्यम्। तत्स्वजातिविहितादध्यर्धं विदुषो-
ज्ञेयम् इति स्मृत्यंतरदर्शनात्। उपपन्नं चैतत्
यतोऽसौ ज्ञात्वातिक्रामति इति। विदुषो दण्ड-

394 भूयस्त्वं इति सिद्धे अतिक्रमग्रहणं नियमा-
र्थं, चौर्यविषय एवेदं न साहसविषये न
साहसदण्ड प्रायश्चित्तविषये पीति। एवं च
ब्रुवतो दण्डविधानवत् प्रायश्चित्तस्यापि
गुरुलघुभावकल्पना चेति प्रदर्शितं-
भवति। साहसप्रकरणे यदुक्तं श्रोत्रियस्य
अर्धदण्ड इति तच्चोपपन्नतरम्।

(अस्य) अपवादः ——

सू. फल हरित शाक धान्यादाने पंच कृष्णल
मल्पे॥

फलानामाम्रफलादीनां अ...... (हरित) त धान्यस्य व्री-
ह्यादेः अपक्वस्येत्यर्थः। शाकस्य मूलफलका
देः अपहरणे माषमात्रो दण्डः। कुतः "पञ्चकृष्णल
395 को माषः" इति स्मृत्यंतरदर्शनात्। अल्पे
उदर भरण पूरण मात्रे। अधिकेऽन्यद्रव्ये चाष्टापा-
द्यमेव द्रष्टव्यम्॥

395 सू० पशुपीडिते स्वामिनो(न) दोषः॥

पशुभिरुपहृते सस्यादौ यस्य पशवः तस्य दण्डो वक्ष्यमाणः॥

सू० पालसंयुक्ते तु तस्मिन्॥

पालाश्रिते पालएव दण्डभागित्यर्थः। तु शब्दः पालेन कारिते दण्डभूयस्त्व ज्ञापनार्थः। भूयस्त्वमपि द्विगुणं पालेन कारिते द्विगुणो दण्ड इति स्मृत्यंतरदर्शनात्॥

सू० पथि क्षेत्रेऽनावृते पालक्षेत्रिकयोः॥

(पालस्यायत्नकरणात्) पालस्य यत्नकारिता दितरस्यापि वृत्तेरकरणात् अर्धार्धं तौ दद्यातामित्यर्थः॥

इदानीं पशुविशेषापेक्षया दण्डविशेषमाह—

सू० पञ्चमाषा गवि॥

माषः कार्षापणस्य विंशतिभागः।

395
396 यथाद्दोशनाः ——————

"माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु ।

काकिणीतु चतुर्भागो माषस्यैव प्रकीर्तितः"॥

इति ॥ पञ्चमाषो गव्यपराधे दण्डः ॥

सू॰ षडुष्ट्रखरे ॥

उष्ट्रापराधे खरापराधे च प्रत्येकं षण्माषो-

दण्डः ॥

सू॰ अश्वमहिष्योर्दश ॥

अत्रापि प्रत्येकं दशमाषो दण्डः ॥

सू॰ अजाविषु द्वौ द्वौ ॥

बहुवचनमपि वत्सनिवृत्यर्थम् । तत्पूर्वत्रा-

पि द्रष्टव्यम् । द्वौ द्वौ माषौ दण्डः । अन्ते वीप्सा-

भिधानं पूर्वेष्वनुषंगार्थम्, (इतरथा संदेहस्या- ( ) omitted

दिति) संदेहनिवृत्यर्थम् ॥

सू॰ सर्वविनाशे शदः ॥

सर्वविनाशे प्ररोहासामर्थ्ये यावद्विनाशितं ताव-

396 निष्पत्तिमवेक्ष्य क्षेत्रस्वामिने शदः फलं देयम्॥

? राजाज्ञानुरूपो दण्डः॥

सू० शिक्षाकरणे प्रतिषिद्धसेवयोश्च नित्यं चेल-

397 पिण्डादूर्ध्वं स्वहरणम्॥

नित्यं शिक्षाकरणे नित्यं विहितस्याननुष्ठाने, न सकृत्, प्रतिषिद्धस्याभक्ष्यभक्षणादेरासेवने, न प्रमादात्, चेलपिण्डात् भक्ताच्छादनमात्रात् यदन्यत् तस्यापहारः कर्तव्यः। भक्ताच्छादनमपि यावदन्यस्य ~~स्य~~ द्रष्टव्यस्यागमनकालः तावदस्य मोक्तव्यम्। ततोपि यद्यतिक्रामति पुनरस्यापहर्तव्यमेवेति। एवं कृते दण्डभयात् स्वधर्म एव वर्तत इति। चकारात् प्रायश्चित्तं च कारयितव्यम्॥

ब्रह्मचारिप्रकरणे उक्तस्य अदत्तदानप्रतिषेधस्य इदानीमपवादमाह———

सू० गोऽग्न्यर्थे तृणमेधान्वीरुद्वनस्पतीनां च-

397 पुष्पाणि स्ववृक्षादहीत फलानि चापरिवृतानाम्॥
गवार्थे तृणानि। अग्निग्रहणेन श्रौतस्य
398 स्मार्तस्यापि ग्रहणं न लौकिकस्य, तदर्थम्-
धान् काष्ठानि। वीरुधां करवीरादीनां वनस्प-
तीनां पुष्पाणि। वनस्पति शब्दोऽत्र वृक्ष-
पर्याय:। साक्षाद्वनस्पतीनां पुष्पासंभवात्। तथा-
च मनुः—
"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः॥"
? इति। पुष्पाणि देवार्चनानुभवार्थम्। गोऽग्निसाह
चर्यात्। चकारात् पात्राणि ब्राह्मणभोजनार्थ-
नि। वीरुद्वनस्पति इति पुष्पाणि चेति वक्तव्ये-
औषधार्थे मूलादेरपि ग्रहणार्थम् मरमा-
तः। स्ववत् यथा तेषां पीडा नभवति तथा
च गृहीतव्यमिति। यथाह व्यासः—
"पक्वं पक्वं विचिन्वीत मूलच्छेदं तु वर्जयेत्।
मालाकार इवारामे न यथाऽङ्गारकारकः॥"

३९८ इति। फलानि चाम्रफलादीनि। आपत्सूचनार्थं
३९९ पृथगभिधानम्। चकाराच्छाकं च। अपरिवृ-
तानां अनारामीकृतानाम्। उभयविशेषणं चे-
दम्। एवं चारामे तृणादेरपि प्रतिषेधः
सिद्धः॥

इदानीं न्यायेनापि परद्रव्यादानं स्तेयमे-
वेति तत्परिहारार्थमिदमारभ्यते ———

सू० कुसीदवृद्धिर्धर्म्या विंशतिः पञ्चमाषि-
की मासम्॥

कुसीदं उपचयार्थो द्रव्यप्रयोगः। तत्र वृद्धिः
उपचयः। धर्म्या, धर्मादनपेता। यदा विंशतिः
कार्षापणानां मासं प्रयुक्ता भवंति तदा
तस्याः प्रतिमासं संपद्यते ~~पंच परिमाण माषाः~~
पंचमाषपरिमाणा वृद्धिः भवति, प्रतिमासं
निष्कस्य अर्ध कुण्ड (गुञ्जा) मात्रा वृद्धिः
भवति। माषशब्देन व्रीहि परिचितं वस्तु

399 अभिधीयते। ऽयं च मनुनोक्तस्याशीतिभागस्य
ग्रहणं संपद्यते। यथाह मनुः —
"वसिष्ठविहितां वृद्धिं सृजेत वित्तविवर्धिनीम्।
400 अशीतिभागं गृह्णीयात् मासाद्वार्धुषिकः शतम्॥"
इति। वसिष्ठविहितां "कामं वा परिलुप्तकृ-
त्याय पापीयसे दद्यातम्" इति सुवर्ण
कार्षापणपक्षे चतुष्षष्टिभागो भवति —
'ते सुवर्णं तु षोडश' इति॥
सू॰ नाति संवत्सरमेके॥ (सांवत्सरीम्)
मासवृद्धिमतिक्रम्य संवत्सरवृद्धिः न-
ग्राह्येत्येके मन्यंते। ऽतदुक्तं भवति —
मासि मासि यत्परिगृहीतव्यं तत्सर्वं संभूय संवत्सरे
परिपूर्ण एव गृह्णामीत्येवं मत्वा प्रतिसंवत्सरं न-
गृहीतव्यमिति। संवत्सरप्रतिषेधात् प्रतिमासं प्रति-
षण्मासं च अभ्यनुज्ञातं भवति। ततश्च मासिमा-
सि षण्मासे वा गृहीतव्यम्। न प्रतिसंवत्सर-

400 मित्येकेषां भवितव्यम् । प्रतिमासवृद्धि
401 ग्रहणे चैतद्द्रष्टव्यम् । यावद्धनसंव्यवहारः
तावद्ग्राह्या इति गौतमः । तद्विच्छेदे तु "नातिसं-
वत्सर" मित्येवं व्यवस्थित विभागो (विकल्पो) द्रष्टव्यः ॥

सू० चिरस्थाने द्वैगुण्यं प्रयोगस्य ॥

चिरस्थानेऽगृहीतायां वृद्धौ तया वृद्ध्या
यावता कालेन द्विगुणं भवति ततः परं न
वर्धते । प्रयोगग्रहणं प्रयोगान्तरे द्वैगुण्यव्य
तिक्रमार्थम् । यथाह मनुः —
"कुसीदवृद्धिः द्वैगुण्यं नात्येति सकृदाहिता" ॥
इति । हिरण्यस्यैव द्विगुणानतिक्रमणमिति ज्ञाप-
नार्थं स्थानग्रहणम् । एवं च धान्यादयः द्विगु-
णमतिक्रम्य वर्धन्ते एवेति । तथा च वसिष्ठः —
"द्विगुणं हिरण्यं धान्यं त्रिगुणं धान्येनैव रसाः
व्याख्याताः, पुष्पमूलफलानि च, तुलाधृतमष्टगु-
402 णम्" इति । एवं च ब्रुवतः कुसीदवृद्धिः धर्म्ये

402. तिजोक्ता वृद्धिः तस्य सार्वत्रिकत्वं प्रदर्शितं
भवति । अन्यथा प्रसंगाभावात् हिरण्यस्यैव सिद्धत्वात् तदर्थं स्नानग्रहणमनर्थकमिति । ततश्च सर्वत्राशीति भागो द्रष्टव्यः । चिरग्रहणं संवत्सर सहस्रैरपि न वर्धत इति ॥

सू॰ भुक्ताधिर्न वर्धते ॥

भोगेएव तत्र वृद्धिः भवति इति ॥

किंच —

सू॰ दित्सतोऽवरुद्धस्य च ॥,

दातुमिच्छतो धनिने यदि स धनी वृद्धिलोभात् व्याजेन न गृह्णाति ततोपि न वर्धते । यो दातुमिच्छति तेनापि साक्षिमल्लाच्छुना न कृता ! अनभिज्ञत्वात् वृद्धिव्यापारस्य । एवमवरुद्धस्य च निस्वो भूत्वा देशान्तरगतस्येत्यर्थः । चकारः पूर्वविशेषणशंका माभूदिति । तद्दिवसादारभ्येति द्रष्टव्यम् । केचित् राज्ञा निग-

402. लब्धमाहुः, तत्र भूमिदेवाः प्रमाणम् ॥

इदानीमापदि स्वयं कृता वृद्धिप्रकारा-
अप्यभ्यनुज्ञायन्ते —

403 सू. चक्रकालवृद्धिः ॥

वृद्धिशब्दः प्रत्येकमभिसंबध्यते — चक्र-
वृद्धिः, वृद्धिरपि पुनर्वर्ध्यते यस्मिन् द्रव्य-
प्रयोगे सा चक्रवृद्धिः । तथा च नारदः —
"वृद्धेरपि पुनर्वृद्धिः चक्रवृद्धिरुदाहृता" ।
इति । कालवृद्धिरपि अस्मात्कालात् प्राक्केव-
लं वा प्रकृतवृद्ध्या वा मम दातव्यम् ।
यदि न ददासि ततः तस्मादूर्ध्वं त्रिगुणं वा
चतुर्गुणं वा मम दातव्यमिति समयं कृत्वा -
यस्मिन् बह्वी वृद्धिः गृह्यते सा कालवृद्धिः ।
प्रकृतलब्धमपि वृद्धिग्रहणं क्रियते स्वयंकृ- ~~वृद्धेर्विषये~~
ताया ऽवेयं कल्पना न पञ्चमाषपरिमिताया वृद्धेर्विषये
इति । सहनिर्देशः ऽकया जीवनासंभवे

403 द्वाभ्यामपि जीवने न दोषः इति ॥

ननु च "कुसीदवृद्धिः धर्म्या विंशतिः पंच-
404 माषिकी मासम्" इत्यत्रैव वक्तव्यम् । अत्रै-
व पृथगुपदेशात् आपदर्थत्वं ज्ञायते ।
"नाति संवत्सरमि"त्येतदपि "व्याख्यानतो विशे-
ष प्रतिपत्तिरिति न्यायेन व्याख्यानतः एव
पंचमाषपरिमितवृद्धिविषय इति ज्ञायते ज्ञातुं
शक्यत इति अतः पृथगुपदेशः अनर्थकः इति ॥
अत्रोच्यते कुसीदस्य स्वयं करण पक्षे
आपद्यनापदि वा स्वयं कृत पक्षे चानापदि
पंचमाषपरिमितादेव गृह्णीयात्, अस्वयं-
कृतपक्षे आपदि चक्रादि वृद्धिमपि, इत्यनेना-
भिप्रायेणात्र उपदेश इति । नातिसंवत्सरमिति-
अस्यापि विस्पष्टीकरणार्थं तत्रोपदेश इति ॥
? सू. कारिका (ता) कायिका शिखाधिभोगाश्च ॥
405 कारिका शास्त्रानपेक्षया यस्मिन्नात्मनैव-

405 क्रियते प्रतिसंवत्सरं निष्कस्य तत्पादमर्धं
वा देयमित्येवमादिः सा कारिता वृद्धिः ।
कायिका। अभ्युपगतायाः वृद्धेः अधिकं दिव-
से दिवसे मासिमासि संवत्सरे वा यस्मिन् गृ-
ह्यते सा कायिका। यथाह नारदः —
पणवाद्याधिकेति धिका ?
काया विरोधिनी शश्वत् [पणपादाधिकाधिका ॥]
इति। शिखा, धान्यस्य, यथा चतुर्णां प्रस्था
नां पंचम इत्यादि। अधिभोगः, वृद्ध्यर्थं
अहरहर्यस्मिन् घृतादि गृह्यते सा अधि
भोगवृद्धिः। वृद्धिशब्दाकर्षणार्थे श्चकारः।
गौरवप्रदर्शनार्थः पृथगुपदेशः ॥
सू० कुसीदं पशूपजलोमक्षेत्रशदवाह्येषु -
[नाति पंचगुणम् ॥
अधिकृतमपि कुसीदग्रहणं क्रियते अन्य-
406 स्योऽयं प्रयोग इति ज्ञापनार्थम्। पशूपजं
घृतादि तत् कृत्वाऽमुष्मिन् काले मूल्यं दातव्यं,

406 तस्मिन्नदीयमानं वर्धत इति यत् परिभाषितमि
त्यभिप्रायः। वत्सस्य ग्रहणं माभूदिति उपका
रक प्रयोगः। लोम, ऊर्णादि, प्रकृतिग्रहणेन
विकाराणामपि ग्रहणं द्रष्टव्यम्। तस्यापि
विक्रय मूलस्यादीयमानस्यैव। क्षेत्र, शादः क्षेत्रे
यदा परिमितेन धान्येन प्रयुज्यते अस्मिन्
काले अस्य शुल्कमदीयमानं वर्धत इति।
बाह्यं प्रापणनिमित्तं - यथा बलीवर्दादिभिः
कस्य चित् धान्यं प्रापयति (प्रापयति) अमुष्मिन् काले
अस्य शुल्कमदीयमानं वर्धत इति। एतेषु
यत्कुसीदं उपरि संवृद्धिकं द्रष्टव्यम्। तत्पंच
गुणत्वं नातिवर्तते। पशूपजग्रहणेनैव सिद्धस्य
लोम्नः पुनर्ग्रहणं मयूरपत्रकृतानामपि
ग्रहणार्थम्। "पक्षिणां पत्ररोमाणां अग्ने
क्लृप्ति मया श्रुतम्" इति श्रुतिदर्शनात्। चि-
407 रस्थाने द्वैगुण्यं प्रयोगस्येति अत्रैव वक्तव्यम्।

407 इति चेन्नैष दोषः। ऽपांत्व काम चक्र वृद्धि
प्रयोगाभावज्ञापनार्थ इहोपदेशः। इति।
पंचगुणमित्यनेनैवसिद्धे नातिग्रहणं प्रयोगां-
तरेऽतिक्रमणसूचनार्थम्॥

इदानीमन्योऽन्यव्यवहार उच्यते ——

सू॰ अजडापोगण्डधनं दशावर्षाभुक्तं —
परैः संनिधौ भोक्तुः॥

? जडः उन्मुग्धचित्तः स न व्यवहारयोग्यः।
पोगण्डः अप्राप्तव्यवहारः। तौ मुक्त्वा यद-
न्यस्य धनं परैः असंबंधैः तत्सम क्षं स्वामि-
न्येव ग्रामस्थाव इत्यर्थः। यत् भुज्यते तद्द-
शावर्षभोगेन भोक्तुरेव भवति। नहि सति
स्वामित्वे इयन्तं कालं उपेक्षा उपपद्यत
408 इति अभिप्रायः। जडबालधनं तु नापि-
ह्रियते। तद्ग्रहणं आध्यादीनामुपलक्ष
णम्। यथाह नारदः ——

408 "आधिस्सीमा बालधनं निक्षेपोपनिधिः स्त्रियः।
राजस्वं श्रोत्रियस्वं च नोपभोगेन जीर्यते"॥
इति॥ अत्र बालधनं कथं न परिगणित-
मिति चेत् विंशति वर्षेणापि जीर्णत्वं माभूदि-
ति। यथाह नारदः ——
"प्रत्यक्षपरिभोगाच्च स्वामिनो द्विदशाः समाः।
आध्याद्योपि जीर्येयुः स्त्रीनरेन्द्रधनादृते"॥
इति। एवं च विंशति वर्षात् बालधनं न जीर्य-
त्येव। सन्निधावित्यनेनैव परेषामर्थसिद्ध-
त्वात् परग्रहणं संबंधिभुक्तस्यानतिभोग-
ज्ञापनार्थम्। सन्निधिग्रहणादन्यग्राम-
स्थस्य न दोषः॥
अस्यापवादं भोक्तृविशेषेणाह ——
सू० न. श्रोत्रियप्रव्रजितराजन्यपुरुषैः॥
श्रोत्रियादिभिः भुज्यमानं नापह्रियते। उपेक्षाका-
409 रणोपपत्तेः श्रोत्रियप्रव्रजितौ धर्मबुद्ध्या उपेक्ष-

409 ते राजन्यपुरुषभये नेति । प्रव्रजितस्य कथमुप-
(गृहस्थस्य)
पद्यत इति चेत् अत्रोच्यते कस्यचित् गृहस्थस्य(शू-
? न्यत्वेन) शूद्रत्वेन स्थितस्य ~~प्रव्र~~ प्रव्रजितस्य
शून्यगृहवसनोपदेशादुपपद्यत एवेति ॥
अधुना भुज्यमानद्रव्यविशेषेणापवादमाह—
सू॰ पशुभूमिस्त्रीणामनतिभोगः ॥
पशुशब्देन सर्वे चतुष्पादा याज्ञिया: गृह्यंते । चतु-
ष्पादा ये पशव: ये याज्ञिया: इति श्रुतिदर्श-
नात् । भूमि: क्षेत्रारामादि न गृहं, "दशवर्षा-
द्वे श्मस्व: भोक्तु: न भूमि:" इत्यौशनसवचना-
त् । स्त्रिय: परिचारिका: । एषामनतिभो-
410 ग: दशवर्षानुभवेन न स्वाम्यं भवतीत्य-
र्थ: । तथाच नारद: ——
"अनागतं तु यद् भुक्तं वत्सराणां शतैरपि" ।
इति । इदमपि वचनं पशुभूमिस्त्रीविषयत्वे-
न व्याख्यातमिति ॥

410 सू- रिक्थभाजः ऋणं प्रतिकुर्युः ॥
यस्य येन धनं भजन्ति गृह्णन्ति त एव तदृणं
दद्युरित्यभिप्रायः, न दायमात्रेण। पुत्रस्त्रीहारिणाम
अपि ग्रहणार्थं बहुवचनम्। यथाह नारदः —
"धनिस्त्रीहारि ~~विप्राणाम~~ पुत्राणां ऋणभाग्यो धनं हरेत्।
पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोः" ॥
इति। एवं च रिक्थभाक्त्वे सत्यसति च पुत्रेणा-
वश्यं दातव्यम्। स्त्रीहारिणा च। अन्यैस्तु
रिक्थभाग्भिरेव। पुत्राणां च मध्ये येषां रिक्थ-
भाक्त्वं ऋणभाक्त्वं च विद्यते त एव तद्ऋणं
दद्युः न पुत्रमात्रेणेति द्रष्टव्यम् ॥
इदानीं पुत्रं प्रत्यपवादमाह —
सू॰ प्रातिभाव्यवणिक्शुल्कमद्यद्यूतदण्डा-
न पुत्रा नध्याभवेयुः ॥
प्रतिभुवः स्त्रियः ~~प्रति~~ यथाह व्यासः —
411 "पादवर्शी च विश्वास्यः द्यर्थदश्चेति कीर्तिताः" ॥

411 इति । अत्र दान प्रतिभुवमुक्त्वा इतरयोः ग्रहणम् ।
कुतः ? "दान प्रतिभुवि प्रेते दायादानपि दापयेत्"
इति मनुवचनात् । प्रतिभूनिमित्तं यदृणं तत्-
प्रातिभाव्यम् । वणिग्वाणिज्यनिमित्तं चे-
त्यर्थः । यथा सत्लाभार्थं ददामीति परिभाष्य-
कस्यचित्सकाशात् द्रव्यं गृहीत्वा वाणिज्य-
करणार्थं देशान्तरं गत्वा म्रियते, पुत्रेण
तन्नप्राप्तं च भवति ततः तदृणं पुत्रोपरि न भवतीत्य-
भिप्रायः । शुल्कमासुरादिविवाहे शुल्कं
प्रतिश्रुत्य विवाहं कृत्वा यद्यसौ म्रियते,
412 तच्छुल्कं पुत्रस्योपरि न भवतीति । मद्यं
मद्यनिमित्तं ब्राह्मणस्य प्रतिषिद्धत्वात् क्षत्रि-
यादिविषयमेतद् द्रष्टव्यम् । ददामीति मद्यपाने-
कृते तद् द्रव्यमदत्वाऽसौ म्रियते तदपि पुत्रस्य
न भवति इति । तथान्न द्यूत निमित्तं च ऋणम् ।
तथा दण्डश्च व्यवहारापजयनिमित्तः । एते पुत्रा-

412 ज्ञाध्याभवेयुः पुत्राणामुपरि नभवतीत्यर्थः।
रिक्थभाक्त्वेपिसतीति द्रष्टव्यम् ॥

सू॰ निध्यन्वाधियाचितावक्रीताधयो नष्टाः
सर्वानिन्दितान पुरुषापराधेन ॥

निधिः निक्षेपः, अन्वाधिः उपनिधिः, याचितं
उत्सवादिषु याचित्वानीतं आभरणादि, अवक्री
तं अदत्तमूल्यं, अर्धदत्तमूल्यं वा, आधिः गोप्या-
धिः कांस्यादिरित्यर्थः, एते चोराग्निदाहादि
413 ना नष्टास्सन्तः न केवलं पुत्रानेव नाध्याभवे
युः, किन्तर्हि? येषां सकाशे निक्षेपादयः कृताः तान-
पि, सर्वग्रहणात्। अनिन्दितान प्रमादकारिणइत्य-
र्थः। अपुरुषापराधेन यदि नश्यंति, पुरुषापरा
धः पुरुषप्रमादः आलस्यादिः। एवं च निं-
दितैः प्रमादकारिभिः नष्टं दातव्यमेवेति॥

यदि चैषां पुत्रादीनां पित्र्यमृणं न प्रतिकुर्यात्
कश्चित्, ततः स्तेनो भवतीति, अष्टापार्यं स्तेयकिल्बि-

413 "मिति दण्डश्च विहितइत्यनेनैव प्रयोगेन हिरण्य-
स्तेयस्यापि दण्डउच्यते ।——

सू. स्तेनः प्रकीर्णकेशो मुसलीराजान-
मीयात् कर्माचक्षाणः ॥
पूतो वधमोक्षाभ्याम् ॥

414 स्तेनः स्वर्णस्तेनः, अन्यद्रव्यापहारेतु "अष्टा-
पाद्यं" इत्युक्तत्वात् स्मृत्यन्तर दर्शनाच्च—
"सुवर्णस्तेय कृद्विप्रो राजानमभिगम्यतु।
स्वकर्मख्यापयन् ब्रूयात् मांभवाननुशास्त्विति"।
दण्ड प्रकरणे गमनोपदेशः प्रायश्चित्तार्थः।
तथाच मनुः——
"राजभिः कृत दण्डास्तु कृत्वा पापानि मानवाः।
निर्मलाः स्वर्गमायांति सन्तः सुकृतिनो यथा ॥"
इति ॥ स्तेये कृते स्तेनो भवति इति। स्तेयः-
परस्वापहारः। बुद्धिपूर्वविषयऽवेदम्।
अबुद्धिपूर्व(विषये) स्तेयंनोपपद्यते इति।

414 महत्यपहृते स्वल्पे च द्रष्टव्यम्, विशेषानारम्भा-
त्। प्रकीर्णकेशो मुक्तकेशः, मृतसममात्मानं
415 मन्यमानः। मुसली, स्ववधसाधनमुसलहस्तः
राजानं गच्छेत्। कर्म च कथयेत्, तस्करोऽह-
मिति। ततः पूतो भवति। वधात्, मरणात् मोक्षा-
द्वा। वधः ताडनम्, तदपि सकृदेव, स्मृत्यन्तर-
दर्शनात् ———
“गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम्”॥
इति। तत्र राज्ञा यदि निस्संगेन ताडितः
न म्रियते ततोऽपि पूत एव भवतीति द्रष्टव्यम्।
अब्राह्मणविषयञ्चेदं ताडनम्, “न शारीरो ब्राह्म-
णदण्डः” इति वक्ष्यमाणत्वात्। तथाह मनुः—
“वधेन शुध्यति स्तेनो ब्राह्मणः तपसैव वा”॥
इति॥ अत्रैवकारात् (ब्राह्मणः तपसैवेति)
ब्राह्मणस्य तप एव वेति भाष्यकृता व्याख्या-
तम्। ततश्चाब्राह्मणस्य ताडनमिति द्रष्टव्यम्।

415 इति तत्रापि ब्राह्मणस्य स्वयंगमनपक्षे मोक्षः।

416 यस्तु बलादानीयते तस्य तपश्च मोक्षश्च द्रष्ट-
व्यम्। एवं ~~सत्र~~ सर्वत्र स्वयं गमनपक्षे दण्ड-
एव बलादानयनपक्षे दण्डश्च प्रायश्चित्तं च
द्रष्टव्यम्। तपस्तु श्रोत्रियब्राह्मणस्य सांतप-
नं ~~तपस्तु श्रो~~ द्रष्टव्यम्। अश्रोत्रिय ब्रा-
ह्मण(स्य सुवर्णहरणं चेत्) स्वर्णहरणे च—
"चरेत् सांतपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धये"।
इति मनुवचनात्। तन्निर्यात्येति सर्वस्तेय-
शेषत्वेन द्रष्टव्यम्। श्रोत्रियस्यापस्तंबो-
क्तं द्रष्टव्यम्। "स्तेयं कृत्वा सुरां पीत्वा गुरु-
? दारांश्च गत्वा ब्रह्महत्यां कृत्वा। चतुर्थकाला-
मितभोजिनः स्युः" इत्यादि। कथं श्रोत्रियस्य गौर-
वमिति चेत्? विदुषोऽतिक्रमे दण्डभूयस्त्वमित्युक्त-
त्वात्। श्रोत्रियब्राह्मणस्वर्णहरणेऽश्रोत्रियस्य चै-
तदेव श्रोत्रियस्य षड्वार्षिकं द्रष्टव्यम्।

षड्वार्षिकं

417 तथाचाहोशना ——— 'स्वर्णस्तेयकृत् षड्वर्षं-
ब्राह्मणो व्रतं चरेत्' इति । क्षत्रियस्यापि यदा-
प्रायश्चित्तं समुन्नीयते ~~यदा~~ तदा अश्रोत्रिय ~~स्वर्ण~~-
स्वर्णहरणे श्रोत्रियस्य भार्गवीयं द्रष्टव्यम् ।—
श्रोत्रिय स्वं
"ब्राह्मणस्वं हरेद्यस्तु चरेच्चान्द्रायणादिकम्" ॥
इति ॥ अश्रोत्रियस्य पूर्वोक्तमेवौशनसं द्रष्टव्यम् ।
"श्रोत्रियस्वहरणे त्वेतदेव द्विगुणं चरेद्" इति ‡ कण्व-
वचनात् वैश्यस्यापि क्षत्रियवद् द्रष्टव्यम् ।
"वैश्यस्य क्षत्रियवच्चोरदण्डः" इति औशनस
वचनात् । श्रोत्रियस्वहरणे ——
"तपसापनुनुत्सुस्तु सुवर्णस्तेयजं मलम् ।
चीरवासा द्विजोऽरण्ये चरेत् ब्रह्महणो व्रतम्" ॥
418 इति ॥ मनूक्तं वा द्रष्टव्यम् । शूद्रस्य प्रायश्चित्तं-
सर्वत्र "निष्कालको वा घृताक्तो ~~वा~~ गोमयाग्निना
(ऽऽपादात्) पादात्प्रभृति आत्मानमवदाहयेत्"
इति वसिष्ठोक्तं द्रष्टव्यम् । अपहृतद्रव्यवशात्

418 इति प्रायश्चित्तस्य गुरुलघुभावः कल्प्यः। कुतः?

"यथा परिमेयानां शताद्भ्यधिके वधः" इति-
लिंगात्। कार्षापणशतमूल्याधिकऽएव राज्ञा-
ताडनं, इतरत्र तु सर्वत्र मोक्षऽएव द्रष्टव्यः।
कार्षापणशतमूल्यादधिकऽएव समस्तप्राय-
श्चित्त प्रवेशः। अर्धेऽर्धं पादे पादम् इति-
द्रष्टव्यम्। 'शूद्रस्य वैश्यवत्कल्प्यम्', 'अन्यून-
भावे वैश्यवच्छूद्रस्य कल्प्यम्' इति शंख-
लिखितवचनात्॥

419 सू० अघ्नन्नेनस्वी राजा॥

दयादियोगादघ्नन्नेनस्वी राजा भवति। चोरस्य-
यत्पापं तत् तस्य भवतीत्यर्थः। तथाच स्मृत्य-
न्तरम्——"स्तेनस्याप्नोति किल्बिषम्"
इति। यथा वधार्हस्यावधे दोषः, एवं
मोक्षार्हस्यामोक्षे (दोषो) द्रष्टव्यम्। तथाच-
वसिष्ठः—"एनो राजानमृच्छति उत्सृजन्तं-

419 सकिल्बिषम् इति ॥

सू० न शारीरो ब्राह्मणदण्डः ॥

स्वयमुपस्थितस्यापि शारीरो दण्डः वधः ब्राह्मणस्य नास्ति तस्मान्न कर्तव्यम्।

ननु च कर्मवियोगादिदण्डान्तर विधानादेव शारीरस्य निवृत्तिः प्राप्नोति। उच्यते सत्यं, एवमारम्भः अन्यत्राप्यपराधे ब्राह्मणस्य शारीरदण्ड-

420 प्रतिषेधार्थ इति ॥

तर्हि कथमसौ शास्य इत्यत आह——

सू० कर्मवियोगविख्यापनविवासनांककरणानि ॥

यथा पुनः तत् कर्म न करोति तथा कर्तव्यमित्यर्थः। विख्यापनं, चौर्यचिह्नेन सर्वतः परिभ्रमणकरणम्। विवासनं, निर्विषयीकरणम्। अंकनं चिह्नकरणम्। यथाह मनुः——

"गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः।
स्तेये तु श्वपदं कार्यं ब्रह्मण्यशिराः पुमान्॥"

420 इति ॥

एवमभ्यासाद्यपेक्षया यथार्हो दण्डो द्रष्टव्यः ॥

सू० अवृत्तौ प्रायश्चित्ती सः ॥

अचोरे एवं कृते स राजा प्रायश्चित्ती भवति।

421 प्रायश्चित्तं तु स्मृत्यन्तरोक्तं द्रष्टव्यम्। यथा-हवसिष्ठः — "दण्ड्योत्सर्गे राजा एकरात्रमुपवसेत् त्रिरात्रं पुरोहितः कृच्छ्रमदण्ड्य दण्डने पुरोहितः त्रिरात्रं राजा च" इति ॥

सू०. चोरसमः सचिवो मतिपूर्वे ॥.

चोरस्य सचिवः सहायः बुद्धिपूर्वं प्रतिश्रया-न्नादि दानेन स चोरवन्निग्राह्यः। एवं च अबुद्धि पूर्वे न दोषः ॥

सू०. प्रतिगृहीताऽप्यधर्मसंयुक्ते ॥.

मति पूर्वे इति वर्तते। प्रतिगृहीताप्यधर्म सं-युक्ते स्तेन प्रकृतत्वादेव सिद्धे अधर्मसंयुक्तः यो यत्-पापं करोति तस्य सकाशे मति पूर्वं प्रतिगृहीता

421 एव तावद्भवतीति ज्ञापनार्थम्। यथा अवकीर्णिसकाशे प्रतिग्रहीतुरवकीर्णिप्रायश्चित्तं इत्यादि। अबुद्धिपूर्वं तु लघुतरं कल्प्यम्॥

422 सू॰ पुरुषशक्त्यपराधानुबंधविज्ञानाद्दण्डनियोगः॥

पुरुषविज्ञानात् जात्यादि ज्ञात्वेत्यर्थः। शक्तिः ~~शक्ति~~: दुर्बलादि, अपराधः साहसभाषणादिः। (सहारं ?)

यथाह वसिष्ठः— "स्तेनोऽनुप्रवेशोऽग्निपुष्य (दुष्यते)

ते शस्त्रधारी सहोढो व्रणसंपन्नश्च व्यपदिष्टस्तेकेषाम्" इति। अनुबंधः अभ्यासः (अध्यवसायः) एतानवधार्य यथार्हदण्डं ?

कर्तव्यम्। ?

सू॰ अनुज्ञानं वा वेदवित्समवायवचनाद्वेदवि-

[समवायवचनात्॥

मोक्षो वा कर्तव्यः। वेदविदां संघातवचनात्। ~~स~~ संघः चतुर्णां त्रयाणां वा। यथाह मनुः—

"चत्वारो वा त्रयो वापि यं ब्रूयुः वेदपारगाः।

422 सव्यर्न इति विज्ञेयो नेतरेषां सहस्रशः" ॥

इति। वक्ष्यमाण दशावर पुरुषानुज्ञया (परि-
दनुज्ञया) ऽपवं च स्वयं करणे दोषो
द्रष्टव्यः॥ . ओम् ॥.

इति श्री मस्करीये
गौतम भाष्ये
॥द्वादशोऽध्यायः॥

—

ओम्- अथ त्रयोदशोऽध्यायः

—

वाक्पारुष्ये संप्रतिपत्तौ दण्ड उक्तः। यदा तु
विप्रतिपद्यंते तदा कथमित्यत आह—
सू॰ विप्रतिपत्तौ साक्षिनिमित्ता सत्यव्यवस्था॥
विप्रतिपत्तिः नाना विधा प्रतिपत्तिः ‡ अर्थि प्र-
त्यर्थिनोः, तस्यां सत्यां साक्षिहेतुका सत्यव्य-
वस्था। साक्षिणः पञ्च प्रकाराः। यथाह

423 नारदः ——

"लेखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च ।

424 गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः स्मृतः"॥

इति ।

तान् विचार्य तत्त्वावबोध इत्यर्थः । साक्षिनि-
मित्तं सत्यमिति वक्तव्ये व्यवस्थाग्रहणं साक्षिणां-
विप्रतिपत्तौ बहूनां वचनं प्रमाणम् । तत्रापि-
संदेहे ~~विद्व~~ विद्वद्वचनं प्रमाणम् । तत्रापि-
संदेहे तैरेव ~~शपथ~~ शपथपूर्वं प्रतिपादयित-
व्य इत्येवमर्थः ।

ते पुनः कियन्तः किं लक्षणा इत्यत आह——

सू॰ बहवः स्युरनिन्दिताः स्वकर्मसु प्रात्ययिका राज्ञाम् ॥

त्र्यवरास्स्युरित्यर्थः । यथाह मनुः ——

"त्र्यवरैः साक्षिभिः भाव्यो नृपब्राह्मणसंनिधौ"॥

इति । स्युर्ग्रहणं संदेहव्यावृत्त्यर्थम् । अनिन्दिताः
स्वकर्मसु विहितानुष्ठायिन इत्यर्थः । स्व-

424 ग्रहणात् धनपुत्रावपि। यथाह मनुः—

"गृहिणः पुत्रिणो मौल्याः"— इत्यादि।

स्वकर्मस्विति बहुवचनं आपद्विहितस्यापि उप-

संग्रहार्थम्। प्रात्ययिकाः राज्ञां प्रत्ययेन-

425 ये चरन्ति ते प्रात्ययिकाः। राज्ञां बहुषु कर्मसु

परीक्षिताः सर्वत्राप्रमत्ता ~~एवेति~~ एते आ-

प्ता एवेति निश्चिता इत्यर्थः। राज्ञामिति —

बहुवचनात् राजनियुक्तानां सभ्यादीनाम-

पि॥ ~~सू०~~ "निष्प्रीत्यजमिता। पार्श्वाऽन्यतस्मिन्॥? हिताश्च नतारिनद्धा:॥?

सू० निष्प्रीत्यभितापाश्चान्यतरस्मिन्॥

~~निष्प्रीतितया। निष्प्रीतयो, निरभितापाश्च,~~

निष्प्रीतयोऽनभितापाश्च। 425 नकृतस्नेहाः नशत्रवश्चेत्यर्थः। चकाराद्ना-

र्थसंबंधिनोः नाप्ता नसहाया न वैरिणः इत्या

दि) तथाच मनुः—

"नार्थसंबंधिनो नाप्ता नसहाया न वैरिणः"॥

इत्यादि। अन्यतरस्मिन्नर्थिनि प्रत्यर्थिनि वा

425 इत्यर्थः॥.

सू॰ अपि शूद्राः॥.

एवं विधाः शूद्रा अपि। किं पुनः द्विजातय इति। एवं च गुणवद्द्विजाद्यभावे, एवं विधाः शूद्राः अपि भवंतीति द्रष्टव्यम्॥.

सू॰ ब्राह्मणस्याब्राह्मणवचनादनवरोध्यो निबन्धश्चेत्॥

426. अब्राह्मणः क्षत्रियादिः। अब्राह्मणग्रहणादेव सिद्धे ब्राह्मणग्रहणं श्रोत्रियपरिग्रहणार्थम्। इतरो ग्राह्य एवेति। तु शब्दो ऽन्येप्येवं लिंगिनो न ग्राह्याः। विशेषेण ब्राह्मणा इति। अब्राह्मणवचनादनवरोध्यः न ग्राह्यः। अस्य वृत्तान्तस्य असौ ब्राह्मणः साक्षी इत्यब्राह्मणेनोक्ते राज्ञाऽसौ साक्षित्वेन ग्राह्य इत्यर्थः। अनिबंधश्चेत् ब्राह्मणः पत्रके नारोपितश्चेत्। आरोपितो भवत्येव इत्यभिप्रायः॥

426 ? सू० नासमवेताः अपृष्टाः प्रब्रूयुः ॥

असमुदिताः तावत्ते समुदिता अपि राज्ञा प्राड्विवाकेन वा अपृष्टा न ब्रूयुः। आप्रश्नात् तस्या व्यापारं प्रति मौनिन एव भवेयुः इति प्रशब्दोपादानम् ॥

427 किञ्च —

सू० अवचने च दोषिणः स्युः ॥

? प्रश्नकालेप्यवचने अन्यथावचने च दोषिणः स्युः दण्डभाजः स्युः। तथाच मनुः —

"सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम्।
अब्रुवन् विब्रुवन् वापि नरो भवति किल्बिषी"॥

इति। तस्मात् तथ्यमेव वक्तव्यमित्यभिप्रायः॥

न केवलं तथ्यवचने दण्डाभावमात्रं, विपर्यये च दण्डभाक्त्वमेव भवति। किंतर्हि ?

सू० स्वर्गः सत्यवचने विपर्यये नरकः॥

सत्यवचननिमित्ताद्धर्मात् स्वर्गश्च भवति -

427 विपर्यये अनृतवचननिमित्ताद्धर्मान्नरक

428 श्च भवति। वचनग्रहणं साक्षिणामेतत् फलं, नतु व्यवस्थाहेतोर्नृपस्येति॥

इदानीं यत्र पञ्च प्रकारा अपि साक्षिणो न सन्ति तत्र कथमित्यत आह —

सू० अनिबद्धैरपि वक्तव्यम् ॥.

निबद्धाः निश्चयेन बद्धाः स्मृताः, पंचविधत्वेन स्मृता इत्यर्थः। ये पञ्चविधत्वेन न स्मर्यन्ते ते अनिबन्धाः, येन केनचित्प्रकारेण-तद्व्यापारज्ञाः तद्ग्रामस्थाः इत्यर्थः। तैरपि-वक्तव्यम्। अपिशब्दो निबन्धाभावसूचनार्थः। अनिबद्धा अपीत्युक्तेऽपि साक्षिप्रकरणत्वात् साक्षिणस्युः इति सामर्थ्यलब्धत्वादेव समस्तार्थे लभ्यमाने वक्तव्यग्रहणम्। तत्रापि तु येषां वचनं प्रमाणत्वेन निर्दिष्टं तेषामेव वचनं ग्राह्यं नार्थसंबंधादि दूषणयुक्तानां

428 429 वञ्चनम् । ततश्च अर्थसंबंधादि दूषणरहितै

रेव वक्तव्यम् ॥

सू० न पीडाकृते निबन्धः ॥

अत्र बन्धशब्देन व्यवस्थोच्यते । निश्चयेन

बन्धो निबन्धः । पीडाकृते हिंसादौ निबन्धा-

नां प्रतिषेधोऽस्तीत्यर्थः । पञ्चप्रकारैः अन्यै

श्चार्थसंबंधादि दूषणयुक्तैरपि वक्तव्यमेवेत्य

र्थोऽभिप्रायः । तथाचोशना — "साहसे सर्वे

भवन्ति" इति ॥

तथा —

सू० प्रमत्तोक्ते च ॥

? प्रमत्तः अज्ञातः वञ्चनया वा, प्रशब्दोपाद

नात् । यदा निगूढान् साक्षिणः कृत्वा उपायैः

ऽनं रहस्यापादयन्तीति तत्स्था: अर्थ-

संबंधादि दूषणयुक्ता अपीति साक्षिणो भवन्ती

ति । प्रमत्तेनोक्ते परिभाषिते इत्यर्थः । चका-

429. शत्स्त्रीगमनव्यापारेपि। तथाच व्याघ्रः—

430. "स्तेये च साहसे चैव संसर्गे च स्त्रियस्तथा।
नरादीनां प्रयोगे च न दोषः साक्षिषु स्मृतः"॥
इति॥

विपर्यये नरक उक्तः न केवलं तेषामेव, किन्तर्हि?

सू॰ साक्षिसभ्यराजकर्तृषु दोषो धर्मतंत्रपीडायाम्॥

(यत्र धर्मतंत्रपीडा) क्रियते सभ्यग्व्यवहारदर्शिनात् तत्र यथैव दोषेण कर्ता लिप्यते, एवं साक्ष्यादयोपि। न च साक्षिणो दोषः उक्तः (एव) इह ?
किमर्थं पुनः इहाभिधानमिति? उच्यते यदिह साक्षिग्रहणं न करोति ततः सभ्यादीनां असाक्षिक एव व्यवहारे दोष उक्तः स्यात्, ससाक्षिके तु दोषप्रापणार्थं साक्षिग्रहणम्। यावता दोषेण कर्ता संबध्यते तावद्दोषः सभ्यादीनामपि स्वापराधात् पृथ-

? साक्षिकेऽपि साक्षिणामेव ?

4.31 के प्रत्युत्पद्यते न तु खण्डश इति द्रष्टव्यम्।
तत्र शब्देन लोकव्यवहार उच्यते। ततश्च तत्पी-
डा च न कर्तव्येति तद्ग्रहणम्॥

सू॰ शपथे नैके सत्यकर्म॥

यदा तु साक्ष्यादि प्रमाणान्तर प्रत्यस्तमयः,
~~तदा तु~~ तदा शपथेन कोशादिना। एके सत्य-
कर्म सत्यव्यवस्थापनमिच्छंति। शपथश्चा-
भियुज्यमानस्य, इतरेण व्यवस्थितत्वात्।
सत्यमिति वक्तव्ये कर्मग्रहणं व्यवहाराद-
न्यत्रापि लौकिके व्यवहारे सन्देहे
शपथस्यानुप्रवेशार्थम्। तथा च श्रुतिः
"अद्यामुरी यदि यातुधानो अस्मी"त्यादि। गौत-
मस्तु न्यायेनैव। तत्र प्रमाणलेशे सति शपथं,
असति, न्यायेनेति द्रष्टव्यम्॥

4.32 सू॰ तद्देवराजब्राह्मणसंसदि स्यादब्राह्मणानाम्॥
तच्छपथं देवसंसदि देवसन्निधौ देवशब्देन

432 देवता प्रतिमा आदित्यादयो उच्यंते। आदित्यो
वा राजा व्यवहारदर्शी। ब्राह्मणाः सभ्यादयः।
तद्ग्रहणं लौकिकव्यवहारनिवृत्त्यर्थम्।
ऽवंच व्यवहारा देवतादिसन्निधौ। लौकिके सर्वत्र
यत्र कुत्रचिदिति द्रष्टव्यम्। अर्थान्तरनिमित्तो
~~व्यवहारो~~ व्यवहारः, अपराधनिमित्तो लौकिकइ
ति। अब्राह्मणाः क्षत्रियादयः। स्यात् ग्रहणं क्रम-
निवृत्त्यर्थम्। तत्र देवतालाभे ब्राह्मणसंसदि
तदलाभे राजसंसदीति द्रष्टव्यम्। तथाच
स्मृत्यन्तरम् ——
अब्राह्मणान्नृपः सम्यक् कारये द्देवसन्निधौ।
433 शपथं तदलाभेच ब्राह्मणस्य समीपतः॥
तदलाभे नृपस्याग्र भगवान् काश्यपोऽब्रवीत्॥
इति।
अलाभोपि कार्यान्तरव्यग्रापेक्षया द्रष्टव्यः।
अविप्राणामिति वक्तव्ये गुरुसूत्रकरणमब्रोति-

433 यद्ब्राह्मणस्यापि देवतासन्निधिप्रवेशार्थम् ।
एवंच श्रोत्रियब्राह्मणस्य सत्यशब्दोच्चा
रणमात्रादेव शपथं भवतीति द्रष्टव्यम् ।
स्मृत्यंतरोक्त विध्युपसंग्रहार्थं स्याद्ग्रहण
मित्येके । यदाह मनुः —

सत्येन शापयेत् विप्रं क्षत्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥

इति ।

देवराजब्राह्मणसमक्षमिति वक्तव्ये
संसदि ग्रहणं देवतायाः सन्निहितस्यानो-
434 पसंग्रहार्थम् । सभायां छलादिदोषरहितायां ।
यथाह नारदः —

न सा सभा यत्र न सन्ति ~~(विप्राः)~~ वृद्धाः
न ते वृद्धाः ये न वदंति धर्मम् ॥
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम् ॥

434 इति ॥.

साक्षिणां सामान्येन दोषः उक्तः।
इदानीं विशेषार्थमाह ——
सू॰ क्षुद्रपश्वनृते साक्षी दश हन्ति॥
क्षुद्रपशवः अजाविकादयः। तद्विषये नृप
वचने दशपुरुषान् हन्ति। अविशेषात्
? स्वबन्धून् हन्तीति। न तावत् पापमस्य
भवतीति। दशबन्धुहनने यावत्पापं तावद-
स्य भवतीत्यर्थः। एवं सर्वत्र ततश्च
तदनुरूपेण दण्ड प्रायश्चित्त कल्पनम्।
साक्षिग्रहणं सभ्यादीनामपि उपलक्ष
क्षणार्थम्। स्वविषये सहस्रा
सू॰. गोऽश्वपुरुषभूमिषु दशगुणोत्तरान्।
उत्तरमुत्तरं दशगुणं भवति। गोविषये शत-
435 गुणम्। अश्वविषये सहस्रगुणं इत्या
दि॥

435 "पञ्चपश्वनृते हंति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥"
इत्यादि यदुक्तं स्मृत्यंतरे तत्परिग्रहविशेषापेक्षया प्रयोजनापेक्षया वा द्रष्टव्यम्॥

सू. सर्वं वा भूमौ॥

भूमि विषये शतंसहस्रं सर्वं वा मनुष्यजातम्। कृताकृत क्षेत्रभेदेन विकल्पो द्रष्टव्यः॥

सू. हरणे नरकः॥

भूमेरिति विभक्ति विपरिणामः। हरणेनरक, अविशेषात् आकल्पात् भवति। दोषवचनप्रसंगे चैतदुक्तं ~~भवति~~ म्॥

~~सूदानी~~ इदानीं प्रकृतमाह —

सू. अप्सु मैथुनसंयोगे च॥

अप्सु कूपाद्याधारावस्थितासु मैथुन संयोगे परस्त्रीगमनादावित्यर्थः। संयोग-

435
436 ग्रहणात् कन्यालक्षणादावपीति । चकारः
अनृतग्रहणं मैथुनविशेषणं माभूदित्येव
मर्थः । भूमिवद्दोषः । एवं च हरणेपि
नरको द्रष्टव्यः ॥

सू० पशुवन्मधुसर्पिषोः ॥
मधु घृत (कृत) विषये क्षुद्रपश्वनृते
न तुल्यो दोषः ॥

सू० गोवद्वस्त्रहिरण्यधान्यब्रह्मसु ॥
वस्त्रादिविषयेऽनृते गवानृतवद्दोषः । ब्रह्मानृतमधीतवेदस्यानधीतवेद इत्युक्ते ॥

सू० यानेष्वश्ववत् ॥
हस्त्यश्वादि यान निमित्तेषु अनृतेषु ~~अनृत~~
अश्वानृततुल्यो दोषः । यानेष्विति बहुवचनं
अचेतनानां शिबिकादीनामप्युपसंग्रहार्थम् ॥

436 केचिदन्यथा व्याचक्षते पशुवन्मधु-
* सर्पिषोः इत्यारभ्य पश्वनृतवद्दोषः,
437 मधुसर्पिषोर्हरणे वस्त्रादि हरणे च गो-
वद्दोषः। तत्र ब्रह्मशब्देन वेदाङ्गानि लिखि-
तानि पुस्तकान्याहुः। यान हरणे चाश्वा-
नृत तुल्यो दोषः इति ॥

यदि त्वेवमपि दोषे उक्ते साक्ष्यनृतमे-
व वक्ति ततः ——

सू॰ मिथ्यावचने याप्यो दण्ड्यश्च साक्षी॥

अनृत उक्ते याप्यो गर्ह्यः सर्वलोकसम-
क्षं व्यवहारविच्छेदनार्थम्। पुरुषशक्त्या-
दि विज्ञानात् तन्मूल्य प्रमाणेन दण्ड्य-
श्च भवति। (अर्थ) प्रयोजनविशेषापे-
क्षया च समस्तव्यस्तपरिकल्पनार्थ-
श्चकारः। अधिकारादेव सिद्धे साक्षि-
ग्रहणं सदाव याप्यो दण्ड्यश्च +

-क्षया परिग्रहविशेषापेक्षया समस्त-

438 सम्यादयो कष्ट्याऽवेति ॥

अस्यापवादमाह —

सू० नानृतवचने दोषो जीवनं चेत्तदधीनम् ॥

यदा सत्यवचनात् परस्यावश्यं भावि जीवनच्छेदः तदा साक्षिणाऽनृतमपि वक्तव्यम् । तस्मिन्नुक्ते (न अनुक्ते) न पूर्वोक्तो दोषः ॥

सू० न तु पापीयसो जीवनम् ॥

तु शब्दः विशेषार्थः तद्ज्ञापयति — अवश्यं भाव्यनृतवचने दोषः, तथापि तु वधनिमित्तात् सत्यादनृतमेव विशिष्टं अल्पतरदोषत्वात् इति । तथाच मनुः —

शूद्रविट्क्षत्रविप्राणां यत्रोक्तेर्थे भवेद्वधः ।
तत्र वक्तव्यमनृतं तद्धि तत्र विशिष्यते ॥

इति ॥

यदैवं मन्येत — जीवन्नप्ययं पापरतिरेव भवति स्तेयाद्येव करोति तदा स-

438 त्यमेव वक्तव्यमित्यभिप्रायः। पापीयस इ-
त्यातिशयिक प्रत्ययनिर्देशः परपीडाकर्त
439? न्यैव सत्यं वक्तव्यम्, न विहिताकर्मण्मात्रे
न्येति ॥उक्ताः साक्षिणः॥.

उक्ताः साक्षिणः केन प्रष्टव्या इत्यत
आह——

सू॰ राजा प्राड्विवाको ब्राह्मणो वा शास्त्रवित्॥
(पृच्छतीति (प्राट्। पृष्टं विवेक्तीति) विवाकः)
पृच्छति वाऽसौ, वादि प्रतिवादिनौ साक्षिणो वा-
यदुक्तं तं विचारयतीति प्राड्विवाकः। स राजा-
भवेत्, श्रान्ते तस्मिन्नन्यकार्ये प्रवृत्ते वा
ब्राह्मणो शास्त्रवित् बहुश्रुत इत्यर्थः।
तथाच मनुः——
यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम्।
ततो नियुज्याद्विद्वांसं ब्राह्मणं कार्यदर्शिनः॥
इति॥

439. ऽवमुक्तलक्षणम् ——

सू० प्राड्विवाकमध्याभवेत् ॥

उपर्येनं गच्छेदित्यर्थः। इदमपि ब्राह्मण-

पक्षे, "राज्ञः स्तम्भुपर्यासीनं अधस्तादुपासीर-

न" ~~इत्युक्तत्वात्~~। अन्ये ब्राह्मणेभ्यः इत्यु-

440 क्तत्वात् । तमध्याभवेदिति युरिति सिद्धे-

प्राड्विवाककरणं नियमार्थं, तमेवोपरि

स्थितं गच्छेत् न सहायमपीति च-

अग्रहणमर्थिनऽव परिच्छेदयेत् न पुन-

रुपजपेदित्यर्थः। तथाच मनुः ——

नोत्पादयेत् स्वयं कार्यं राजामात्यपुरुषः ॥ ?

~~इति~~ इत्यादि ॥

सू० संवत्सरं ~~प्रति~~ प्रतीक्षीताप्रतिभायाम् ॥

यदाभियुक्तस्यार्थिनः साक्षिणां वा अप्रति-

भा अप्रतिपत्तिर्भवति तदा संवत्सरं तेषां

वचनं प्रतीक्षेत । संवत्सरादूर्ध्वं यथा

440. प्रतिक्षं परिच्छेदयेदित्यर्थः॥

अस्यापवादः ———.

सू॰ धेन्वनडुत्स्त्री प्रजननसंयुक्ते च शीघ्रम्॥

धेन्वादि संबंधे विवादे न संवत्सरं

प्रतीक्षेत। तत् काल क्षेपे ~~धेन्वेव~~ धेन्वा

द्युपभोगकालोऽतीतो भवति। धेनुः सक्षीरा

गौः। अनडुत् बलीवर्दः असावपि संवत्सरानु-

भोगेन जीर्यतीति। स्त्री प्रजनन संयुक्तेऽपि च

441 संयुक्त ग्रहणस्य प्रत्येकमभिसंबध्यमानत्वात्।

स्त्री प्रजननं कन्याविवाहः संवत्सर प्रतीक्ष-

णे तस्यापि कालातिक्रमो भवति। विवाहमिति

वक्तव्यमिति चेत् न प्रजननयोग्याग्रह-

णार्थत्वात्। एवं च सम्पर्यायाः संवत्सर प्रती-

क्षणेऽपि न दोषः। स्त्री ग्रहणं सर्व(स्व)जान्युप (सवर्ण)

(संग्रहार्थम्) लक्षणार्थम्। ततश्च सवर्णा-

यां प्रतीक्षणं ~~कुर्यादिति~~ कर्तव्यमिति सूत्र-

441 यतीति। चकारः प्रत्येकमिति सूत्रनार्थः।
धेनुसंयुक्ते अनडुत्संयुक्ते इत्यादि, माभूत्
समुदितानामेव विषयइति। शीघ्रग्रहणं नाडिका
मात्रस्यापि प्रतीक्षण प्रतिषेधार्थम्॥

सू० आत्ययिके च॥

शीघ्रं निर्णयं कुर्यादिति वर्तते। अत्यय-
कर्मणा यथा सार्थोन्मुक्तस्य सार्थो
गच्छति म्रियमाणावस्थो वाऽन्यतरो-
442 ~~स~~ भवति। ग्रामोपप्लवो भवतीत्यादि।
अत्ययवशात् ~~धे~~न्वादि संबंधादपि पूर्वं
विचारणीयमिति प्रयुक्तकरणम्। चशब्दः
स्तेयसाहसदण्ड पारुष्याद्युपसंग्रहणार्थः।
तथाच स्मृत्यंतरम् ———
"साहसस्तेय पारुष्य गो भिशापात्यये स्त्रियः।
विवादयेत् सद्यएव कालोऽन्यत्रेच्छयास्मृतः॥
सू० सर्वधर्मेभ्योगरीयः प्राड्विवाके सत्य

442 वचनं सत्यवचनम् ॥
सर्वधर्मेभ्यः श्रुतिस्मृत्युपदिष्टेभ्यः धर्मसा-
धनेभ्यः गुरुतरं प्राड्विवाके व्यवहारद्रष्टरि
यथाभूतार्थ दर्शित्वमित्यर्थः । प्राड्विवाके-
वा सन्निहिते साक्ष्यादीनां यत सत्यवच-
नमिति ॥ ओम् ॥

इति मस्करीये
गौतमभाष्ये
त्रयोदशोऽध्यायः
समाप्तः ॥

---

copied by.
Varanatha Chariyar
compared by.
1 T. A. K. Venkatachariar
20-4-55
2. Varanatha Chariyar.
20.4.55.